ŚASTHRA MUKTHÂVALÎ.

No 2.

BHATTA RAHASYAM,

BY

KHANDA DEVA,

EDITED BY

P. B. ANANTHACHARIAR,

Sanskrit Pandit

PRINTED AT THE

Sri Sudarsana Press

CONJEEVERAM.

1900.

(Copy Right Registered.)

Price Rs, 1 2 0.

श्रीः ॥

शास्त्रमुक्तावळी -- नं, २

भाट्टरहस्यम् ॥

श्री खण्डदेव विरचितम्

श्री कांची प्रतिवादिभयंकरम्

अनन्ताचार्येण

परिशोधितम्।

श्रीसुदर्शन मुद्राक्षरशालायाम्

मुद्रितमभूत्

कांची

(अस्य पुनर्मुद्रणाधिकारःशोधकेनस्वायत्तीकृतोस्ति)

इदानी मेतन्मूल्यम् —१—२—०

॥श्रीः॥

॥ श्रीहयग्रीवायनमः॥

॥ श्रीमतेरामानुजायनमः ॥

शास्त्रमुक्तावळी

खण्डदेवविरचितम्

॥ भाट्टरहस्यम् ॥

स्मृत्वास्मृत्वा मुरारातिं तत्प्रसादावलंबनात्।
रहस्यं भट्टतंत्रस्य विशदीकर्तुमीहमहे॥

तत्रतावत् द्वादशलक्षण्यांधर्माधर्मावेव जैमिनिनानुष्ठानोपयोगितयाविचारितौ. यद्यपि धर्माधर्मावदृष्टविशेषात्मकौ, नक्रियारूपौ. अतएव - "धर्मःक्षरतिकीर्तनादित्यादौवैशेषिकतंत्रेक्रियाजन्यादृष्टेधर्माधर्मशब्दप्रयोगः. तथापि " धर्मस्त्वनुष्ठितःपुंसामित्यादौतज्जनकविहितनिषिद्धक्रियायामपिधर्म शब्दप्रयोगात्ताविह प्राधान्येन विचार्येते. ....

अथकिंनामधर्मत्वमधर्मत्वंवा नतावद्विहितक्रियात्वंनिषिद्धक्रियात्वंवातत्. विहितनिषिद्धद्रव्यादौतदनापत्तेः, नहिफलार्थगुणानुष्ठातॄणां, यज्ञेरजताद्यनुष्ठातॄणाञ्च धार्मिकोधार्मिकइति व्यवहाराभावः. तथात्वे - इन्द्रियकामाद्यधिकरणादौ शास्त्रसङ्गत्यनापत्तेश्च. तस्य धर्मत्वाभावेतजन्यादृष्टस्य धर्मत्वाभावेन कीर्तन नाश्यत्वानापत्तेश्च, नापिक्रियात्वरहितंतत्. विवाहार्थानृतवचनादा वभ्यनुज्ञाविधिविषयेधर्मत्वापत्तेः. षोडशिग्रहणेऽधर्मत्वापत्तेश्चेतिचेन्न, वेदबोधितश्रेयस्साधनताकत्वंधर्मत्वं, तद्बोधितानिष्टसाधनताकत्वमधर्मत्वमित्येवतल्लक्षणोपपत्तेः. ज्योतिष्टोमकळंजभक्षणादीनां हीष्टानिष्टसाधनतावेदबोधितेतितत्रलक्षणसमन्वयः. अत्रवेदबोधितत्वंब्रह्मस्वर्गनरकादावपीत्युत्तरदळं. अन्नविषभक्षणादेरिष्टानिष्टसाधनत्वेपि

तस्यवेदबोधितत्वाभावादाद्यं. श्येनेचेष्टसाधनतायाएववेदबोधितत्वाद्धर्मत्वमेव, अनिष्टजनकत्वन्तुश्येनफलस्य वैरिमरणानुकूलशस्त्रघातादिरूपहिंसात्मकाभिचारस्यैव, तस्यैवचवेदबोधितानिष्टसाधनताकत्वादधर्मत्वं - ननुश्येनस्येतिव्यक्तञ्चतुर्थे. यत्रतुवैरिमरणकामोयजेतेत्यैवंविधिस्तत्रापिविधिना इष्टसाधनताबोधनाद्यागादेर्धर्मत्वमेव । नचतत्रयागस्यैवमरणानुकूलव्यापारत्वेनहिंसात्वान्नहिंस्यादितिनिषेधविषयत्वं, निषेधस्यशमप्राप्तहिंसोपजीवनेनाप्युपपत्तौविहिते अप्रवृत्तेः। नचैवंताद्दशस्थलेश्येनवत्परंपरयापिप्रत्यवायानुत्पत्तेश्शिष्टानांतत्रनिष्कम्यप्रवृत्त्यापत्तिः, "परस्योत्सादनार्थंयत्तत्तामसमुदाहृतम्" इत्यादिवाक्यपर्यालोचनया अभिचारजनकश्येनवदभिचारस्यापिकर्मणस्तामसत्वेननिंदितत्वात्तदुन्नीतनिषेधबलेनफलार्थंविहितस्यापितस्यानिष्टजनकत्वेनाधर्मत्वस्यापिसत्वात्तदनापत्तेः । अतएवधर्मत्वाधर्मत्वयोरुपाधिरूपत्वात्सांकर्येप्यदोषः ॥ ....

यत्तुधर्मलक्षणेबलवदनिष्टाननुबन्धित्वस्यापिप्रवेशाच्छ्येनादौचतदभावान्नधर्मत्वमिति तन्न। तत्प्रवेशेप्रयोजनाभावात् अनिष्टगतद्वैपौल्कट्यरूपस्यबलवत्त्वस्यप्राचीनकर्मोपनीतयाऽनुत्कटविपाकानुबंधित्वस्यश्येनेपिकदाचित्संभवाच्च। इतरथाश्येनेसाम्प्रयभावेनप्रवृत्त्यनापत्तेः।किंच श्येनादौधर्मत्वाभावेतामसधर्मत्वकथनानुपपत्तिः.अत उक्तलक्षणयोर्युक्तस्तत्रापिसमन्वयः। अभ्यनुज्ञाविधिनाचदोषाभावान्नतस्यैवाक्षेपादिष्टसाधनतानाक्षेपेणरागप्राप्तेष्टसाधनताकस्यापिनृतवदनस्य वेदबोधितेष्टसाधनताकत्वाभावान्नधर्मत्वापत्तिः। षोडशिग्रहणेचानेनैवेनानिष्टसाधनत्वाक्षेपः. प्रमाणाभावाद्वैरिवाच्च । अपित्वेतदभावेपीतरांगैः क्रतुमहोपकारसिद्धिमात्रस्यैव. तावन्मात्रेणैवपुरुषस्यनिवृत्युपपत्तेः, अतएव तत्रप्रवृत्त्यर्थं विधिनाफलाधिक्याक्षेपः. अतस्तत्रापिनाधर्मत्वापत्तिः । वेदबोध्यत्वंच वेदातिरिक्तप्रमाणेन स्वातंत्र्येणाबोध्यत्वेसतिवेदबोध्यत्वं तेन तत्त्वसाक्षात्काररूपब्रह्मज्ञानस्य ब्रह्मविषयकसविकल्पकज्ञान निवृत्तिरूपमोक्षजनकत्वस्य प्रमाणांतरसिद्धस्योपनिषद्बोध्यत्वेपिनतस्याधर्मत्वापत्तिः, यदापि प्रपंचस्यसत्यत्वेननाज्ञानकार्यत्वं - मोक्षश्चैकविंशतिदुःखध्वंसादिरूपस्तत्त्वज्ञानजन्य, इतिमतमपिप्रामाणिकं – तदा मोक्षजनकत्वस्यप्रमाणांतरागम्यत्वा त्तत्राधर्मत्वपरिहारार्थं वेदबोधित्वंविहायविधिबोधित्वंदेयं ज्ञानस्य प्रमाणवस्तुपरतंत्रत्वेनप्रवर्तनाविषयत्वाभावान्नविधिबोध्यत्वं। वस्तुतस्तु "अयंतुपरमोधर्मो यद्योगेनात्मदर्शन" मित्यादौज्ञानेपि

धर्मशब्दप्रयोगात्तस्य धर्मत्वेपिनक्षतिः । नचतत्रत्यदर्शनशब्दोध्यानपरः लक्षणायांप्रमाणाभावात् , ध्यानेचित्तवृत्तिनिरोधरूपमुख्ययोगजन्यत्वासंभवाच्च उपासनादिवच्च ज्ञानस्यधर्मत्वेपिब्रह्मणोवेदबोधितश्रेयस्त्वावच्छिन्नसाधनताकत्वाभावेन धर्मत्वाभावाद्धर्ममीमांसातो ब्रह्ममीमांसायामेदोपपत्तिः। अस्तुवाब्रह्मणिधर्मलक्षणस्यातिव्याप्तिपरिहारार्थं पुरुषकृतिव्याप्यत्वं वेदबोधितश्रेयस्साधनताकत्वविशेषणं। गुणस्यापिचाश्रयविशिष्टस्यकृतिव्याप्यत्वान्नाव्याप्तिः। ज्ञानस्यापिचस्वरूपेणकृतिव्याप्यत्वाभावेपिसम्यग्जरणादिवत्तदनुकूलमनःप्रणिधानादेः कृतिव्याप्यत्वेन परंपरया तदाविष्टस्यकृतिव्याप्यत्वोपपत्तेर्नाव्याप्तिः, अतएव "आत्मावाअरेद्रष्टव्य" इतिविधिप्रत्ययोप्येतदभिप्रायक इत्यप्येतन्मतेसुत्रत्वं । असाधारणीवाकारणतालक्षणेप्रवेशनीया तत्तल्लक्षणमेवधर्माधर्मपदशक्यतावच्छेदकं तत्र चक्रियातज्जन्याष्टसाधारण्येनैकयैवशक्त्या धर्माधर्मशब्दौक्रियातज्जन्याष्टपरावितिसंक्षेपः ॥

ननुकरणत्वबोधकशब्दाभावात् " यजेतस्वर्गकामः " इत्यादौकर्यं यागगतश्रेयस्साधनत्वस्यबोध्यत्वं; कश्चवाविधिः यद्बोध्यत्वंश्रेयस्साधनत्वस्येतिचेत्, अत्रतार्किकाः, लिङादिश्रवणोत्तरं प्रवृत्तिदर्शनात्प्रवृत्तिसामग्रीजननद्वारा लिङादिज्ञानस्यप्रवृत्तावुपयोग इतितावदविवादं । तत्सामग्रीचकृतिसाध्यत्वप्रकारकेच्छारूपाचिकीर्षा तस्याःस्वरूपसत्याः कारणत्वात्तत्रलिङादिज्ञानस्यानुपयोगेपिचिकीर्षाकारणीभूतज्ञानेतदुपयोगःकल्प्यते. तच्चबलवदनिष्टाननुबन्धित्वज्ञानं कृतिसाध्यत्वज्ञानमिष्टसाधनत्वज्ञानंच. अन्यतमाभावे इतरद्वयसत्वेपि मधुविषसंपृक्तान्नभोजनेचन्द्रस्पर्शे मण्डलीकरणादौच प्रवृत्त्यदर्शनात् अतो लिङादिज्ञानेनत्रितयज्ञाननालिङादेर्बलवदनिष्टाननुबंधित्वे कृतिसाध्यत्वे इष्टसाधनत्वेचशक्तिः तत्रापिविशेषणविशेष्यभावेनैकैकप्रकारकशक्तेः। पुष्पवच्छब्दवदव्युत्पत्तिवैचित्र्याद्युगपदर्थत्रयस्यापिबोधः । अन्वयस्यास्ययोग्यताबलाद्वाक्यार्थयागादावेव, " न कळंजंभक्षये" दित्यादौचनञर्थे अभावे । सोपिनञितरवैस्यापि कळंजनभक्षणस्य कृतिसाध्यत्वदिष्टसाधनत्वाच्च. अपितुबलवदनिष्टाननुबंधित्वस्यैव. अतस्तत्रापिसंबलवदनिष्टाननुबन्धित्वाभावोबलवदनिष्टानुबन्धित्वं निषेधेनबोध्यतइति कारणाभावात्तत्राप्रवृत्तिः । तस्यचाधर्मत्वंयागादेश्चधर्मत्वं । श्येनादौच कृतिसाध्यत्वेष्टसाधनत्वयोरेवान्वयः. ननुबलवदनिष्टाननुबंधित्वस्य, प्रमाणांतरेणाकल्पनाच्चा-

रस्य नरकसाधनत्वावगमेन तस्य नरकप्रयोजकत्वरूपबलवदनिष्टानुबंधित्वात् ,अत र्स्तत्रास्तिकानामप्रवृत्तिरित्याहुः । तन्न शक्तित्रयकल्पनेगौरवात् बलवदनिष्टाननुबं धित्वज्ञानाभावेपि बलवदनिष्टानुबन्धित्वज्ञानाभावमात्रेणेष्टसाधनताज्ञानादिनैवप्रवृत्ते रानुभविकत्वाच्च। अतोबलवदनिष्टानुबन्धित्वज्ञानं प्रवृत्तिप्रतिबन्धकं । तदभावश्च स्वरूपसन्नेवकारणं । अतश्चतत्रेच्छावदेव लिङादेरनुपयोगान्नतस्य तद्वाच्यत्वं- किञ्चैवंनञ्समभिव्याहृत लिङर्थबलवदनिष्टाननुबन्धित्व प्रकारकशाब्दबोधे न ञ्पदजन्योपस्थितिः कारणम् । नञसमभिव्याहृत बलवदनिष्टाननुबन्धित्वातिरि क्तलिङर्थप्रकारकशाब्दबोधे धातुपदजन्योपस्थितिः कारणम् । नञसमभिव्या हृतलिङर्थप्रकारकशाब्दबोधे धातुजन्योपस्थितिः कारणम् । लिङसमभिव्या हृतनञर्थप्रकारकशाब्दबोधे प्रथमान्तपदजन्योपस्थितिः कारणम् । लिङ्समभि व्याहृतनञर्थप्रकारकशाब्दबोधे धातुपदजन्योपस्थितिः कारणम् । नञसमभि व्याहृताख्यातार्थकृतिप्रकारकशाब्देबोधे प्रथमान्तपदजन्योपस्थितिः कारणम् । नञ्समभिव्याहृताख्यातार्थ कृतिप्रकारकशाब्दबोधे नञ्पदजन्योपस्थितिः कारण मितिसप्तकार्यकारणभावाः ॥ ....

किञ्चैवंबलवदनिष्टाननुबन्धित्वरूप लिङर्थस्यैवनञ्समभिव्याहारसत्वे तत्रान्वयः तद्भिन्नलिङर्थस्यतु सर्वत्रधात्वर्थएव - नञोसत्वेधात्वर्थइति गुरुभूतानेकसमभि - व्याहारज्ञानकार्यकारणभावकल्पनापत्तिः । एवंघटोनास्तिनपचतिचैत्रइत्यादौलिङा दिसमभिव्याहाराभावे नञर्थस्याभावस्याश्रये प्रथमान्तपदोपस्थाप्येन्वयः । लिङा- दिसमभिव्याहारसत्वेतु धात्वर्थएवेतिव्युत्पत्त्यनेकत्वं । तथाख्यातार्थस्यकृत्यादेर्नञो- सत्वे - आश्रयतासंबन्धेनप्रथमान्तपदोपस्थाप्ये तत्सत्वेतदर्थेप्रतियोगिताकत्वसंब न्धेनेतिगुरुभूताः कार्यकारणभावाः । " नातिरात्रेषोडशिनंगृण्हाती " त्येतदर्थम न्योपि । अस्मन्मतेतुवक्ष्यमाणरीत्या विध्यर्थस्यनञोसत्वेप्रयोज्यत्वसंसर्गेणाख्यातार्थ- कृतौ - तत्सत्वेस्वप्रयोज्याभावप्रतियोगित्व संसर्गेण - नञर्थस्यसर्वत्रप्रतियोगिता संसर्गेण-प्रथमान्तार्थस्यचाधेयत्व संसर्गेणाख्यातार्थेकृतौ, इतिचत्वारोवक्ष्यमाणरीत्या एकएवेतिलाघवं। किञ्च"नकळञ्जंभक्षये"दित्यत्र भक्षणेबलवदनिष्टाननुबन्धित्वबो- धेपीष्टसाधनत्वस्यापि विधिनाबोधितत्वात्तस्यच लोकावगत तृप्तिसाधनत्व मा - दायनिर्वाहेवैयर्थ्यापत्ते र्भवन्मतेविश्वजिन्न्यायेन स्वर्गकल्पनापत्तिः तदधिकार्यै-

वनरकस्य कल्पनान्नबलवदनिष्टाननुबन्धित्व विरोधः । अतएवयत्र कृतिसाध्यत्व बोधेनकथञ्चिदपि वैयर्थ्यपरिहारस्तत्र लोकसिद्धानुवादकत्वमपि नानुपपन्नम् । किञ्चयदित्रितयमपि लिङर्थः तदाश्येने बलवदनिष्टाननुबन्धित्वस्यकुतोनबोधः बाधादितिचेत् ? कोयंबाधोनाम, श्येनफलंस्याभिचारस्याहिंसात्वेन नहिंस्यादिति निषेधविषयत्वमेवबाधकमितिचेत् ; तस्यसामान्यशास्त्रत्वेन रागप्राप्तहिंसोपजीवनेनापि चरितार्थतया यागीयपशुहिंसायामिव श्येने बलवदनिष्टाननुबन्धित्वस्य विशिष्यविधिप्रमितत्वेन तन्निर्वाहार्थं श्येनेष्यप्रवृत्तेः . कथञ्चित्प्रवृत्तावप्यभिचार जन्यनरकस्याधिकत्वाकल्पनेनोभयोपपत्तेश्च ॥ ....

किञ्च बलवदनिष्टाननुबन्धित्वंनतावदिष्टोत्पत्ति नान्तरीयकदुःखाधिक दुःखाजनकत्वं . विधितस्तज्ज्ञानसत्वेपिस्वद्रव्यव्ययद्वेषवतोलसस्य यागादौ प्रवृत्त्यदर्शनेन तज्ज्ञानस्यप्रवृत्तिम्प्रत्यकारणत्वात् । इष्टोत्पत्तिनान्तरीयकदुःखाधिक दुःखजनकत्वस्यनिषेधशास्त्रतःकळञ्जभक्षणादौ ज्ञानेपिरागिणःप्रवृत्तिदर्शनेनतज्ज्ञानस्यनप्रवृत्तिप्रतिबन्धकत्वमपि, अतोनिष्टेबलवत्वमुत्कटद्वेषविषयत्वम् , औत्कट्यञ्च जातिविशेषःफलैकोन्नेयः । तादृशद्वेषश्चप्राचीनकर्मानुरोधेन । अतश्चयागादिजन्येपि दुःखेयदाप्राचीनकर्मवशा दुत्कटोद्वेषस्तदातस्य बलवदनिष्टानुबन्धित्व ज्ञानसत्वा त्तत्राप्रवृत्तिः, यदातुशुभकर्मवशात्तत्र नोत्कटोद्वेषस्तदा (१)तस्यबलवदनिष्टानुबन्धि त्वज्ञानाभावसत्वात्प्रतिबन्धकाभावेन तत्रप्रवृत्तिः . एवंकळञ्जभक्षणादौश्येनेच प्राचीनकर्मवशेनैवप्रवृत्त्यप्रवृत्ती कादाचित्केउपपादनीये. अतश्चयागादौ नैयत्येनबलवदनिष्टाननुबन्धित्वस्य विधिनाबोधयितु मशक्यत्वात्कळञ्जभक्षणादौच नैयत्येन तदभावस्य नत्रा बोधयितुमशक्यत्वाच्च नतत्र लिङादेरशक्तिः.

यत्तुबलवदनिष्टाननुबन्धित्वस्य विध्यर्थत्वाभावे, " तृप्तिकामः कळञ्जं भक्षये"दितिवाक्यस्य प्रामाण्यापत्तिः, बलवदनिष्टाननुबन्धित्वातिरिक्तेष्टसाधनत्वादिरूपविध्यर्थस्य तत्राबाधात् , अस्मन्मतेतुबलवन्निष्टानुबन्धित्वस्यतत्र श्रुतिबोधितत्वादप्रामाण्योपपत्तिरिति . तन्न - बलवदनिष्टाननुबन्धित्वा तिरिक्तेष्टसाधनत्वादि विध्यर्थवादिनाम्मते तदापत्तावपिप्रवर्तनाविध्यर्थवादिमतेतदनापत्तेः , तथाहि - नञोसत्वेवक्ष्यमाणप्रवर्तना प्रयोज्यत्व संसर्गेणाख्यातार्थे कृता वन्वेतीतिवक्ष्यते , तच्चप्रयोज्यत्वं स्वविषयकज्ञान जन्यानुमिति प्रयोज्यत्वमपि ,

(१) विशेषणाभाव प्रयुक्तविशिष्टाभावसत्त्वा दितिपाठान्तरम् ॥

तत्र यत्रप्रत्यागान्तरेण यागादावनिष्टसाधनतानबुध्यते । तत्रेष्टसाधनत्वस्यैवप्रवर्तनाज्ञानादनुभितिः । यत्रतुतत्प्रत्यागान्तरेणावगतम्, निषेधेनचतस्यानिष्टसाधनत्वमपि - यथादीक्षितान्नभोजनस्य - "नदीक्षितान्नमश्नीयात्" इतिनिषेधात् . तत्रहुतायांवपायां दीक्षितस्यान्नमश्नीयात् इतिपुनर्विधिरनिष्टसाधनत्वाभावस्यैवाक्षेपकोनत्वनिष्टसाधनत्वस्य - तस्यप्रत्यागान्तरसिद्धत्वेनसिसाधयिषाभावेनुभित्यनुत्पत्तेः । अनिष्टसाधनत्वाभावज्ञानस्यापि स्वविषयविशेष्यकानिष्ट साधनत्व ज्ञाने - अप्रामाण्यनिश्चायकतया प्रवृद्धप्रयोगः । प्रवृत्तौह्यप्रामाण्य ज्ञानानास्कन्दितानिष्टसाधनताज्ञानमेव द्वेषबलक्तादृशायां प्रतिबन्धकम् । अतश्चैतेना प्रामाण्यनिश्चये विशिष्टाभावसम्पादकतया तस्यप्रवृत्युपयोगस्सुलभएव । अतश्चनिषेधविषयविषयकेनविधिना - अन्यनुज्ञाविधिरूपेण स्वविषयेनिष्टसाधनत्वाभावस्यैवाक्षेपात्तस्यच लौकिकवाक्ये प्रत्यक्षश्रुतिविरोधेन बाधितत्वादप्रामाण्योपपत्तिः अतोनतावद्वलवदनिष्टाननुबन्धित्वं लिङर्थः - नापिकृतिसाध्यत्वं तत्स्यमवन्मतेपाकानुकूलस्य कृतौ भानेसमानसंवित्संवेद्यतया पाकेपिकृतिसाध्यत्वस्यभानोपपत्तेरन्यलभ्यतयालिङोवाच्यत्वानुपपत्तेः । अस्मन्मतेपि प्रवर्तनाक्षेपादेवेष्टसाधनत्वादिवद्भानोपपत्तेरन्यलभ्यत्वम् अतः परिशेषादिष्टसाधनत्वमेवलिङाद्यर्थइतिवक्तव्यम् । इष्यते चकैश्चिदाधुनिकैरिदमेव । नन्वसमभिव्याहारस्थलेवानिष्ट साधनतायां लिङोलक्षणा , अतोलिङादेरिष्टसाधनत्वमेवार्थइति । तदपिन - तथात्वेयिष्टसाधनता ज्ञानादेवप्रवृत्तेराचार्यप्रेरितोहं गामानयामीत्यादा वाचार्यादेःप्रवर्तकत्व व्यवहारानुपपत्तेः । नचप्रवृत्तिजनकेष्टसाधनता बोधकलिङुच्चारयितृत्वात्तस्य प्रवर्तकत्वव्यवहारः । तथात्वेराजप्रेरित पदातेस्तादृश लिङुच्चारयितृत्वेनप्रवर्तकत्वापत्तौ पदातिप्रेरितोहं नगामानयामि , किन्तुराजप्रेरित इति पदातौप्रवर्तकत्वाभाव व्यवहारानुपपत्तेः । ....

अथ अन्याप्रेरितत्वेसति तादृशलिङुच्चारयितृत्वं प्रवर्तकत्वं । तथात्वेपितृप्रेरिते राज्ञिप्रवर्तकत्वानापत्तेः । अतश्चैतादृश व्यवहारश्चलात्प्रवृत्ति कारणीभूत ज्ञान विषयीभूतेच्छाश्रयत्वेनैव राजादेः प्रवर्तकत्वंवाच्यम् । नचेच्छायालिङादि वा वाच्यत्वाभावेपिज्ञानं सम्भवति , विषयविशेषस्येष्टसाधनत्वेपिपरेच्छा विषयत्वाभावेन व्यभिचारादिष्ट साधनत्वस्यानुमापकत्वानुपपत्तेः । अतःपरिशेषाल्लि

ङादिवाच्यैवसा - तथाचप्रवृत्तिविषये यागादाविष्टसाधनत्वादे रनुमानेनैव बो धोपपत्तौ नृनर्वाच्यत्व कल्पनावसरः । भवतिहि- अयमत्रप्रवर्ततामित्याकारकेच्छाविषयत्वनिष्टसाधनत्व व्याप्तम् । अतस्तेनतदनुमानम् । अत्रासुखे सुखत्वभ्रमेणसुखत्ववासुखं मेजायताभितीच्छाविषयत्व सर्वेपीष्टसाधनत्वाभावात्तत्र व्यभिचारवारणाय हेतावाकारकपर्यन्तानुधावनम् । प्रतारक ताद्दशेच्छाविषये व्यभिचारवारणाय - (आनेति) अत्रचेच्छाविषयत्व मिच्छाविषयीभूत प्रवृत्तिविषयत्वम्बोध्यम् । तेनप्रवृत्तौ तदाश्रयेपुरुषेवा इच्छाविषये इष्टसाधनत्वाभावेपि नव्यभिचारः । यागादावेवचहेतु सत्वादिष्टसाधनत्वानुमानम् ।

अत्रच यद्यपिशब्दभावनाख्या व्यापारत्वनिच्छात्वनेरया लिङादिरर्थतावच्छेदकम् । तथापिनेनरूपेणोक्त विधेच्छायाएव लिङादिपदाद्बोधः । तत्तत्प्रत्ययादि सत्वभिव्याहारस्य नियामकत्वात् । भवतिहि - मृदस्तिपात्रंकरिष्यामीत्यादौ पात्रत्वेन सामान्यरूपेण मृण्मयपात्रविशेष्यको बोधस्समभिव्याहारात् । प्रवृत्तिसामर्थ्याच्च प्रवृत्त्याश्रयस्य पुरुषस्यबोधः . वचनेङ्गितादिनाचाप्यलेवगते इच्छायामाप्तनिष्ठत्वस्य समानसंवित्संवेद्यतया यागादौ ताद्दशेच्छाविषयत्वस्य बोधेतिनहेत्वसिद्धिः । तेनोक्तविधसामग्रया हेतुज्ञानेजाते इष्टसाधनत्वाद्यनुमानं सुलभमेव । अतश्चान्य लभ्यत्वादिष्टसाधनत्वादे र्नलिङादिवाच्यत्वम् ॥ ....

किञ्चभवन्मते येनस्वर्गपाकादाविष्टसाधनत्वादि बुद्ध्याप्रवृत्तं तस्यपाकवर्तमानतादशायां चैत्रः पचेदितिप्रयोगापत्तिः । इष्टसाधनत्वादि विशिष्टपाकानुकूलकृतिमत्त्वात् चैत्रेऽबाधितत्वात् । चैत्रः पचतीतिवर्तमानत्वाबोधेपि क्षतिर्वारणात् । मन्मतेतुताद्दशप्रवृत्तेः प्रेरणाप्रयोज्यत्वाभावा द्विषय बाधेनाप्रामाण्योपपत्तिस्ताद्दशप्रयोगस्येतिविशेषम्यम् । ....

ननुभवन्मतेपि यत्रान्यप्रेरणया चैत्रस्यप्रवृत्तिस्तत्र पाकवर्तमानता दशायांचैत्रःपचेदितिप्रयोगस्य प्रमाण्यापत्तिः . पाकानुकूलायाश्चैत्रनिष्ठप्रवृत्तेः प्रेरणाप्रयोज्यत्वस्याबाधात् . वस्तुतस्तु स्वतास्विद्दष्टसाधनता ज्ञानजन्यप्रवृत्तेरपिप्रेरणाप्रयोज्यत्वस्वरूपयोग्यतया प्रेरणाप्रयोज्यत्वात्तत्रापिचैत्रःपचेदिति प्रयोगापत्तिरनिवार्यैव । नाहितत्रकृत्युपहित प्रयोज्यत्वविशिष्टा कृतिश्शाब्दबोधे भासते । बहु-

शश्शाब्दबोधेप्यालस्यादिना प्रवृत्त्यनुत्पत्तेरितिचेन्न । प्रवृत्तित्वावच्छिन्नंप्रतिनप्रेरणीयाः प्रयोजकता व्यभिचरात्, अपितुप्रेरणोत्तर प्रवृत्तित्वावच्छिन्नं प्रति, इयंप्रवृत्तिः प्रेरणाप्रयोज्या - इयंन-किन्तुस्वतएवेत्यादि सर्वलौकिकव्यवहारात् , यद्वाप्रेरणाप्रयोज्यतावच्छेदकतया प्रवृत्तित्वव्याप्यं धर्मान्तरमेवेत्यपि वक्तुंशक्यं अतएवतत्प्रयोजकतावच्छेदकतया प्रेरणात्वमखण्डोधर्मो लोकवेदसाधारण इत्यपिवक्ष्यते । तस्यचप्रवृत्तित्वव्याप्यधर्मस्य लिङादिसमभिव्याहारस्थले लक्षणाया आख्यातादबोधः । सामान्यधर्मेणैववा प्रेरणाप्रयोज्यव्यक्त्युपस्थितिरित्याद्यन्यदेतत्। सर्वथास्वतासिद्धेष्टसाधनता ज्ञानजन्यप्रवृत्तिरिति नप्रेरणायास्वरूपयोग्यतयापिप्रयोजकत्वमिति नतादृशप्रवृत्तिमति लिङादिमद्वाक्यप्रयोगापत्तिः । प्रेरणाप्रयोज्यप्रवृत्तिवर्तमानतादृशायान्तु प्रयोगापत्तिरेवनिवार्या ; नास्माभिः प्रेरणायाविषयतासम्बन्धेनैव प्रवृत्तावन्वयइत्युच्यते । नवाप्रेरणाविषयीभूत प्रवृत्तिविषयत्वेन यागादौयेन तादृशप्रयोगापत्तिश्शंक्येत - किन्त्वतएवसाक्षात्सम्बन्धपरित्यागेनस्वज्ञानजन्यानुमितिप्रयोज्यत्व संसर्गेणाख्यातार्थ प्रवृत्तौप्रेरणायाः प्रकारत्वम् । अस्तिहिप्रेरणाज्ञानजन्येष्टसाधनत्वाद्यनुमितेः प्रवृत्तिम्पतिजनकत्वात्प्रयोजकत्वम् । उपपादयिष्यत एतदुपरिष्टात् तत्प्रेरणाज्ञानंस्वप्राक्कालीन स्वज्ञानोपधेयमेवस्वरूपेण तद्व्यक्तित्वेन संसर्गमध्येनिवेश्यते । प्रथमस्वपदम् तत्तत्प्रवृत्तिव्यक्तिपरं। द्वितीयस्वपदम् तत्तल्लिङादिव्यक्तिपरम् । तेनतत्तत्प्रवृत्तिप्रागभावकालेयल्लिङादिपदज्ञानम् तेनोत्पादितम् यत्प्रेरणाज्ञानं तज्जन्येष्टसाधनत्वानुमितिप्रयोज्यत्वस्वरूपयोग्यत्वं संसर्गइतिफलितार्थः । अतश्चप्रवृत्तिवर्तमानतादृशायां अनेनसंसर्गेण प्रेरणात्वस्यप्रवृत्तौ बाधान्नतादृश प्रयोगापत्तिरस्मन्मते । अन्यदीयप्रेरणाप्रयोज्य प्रवृत्तिप्राक्काले अन्यदीयलिङन्तप्रयोगस्तु राजप्रेरितप्रवृत्तिकालेपदात्यादीनां मन्येषामाप्तादीनाञ्च लिङन्तप्रयोग दर्शनादिष्टापत्त्यैव नापादनीयः । सम्भवतिहि तत्रराजप्रेरणामादायापि प्रयोगोन्यदीय प्रेरणामादायच्च । तज्ज्ञानजन्यानुमितेरपि प्रवृत्तिस्वरूपयोग्यत्वात् ॥ ....

अतस्सिद्धन्नतार्किकरीत्या - इष्टसाधनत्वादे लिङाद्यर्थत्वम् । अपितुपूर्वोक्तरीत्याप्रवर्तकेच्छायाएव ॥ ....

" विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषुलिङ् , लोट्, छन्दसिलिङर्थेले-

त्यादि पाणिन्यनुशासनादयमेवार्थो विज्ञायते । विधिर्निकृष्टस्यप्रेरणम् । निमन्त्रणम् - अनिष्टजनकीभूताकरणप्रतियोगित्वानुमापकप्रवर्तकेच्छा । यथा श्राद्धादौ दौहित्रादेः प्रवर्तनम् । तत्रप्रमाणान्तरेणा भोजनेप्रत्यवायावगमात् । अतएव विधिस्थलइवाग्निमयोरपिच लाघवादिष्टसाधनत्वानुमापकत्वमेव । कृतिसाध्यत्वानुमापकत्वन्तु सर्वत्रैव । मास्तुवातत् । आमन्त्रणम् - कामचारानुज्ञा । तत्रप्रेरकस्याऽऽग्रहाभावमात्रम् । अन्यत्र सर्वत्राऽऽग्रहोप्यधिकोभासते । अधीष्टंसत्कारपूर्वकमुक्तमंप्रतिप्रेरणम् । एतेषुचतुर्षुप्रवर्तनात्वस्यैकस्यानुगतत्वात्तेनैव रूपेणैकैवशक्तिः । अन्यांशस्यतु प्रमाणान्तरलभ्यत्वान्नशक्यत्वम् । सम्प्रश्नप्रार्थनयो स्त्वतिरिक्तैव शक्तिः । किन्त्वमधीयीथाः, भवतिभेप्रार्थना, वेदमधीयीयेत्यादौ तत्रप्रवर्तनात्वाभावात् । आनुशासनिकी वानिरूढलक्षणा । "हेतुहेतुमतोर्लिङ्" "कामप्रवेदनेकश्चिदि" त्याद्यनुशासनेनैव हेतुत्वादौप्रचुरप्रयोगेण प्रवर्तनात्वस्यैव शक्यता वच्छेदकत्वात् । प्रवर्तनात्वञ्च प्रवृत्त्यनुकूलव्यापारत्वम्, अनुकूलत्वञ्च जनकत्वम् । तच्च लोके पुरुषाशयवृत्ति । वेदेच तदभावादिच्छाभिन्नस्य कस्यचित्प्रवर्तनात्वम्बोध्यम् । अत्रापीष्टसाधनत्वमेव प्रवर्तनात्वेन रूपेण वैदिलिङाद्यर्थइति मण्डनमिश्राः । अर्थभावनाविधानानुकूलाया लिङादिनिष्ठ शक्तेरेवाभिधाख्यायाः प्रवर्तनात्वेन रूपेण लिङ्वाच्यत्वं परिकल्प्य तज्ज्ञानस्यप्रवृत्तिम्प्रतिकारणत्वमात्रं - कल्प्यतइतितु पार्थसारथिः । ....

वस्तुतस्तु - इष्टसाधनत्व कृतिसाध्यत्वयो र्विनिगमनाविरहः । तथात्वे वा लोकेपि तस्यैवतथात्वापत्तेः स्तार्किकमतोक्त दूषणापत्तिः । शक्तिप्रवर्तनावादिमतेपि उक्तशक्तेस्संख्याभिधानानुकूलशक्तया लिङ्त्वादिनैववाविनिगमनाविरहस्तदवस्थएव. अतः " कल्पनेनविनिगमनाविरहे कल्प्यमन्यत्सिद्ध्यती " तिन्याये नालौकिको धर्मएव लिङादिनिष्ठःप्रवर्तनात्वेन लिङादिवाच्यश्च कल्प्यते. तज्ज्ञानञ्च प्रवृत्तिप्रतिकारणमिति न्यायसुधाकृन्मतमेव कथञ्चिद्युक्तमितिव्यक्तम् कौस्तुभे ।

वस्तुतस्तु लोके नेच्छायाःस्वरूपेणप्रवृत्तिम्प्रतिकारणत्वम् तदभावेपि तद्क्रमेणप्रवृत्त्युदयात् स्वरूपेणकारणत्वे लिङुक्तिवैयर्थ्याच्च. नापि तज्ज्ञानस्यकारणत्वम्, इष्टसाधनत्वाद्यनुमापकतया प्रवृत्तिविशेषंप्रति प्रयोजकतयैवा न्वयव्यतिरेकसिद्धौ कारणत्वकल्पने मानाभावात् । अतः प्रवृत्तिप्रयोजकत्वमेव प्रवर्तना-

त्वंवाच्यम् तदपिचनलिङादेरशक्यतावच्छेदकम् गौरवादन्यलभ्यत्वाच्च । प्रवृत्ति हि आख्यातादेव लभ्यते प्रयोजकत्वन्तु संसर्गबलेनेति नतदपिशक्यतावच्छेदक कोटिप्रविष्टम्, अपितुलोकवेद साधारण्येन व्यापारत्वमेवशक्यतावच्छेदकम् । अ स्तिहि लौकिके लिङादिशब्दोपस्थाप्ये पुरुषाशयेप्रवृत्तिसाधनीभूतेष्टसाधनत्वाद्यनु मापकतया प्रवृत्तिप्रयोजकव्यापारत्वम् । वेदेपि शब्दश्रवणोत्तरकाल मनुमायैव त त्कार्यदशनादिच्छायाश्चापौरुषेये वेदे बाधात्कार्यानुमेयमलौकिकं धर्मं लिङादि - निष्ठं लिङादिवाच्यं परिकल्प्य तस्यतदनुमापकत्व कल्पनात्तत्रापि प्रवृत्तिप्रयोजक व्यापारत्वं । अतउभयसाधारण्येन व्यापारत्वमेव शक्यतावच्छेदकम् । ....

यद्यपिच तदन्यत्राप्यतिप्रसक्तम् । तथापिसमभिव्याहारबलाद्विशेषलाभः तथाहि लिङ्पदाद्व्यापारत्वावच्छिन्नव्यापारमात्रोपस्थितावपि तस्याख्यातोपात्त-कृतौ निरुक्तसंसर्गेणान्वये बुद्धे पश्चात्तत्संसर्गस्य तत्त्वेन रूपेण बोधवेळायां तेन तेनप्रमाणेन विशेषलाभोनासुलभः. इष्यतएवहि भूतलंघटवदित्यादौ घटपदाद्घ टत्वावच्छिन्न घटमात्रप्रतीतावपि तस्य योग्यसंसर्गेण भूतलेघटान्वयेबुद्धे तत्संस र्गस्य तत्त्वेनजिज्ञासायां प्रमाणान्तरेण संयोगत्वादिना संयोगादिरूपसंसर्गप्रतीतिव-द्भूतलवृत्ति घटविशेषप्रतीतिः । ....

तदयमत्रक्रमः प्रथमंलिङादिपदाद्व्यापारत्वेन सामान्यरूपेणैव व्यापा रोपस्थितिः पश्चादाख्यातोपस्थितकृतौ तस्य स्वविषयंकज्ञानविशेषजन्यानुमिति-प्रयोज्यत्वसंसर्गेण तत्त्वेनानुपस्थितेनैवान्वयः । शाब्दबोधश्च व्यापारवती यागा दिकृतिरिति । नचलिङर्थविशेष्यकएव शाब्दबोधइति भ्रमितव्यम्, " भावप्रधान माख्यात " मितिस्मृत्या लकारार्थ प्रकारक शाब्दबोधत्वावच्छिन्नंप्रति अर्थभाव नाविशेष्यतासंबन्धेनाऽऽख्यातपदजन्योपस्थितिः कारणमिति कालादि साधार-ण्येनैककार्यकारणभावकल्पना लाघवानुरोधेन चाख्यातार्थकृतेरेव मुख्यविशेष्य त्वात् । सम्प्रश्नप्रार्थनयोरपिविषयतासम्बन्धेन तस्यामेवान्वयः । हेतुत्वादेरपि स्वरू पसम्बन्धेन तस्यामन्वयेपि तस्या उपलक्षणत्वादिना इतरक्रियायामन्वयः । लिङो वाहेतुमत्त्वरूप संसर्गतात्पर्यग्राहकत्वं । तेनाख्यातार्थस्यैव " आर्तिमार्छे " दित्या दावितरक्रियान्वयो हेतुमत्त्वसंसर्गेणैवेति नकाश्चिद्विरोधः ॥ ....

एवं "यदिशालीन्भुंजीत तर्हि दध्युपसिंचे" दित्यादौ कामप्रवेदनेपि स्व-

विषयेच्छानिमित्तकत्वंसंसर्गः. लिङ् तात्पर्यग्राहकः. आख्यातमेवेच्छालक्षकम्। यदि शालीन्भोक्तुमिच्छेदिति निमित्तत्वमेवसंसर्गइति नक्त्वापि व्युत्पत्त्यन्तरम् । अतश्च देवदत्तःपचेदित्यादौ लोकेतावच्छाब्दबोधोत्तरं स्वसंसर्गस्य तत्त्वेनजिज्ञासा यां चैत्रप्रेरितोहंपचामीत्यादि व्यवहारवशाद्व्यापारस्येच्छारूपत्वेऽ वगते पाकविष यकृतिसम्बन्धा त्पाकेयंप्रवर्ततामित्याकारत्वेच तस्यास्सिद्धे तदाश्रयस्य प्रयोज-कवृद्धस्य प्रमाणान्तरेणाप्तत्वावगमे समानसंवित्संवेद्यतया पाकेयंप्रवर्ततामित्या द्याकारकाप्तनिष्ठेच्छाविषयकृतिविषयत्वरूप हेतुज्ञानं मानसंजायते, ततश्च तस्मि न्हेतौ क्रियान्तरदृष्टान्तेनेष्टसाधनत्व कृतिसाध्यत्व योर्व्याप्तिस्मरणा दुभयविष यिणी अनुमितिरुत्पद्यते. क्वचिच्चानिष्टसाधनीभूताकरणप्रतियोगित्वादेरपि सामग्रीवशात्। तत्सामग्रीच - अयमत्रप्रवर्ततामित्याकारक स्वभङ्गनिमित्तकानि ष्टकर्तृच्छाविषयत्वरूप हेतुपरामर्शादिरूपा। स्वपदमिच्छापरम्। इदञ्चतत्रतत्र कौ स्तुभादौ स्पष्टम्। तस्याश्चप्रवृत्तिप्रयोजकत्वं स्पष्टमेवेति संसर्गस्य तत्त्वेनलाभ इ च्छाविशेषलाभश्चोभयं सुलभम्। वेदेपि लिङादिशब्दश्रवणोत्तरकालं व्यापारत्वरू पेण व्यापाररूपपदार्थोपस्थित्या निरुक्तसंबंधेन व्यापारवतीयागादिकृतिरिति शाब्दबोधे जाते संबंधस्य तत्त्वेनजिज्ञासायां वेदस्थलिङादिप्रेरितोहं यागादि-करोमीत्यादि व्यवहाराद्यागविषयककृतिसंबंधाच्च तस्यलिङादिनिष्ठत्वं यागेयं-प्रवर्ततामित्याकारकत्वञ्चावगम्यते। अतएववर्णात्मकलिङादेर्नित्यत्वात्तद्वृत्त्यलौकि-कधर्मस्यापिनित्यत्वं। नचभ्रमप्रमासाधारण्येन तज्ज्ञानस्यैवानुमितिजनकत्वाल्लोक-वदेवतत्सिद्धौप्रमाणाभावः। वेदेर्थज्ञानस्य भ्रमत्वानुपपत्त्यातत्सिद्धेः। तस्मिन् यागविषयककृतिविषयिताचनज्ञानादिविषयतासाधारणी अतिरिक्तावा,अपितुपाकेऽ यंप्रवर्ततामित्यादिलौकिकेच्छानिष्टविषयितासाधारणी इच्छासामान्यनिष्टविषयिता-भिन्नालिङाद्यर्थमात्रनिष्ठा। अनुगतप्रतीतिरेवतत्प्रामाण्यात्. अतश्च लिङादेर्नि-र्दोषत्वेनानाप्तभिन्नत्वेवधारिते समानसंवित्संवेद्यतयैव प्रतारणाद्यजन्यहिताहितो-पदेशजनकनिष्ठ निरुक्ताकारक व्यापारविषयीभूत कृतिविषयत्वरूप हेतुज्ञानं तथै-व मानसं जायते। अतएव लोकवेदसाधारणं प्रतारणाद्यजन्यहिताहितोपदेश-कर्तृत्वेसति तद्भिन्नोपदेशाकर्तृत्वमाप्तत्वं। अतश्च तेनेष्टसाधनत्वाद्यनुमितिर्लौ-कवदेवनानुपपन्ना. नच भ्रमप्रमासाधारण्येनेष्टसाधनत्वाद्यनुमितेरेव प्रवृत्तिप्रयो-

जकत्वान्नभवन्मते यागादावपीष्टसाधनत्वादिसिद्धिः ज्ञानस्यास्मन्मतेस्वतः प्रमाणत्वेनदोषाद्यभावेप्रमात्वस्यैवसिद्धेः । संलिङ्गकपरामर्शस्यभ्रांतानुमित्यजनकत्वाच्च ।

अतसिद्धं शक्यतावच्छेदकस्यातिप्रसक्तत्वेपि लोकेवेदेवाविशेषलाभो-निरुक्तसंसर्गलाभश्चेति ।

अथवा लोकवेदसाधारणः पूर्वोक्तविधया प्रवृत्तिविशेषप्रयोजकतावच्छेदकतया सिद्धोव्यापारत्वरूपोखण्डधर्मएवानातिप्रसक्तोलिङादिपदशक्यतावच्छेदकः.

अथवा अयमत्रप्रवर्ततामित्याकारकत्वरूपस्य लोकवेदसाधारणस्य विषयितात्रिशेषस्य पूर्वमुक्तत्वात्सएव लिङादिशक्यतावच्छेदकः ।

एष्टव्यश्चायमेव प्रकारः, शाब्दबोधत्वावच्छिन्नं प्रति लक्षणादिजन्यशाब्दबोधत्वावाच्छिन्नं प्रतिवा लोकवेदसाधारण्येन तात्पर्यज्ञानस्य भट्टमते कारणत्वनिर्वाहार्थं । नह्यस्मात्पदादयमर्थोबोद्धव्य इत्याकारकेच्छारूपं तात्पर्यं वेदे संभवति । अतस्तत्रातिरिक्तश्शब्दनिष्ठोधर्मविशेषएव तात्पर्यं भट्टमते वाच्यं । नच तज्ज्ञानस्य कारणत्वं लोके क्लृप्तं । अत्रैवातिरिक्तकार्यकारणभावकल्पने मानाभावएव । अतोविषयितात्रिशेषस्यैवानुगत व्यवहारादुभयसाधारणत्वमङ्गीकृत्यकारणतावच्छेदकत्वं वाच्यं, तद्वदिहापि विषयितात्रिशेषस्यैव प्रवृत्तिप्रयोजकतावच्छेदकत्वं लिङादिपदशक्यतावच्छेदकत्वञ्च ।

यदितु निरुक्तविषयितात्रिशेषस्येच्छात्वव्याप्यत्वमेवेत्याग्रहस्तदा वैदिकलिङादिनिष्ठव्यापारस्यापीच्छारूपत्वे न काचित्क्षतिः । गुणे गुणानङ्गीकारस्य निर्युक्तिकत्वेनाश्रद्धेयत्वात् . श्रद्धेयत्वेपिवा शब्दस्य द्रव्यत्वोपपत्तेः जीवातिरिक्तेश्वरेनित्येच्छांगीकाकारवद्वैदिकशब्देपि नित्येच्छांगीकारे बाधकाभावात् ।

यदितु इच्छात्वस्यात्मनिष्ठत्वव्याप्यत्वमेवेत्याग्रहस्तदा लिङादिवैदिकशब्दे श्रौतात्मशब्दप्रयोगाभावेनेश्वरइवात्मत्वांगीकारे मानाभावादुपनिषदादिप्रमाणगम्यमीश्वरमप्यंगीकृत्य तदिच्छैव तत्तदाकारिका वेदे लिङाद्यर्थस्तात्पर्यरूपाच । वेदस्थलिङादिप्रेरितोहं यज इत्यादिव्यवहारस्तु तादृशेच्छाया लिङादिबोध्यत्वादिति सर्वथानेष्टसाधनत्वादिकं विध्यर्थः ।

वस्तुतस्तु इच्छात्वं जातिरेव लिङादिशक्यतावच्छेदिका लाघवात् । विशेषलाभः पूर्ववत् । वेदेत्वलौकिकप्रेरणायां लक्षणा अन्यत्सर्वं पूर्ववदित्यपि वक्तुं शक्यं । एवञ्चैत्रोनपचेन्नकळञ्जंभक्षयेत् इत्यादौनञ्समभिव्याहृतलिङादिस्थलेपि नतावत् बलवदनिष्टाननुबंधित्वंलिङर्थः - तदभावोनञाबोध्यतइतिपक्षस्सुवचः पूर्वमेवनिरस्तत्वात् । नाप्यनिष्टसाधनत्वे लिङोलक्षणानञ्पदंतात्पर्यग्राहकमिति न वीनतार्किकमतंयुक्तं ज्योतिष्टोमेन नं यजेतेति लौकिकवाक्यस्य प्रामाण्यापत्तेः । श्रुत्या स्वर्गसाधनत्वावगमेपि तात्कालिकानिष्टसाधनत्वस्य यागेबाधाभावात् । नहि नराकादिरूपकालांतरभाव्यनिष्टजनकत्वमेव निषेधार्थ इत्यत्र प्रमाणमस्ति। अग्निं न स्पृशेदित्यादि लौकिकवाक्ये व्यभिचारात् । "नातिरात्रे षोडशिनंगृह्णाती" त्यादि उभयथापि व्याभचाराच्च । ....

यदिहि तात्कालिकानिष्टसाधनत्वं तत्र निषेधार्थस्तदा तस्य प्रमाणांतरसिद्धानुवादकत्वेपि "अतिरात्रे षोडशिनंगृह्णाती" त्यनेनेष्टसाधनत्वस्यैवोधात्क्रत्वंगतयानित्यवत्करणापत्तिः । अथ तत्रवैयर्थ्यभियाक्रतुगतंवैगुण्यरूपानिष्ट साधनत्वमेव नानृतंवदेदितिवत्तदर्थस्तदैकस्यैव क्रतुसाद्गुण्यतद्वैगुण्यजनकत्वंविरोधः । अथविरोधपरिहारार्थं वैगुण्यापेक्षयासाद्गुण्याधिक्यंकल्प्येत तदातात्कालिकानिष्टसाधनत्वबद्वैगुण्यस्यापि नांतरीयकत्वापत्तेर्नित्यवत्करणापत्तिः. असंमते तुवक्ष्यमाणरीत्या प्रवृत्त्यभावप्रयोजकप्रवृत्तिसामग्रीविघटनाय षोडशिग्रहणाभावेपीतरङ्गैरेवक्रतुमहोपकारसिद्ध्यनुमितेरेव तत्र संसर्गघटकतयोक्तविधानुमित्या प्रवृत्त्यभावोपपत्तौ तत्रानिष्टसाधनत्वाननुमानात् । अतएवविध्युत्तरनिषेधेसर्वत्रविधिप्रमितेष्टसाधनत्वाभावस्यैव बोधनाद्वयर्थेवैदिकत्वे प्रयोगभेदेन प्रामाण्योपपत्तावपि श्रौतविधिविरोधे लौकिकवाक्यस्याप्रामाण्यं नानुपपन्नं । ....

एतेनेष्टोत्पत्तिनांतरीयकदुःखाधिकदुःखाजनकत्वमेव शक्तयोर्लक्षणयावा नञ्समभिव्याहारेलिङार्थः । तदभावस्तादृशदुःखजनकत्वरूपो बलवदनिष्टानुबंधित्वं नञर्थः । तस्यच धात्वर्थेन्वयः । नातोलौकिकवाक्यस्यप्रामाण्यापत्तिर्निर्मूलत्वादित्यपास्तं "नातिरात्रेषोडशिनंगृह्णाती" त्यादावपि तदापत्तेः ।

किञ्चैतेषु सर्वेष्वपि पक्षेषु रागिणः कळञ्जंभक्षणवर्तमानतावेळायाम्

चैत्रः कीदृश इति प्रश्ने इष्टोत्पत्तिनांतरीयकदुःखाधिकदुःखजनक कळञ्जभक्षणानुकूलकृतिमानित्युत्तरवन्नकळञ्जंभक्षये दित्युत्तरवक्तुरसंबद्धप्रलापित्वानापत्तिः । श्येनवर्तमानतादृशायांच श्येनेन नयजेतेत्युत्तरापत्तिः । अस्मन्मते तु वक्ष्यमाणरीत्या लिङर्थस्येच्छायाः स्वज्ञानविशेषजन्यानुमितिसंपादित प्रवृत्तिसामग्र्यभावकालीनाभावप्रतियोगित्वसंबंधेनाख्यातार्थे कृतावन्वयान्नतदापत्तिरिति वैषम्यं किञ्च चैत्रः कीदृशइति प्रश्नस्य नैवेदमुत्तरं प्रथमांतमुख्यविशेष्यकत्वाभावात् । कीदृशी कृतिरित्यस्यापि नोत्तरं लिंगधर्मितावच्छेदकप्रश्ने तदनालिंगितोत्तरस्यासंबद्धत्वात् । अतएव कीदृशी कृतिरिति प्रश्नस्यापि चैत्रः पचति नपचतीत्यादिनैवोत्तरं लिंगानालिंगतत्वात् । अतएव कृतिमुख्यविशेष्यकत्वमेवभट्टसम्मतं. प्रथमांतमुख्यविशेष्यकत्वे तादृशोत्तरस्यासंबद्धत्वापत्तेः. अतोनञसमभिव्याहारस्थले प्रवर्तनावन्निवर्तनापि निवृत्तिप्रयोजकतया अभ्युपेया । आचार्योपदेशादहं निवृत्तो नस्वतो नवान्योपदेशादिति व्यवहारदर्शनात् । निवर्तनात्वञ्च प्राचांमते प्रवर्तनात्ववदेव निवृत्तिजनकव्यापारत्वादिरूपं भिन्नम् बोध्यं । तदवच्छिन्नञ्च लोके इच्छा वेदेचालौकिकोधर्मइत्यादि सर्वं पूर्ववत् । शाक्तावच्छेदकञ्च तस्यानञ्पदत्वं. प्रवर्तनावाचकंच लिङादिपदं तात्पर्यग्राहकं इतरथा नपचति चैत्रइत्यादौ नञ्पदादत्यंताभावस्यैव बोधात् । लिङावा निवर्तनोच्यते नञ्पदं तुप्रवृत्त्यभावानुवादकं सत्तात्पर्यग्राहकमित्यादि प्राचीनमतंकौस्तुभएव व्यक्तं ।

वस्तुतस्तु अनेकशक्तिकल्पनापत्तेर्नप्रवर्तनानिवर्तनयोः प्रथक्छक्तिःनप्रवृत्त्यभावनिवृत्त्योर्वाभेदः, प्रमाणाभावाद्गौरवाच्च । अपितु आख्यातस्य कृतावेव. नञोऽभावएव । लिङादेः प्रवर्तनानिवर्तनासाधारणव्यापारादावेव । शक्यतावच्छेदकञ्च पूर्ववदतिप्रसक्तमनतिप्रसक्तंवा प्रवर्तनानिवर्तनासाधारणमेकमेव ।

यदितु प्रवर्तनानिवर्तनासाधारण्येन नैकाविषयितेत्याग्रहः तदास्तु निवृत्तिविषयत्वावच्छिन्ने लिङादेर्लक्षणा नञ्पदं तात्पर्यग्राहकमिति, तस्यचालिङर्थस्य स्वविषयज्ञानविशेषजन्यानुमिति प्रयोज्याभाव प्रतियोगित्वसंसर्गेणाख्यातार्थे कृतावेवान्वयः, नञ्पदञ्च संसर्गविशेषेपितात्पर्यग्राहकं, अतोनिरुक्तसंसर्गेण व्यापारवती कळञ्जभक्षणकरणिकाकृतिरिति शाब्दबोधे वृत्ते संसर्गस्यत -

त्वेन भानंपूर्ववत् । अत्रहि निवारणाविषयकज्ञानात्कळञ्जभक्षणेयं निवर्ततामित्याकारकात्तेच्छाविषयीभूताभाव प्रतियोगिकृतिविषयत्वरूपहेतुज्ञानं, तेन कळञ्जभक्षणे अनिष्टसाधनत्वानुमितिर्जायते. एवं " नातिरात्रेषोडशिनंगृह्णाती " त्यादौविहितनिषेधे तादृशोक्तविधहेतुज्ञानाच्छोडशिग्रहणे अतिरात्रानुपकारकत्वानुमितिद्वारा तद्व्यतिरेकेणैवेतरांगैः कृतूपकारसिद्धेरप्यनुमानं, उक्तानुमितेश्च प्रवृत्तिसामग्रीविघटकतया प्रवृत्यभावप्रयोजकत्वं । तथाहि यत्रानिष्टसाधनत्वानुमितिस्तत्र प्राचीनकर्मवशाद्वेषगतबलवत्त्वेसति बलवदनिष्टानुबंधित्वज्ञानरूपप्रतिबंधकसंपादनात्तदभावघटितसामग्रीविघटनं. यत्रतु इष्टसाधनत्वाभावानुमितिस्तत्रतया पूर्वावगतेष्टसाधनताज्ञाने प्रयोगविशेषावच्छेदेन अप्रामाण्यज्ञानात्तदभावरूपप्रवृत्तिसामग्रीविघटनं ।

यद्यपि चोभयत्रापि प्रतिबंधकसंसर्गाभावस्यात्यंताभावादिरूपस्य नित्यतया नानुमितिनाश्यत्वं तथापि प्रतियोगिसत्त्वस्याभावसंबंधनाशकत्वादभावीयविशेषणतासंबंधरूपस्य कारणतावच्छेदकसंबंधस्य प्रतियोगिसत्त्वे नाशात्तस्याः प्रवृत्तिसामग्रीविघटकत्वं सुलभमेव । अतश्चलिङर्थस्य स्वविषयकज्ञानविशेषजन्यानुमिति जन्यस्वनिरूपितकारणातावच्छेदकी भूतसंबंधनाशकालीनाभावप्रतियोगित्वसंसर्गेणाख्यातार्थकृतावन्वयइति फलितोर्थः । प्रथमस्वपदं लिङर्थपरं । द्वितीयस्वपदं प्रवृत्तिपरं । अत्रच दैववशसंपन्नप्रवृत्तिसामग्र्यत्यंताभावकालीनप्रवृत्त्यभावदशायां नकळञ्जं भक्षयेदि तिप्रयोगापत्तिवारणाय उक्तसंबंधनाशकालीनेति । यत्र कळञ्जभक्षणमनिष्टसाधनमिति वाक्यादनिष्टसाधनत्वादिशाब्दबोधस्तत्र तज्जन्यसंबंधनाशकालीनाभावदशाया मुक्तप्रयोगापत्तिवारणायानुमितिजन्येति नाशविशेषणं । अनिष्टान्वयव्यतिरेकानुविधायित्वादिहेत्वंतरज्ञानजन्यानिष्टसाधनत्वानुमिति जन्यसंबंधनाशकालीनप्रवृत्त्यभावदशायां तादृशप्रयोगापत्तिवारणाय स्वविषयकेत्यादि. अत्र निरुक्तसंबंधेन निवारणाप्रयोज्याभाववर्तमानतादशायां तादृशप्रयोगापत्तिरतस्वविषयकज्ञानमपि स्वध्वंसासमानकालीनस्वज्ञानोपजेयमेव विशिष्यतत्तद्व्यक्तित्वेन प्रविष्टमिति ज्ञापनाय विशेषपदं. अत्र प्रथमस्वपदं प्रवृत्तिकारणतावच्छेदकीभूततत्तत्संबंधव्यक्तिपरं. द्वितीयस्वपदन्तु पूर्ववल्लिङादितत्तद्व्यक्तिपरं. तेन निरुक्तसंबंधध्वंसा-

समानकालीनलिङादिज्ञानोपधेय हेतुज्ञानजन्यानुमितिजन्येत्यादिः फलितोर्थः । एवञ्चानुमितित्वस्य विशिष्याप्रवेशेपि नक्षतिः. तत्सिद्धं निवारणरूपस्य लिङर्थस्यानेन संबंधेनाख्यातार्थकृतावन्वयइति, नन्वदंतु स्वार्थस्याभात्स्य प्रतियोगितासंसर्गेणाख्यातार्थकृतावन्वयानुवादकं सलिङाद्यर्थतात्पर्यग्राहकमिति सर्वमनाकुलं. तत्सिद्धंप्रवर्तनाप्रेरणाप्रेष्यव्यापारपर्याया भावना नञ्रहितवाक्येलिङाद्यर्थः । सैवच शब्दनिष्ठत्वाद्वेदे शाब्दीभावनेत्युच्यते । तत्तच्छक्ततावच्छेदकंतु लिङ्त्वं लोट्त्वञ्च, नतुतव्यत्वादिकमपि, तेषां " प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चेति ,, स्मृत्या प्रैषाद्यर्थकत्वेन विध्यर्थकत्वास्मृतेः. प्रमाणांतरप्रमितेर्थे पुरुषनिष्ठापुरुषप्रवर्तना प्रैषः. अतिसर्गः कामचारः. " स्वाध्यायोध्येतव्य " इत्यादौतु अप्राप्तार्थत्वात्प्रैषबाधेन विधौलक्षणेति सांप्रदायिकाः । लिङाद्यादेशत्वंवा शक्ततावच्छेदकं, श्रूयमाणत्वात्. अस्याश्च शाब्दभावनायाः अर्थभावनावदेवांशत्रयमिति व्यवहरंति. तत्र प्रवृत्तिनिवृत्त्योर्यथाक्रमं विधिनिषेध प्रयोज्यत्वात्पुरुषार्थानुबंधित्वाच्च भाव्यत्वं. लिङादिजन्यविधिनिषेधज्ञानञ्च भाव्यप्रयोजकत्वात्करणं. अस्यच करणत्वेनव्यवहारमात्रं, नतु तस्य शाब्दबोधे करणत्वेनान्वयः, अशाब्दत्वात् एवं प्राशस्त्याप्राशस्त्यज्ञानं यथाक्रमं विधिनिषेधयोरितिकर्तव्यता, तदपि वस्तुतएव, नतु शाब्दबोधेन्वयोऽशाब्दत्वादेव. तेच प्राशस्त्याप्राशस्त्ये तत्तद्विधिनिषेधसन्निधिपठितार्थवादैर्लक्षणया प्रतिपाद्येते ।

ननु किमिदं प्राशस्त्यंअप्राशस्त्यंवा. नतावद्गुणवत्त्वंदोषवत्त्वंवा. गुणदोषत्वयोरेवानिर्वक्तुमशक्यत्वात्. नहि " वायुर्वैक्षेपिष्ठादेवता ,, " अपशवोवा अन्येगोअश्वेभ्य ,, इत्यादौ वायुक्षेपिष्ठत्वादिकं गुणः । अपशुत्वं गवाश्वरातप्राशस्त्याभावावत्त्वंवादोषः । तज्ज्ञानस्य प्रवृत्तित्वंवाच्छिन्नंप्रति व्यभिचारित्वेनानुपयोगित्वात् क्षेपिष्ठत्वादेः शक्त्यैवोपस्थितत्वेन लाक्षणिकत्वासिद्धांतभङ्गापत्तेश्च. नापि स्वर्गनरकादिजनकत्वे. स्वर्गादिपदसमभिव्याहारादेव तात्सिद्धावर्थवादत्वैयर्थ्यापत्तेरिति-चेत् । क्रियाजन्यदुःखापेक्षया अधिकेष्टसाधनत्वं प्रशस्तत्वं. तज्जन्यसुखापेक्षया अधिकानिष्टजनकत्वमप्रशस्तत्वमित्येवंविधयोस्तयोरुपपत्तेः. नह्ययमर्थोन्यतस्सिद्धः विधिना इष्टानिष्टसाधनत्वमात्रस्यैवाक्षेपात्. अतएव यत्र नार्थवादः पठितस्तत्रविधिना तदाक्षिप्यतएव. नचैवंविधतज्ज्ञानस्य प्रवृत्तिनिवृत्त्योरनुपयोगः एवंवि-

धज्ञानाभावेपि प्राचीनकर्मवशेन तात्कालिकसुखदुःखयोरुत्कटरागद्वेषसत्त्वे प्रवृत्तिनिवृत्त्योरुदयसत्त्वात्, एवंविधज्ञानसत्त्वेपिच प्राचीनकर्मवशेनैव प्रवृत्तिनिवृत्त्योरनुदयाच्चेतिवाच्यं । तथावेष्येवंविधज्ञानसत्त्वेक्रियाजन्यतात्कालिकसुखदुःखापेक्षया अधिकेष्टप्रायशो लोके वेदेवा सर्वेषां पुरुषाणामुत्कटरागदर्शनेन तात्कालिकसुखापेक्षयाऽधिके दुखे उत्कटद्वेषदर्शनेनच तज्ज्ञानस्यरुच्यरुच्यात्मकोत्कटरागद्वेषोपयोगित्वस्य सर्वसिद्धत्वात् । क्वचिदेवतु प्राचीनकर्मणऔत्कट्ये तत्सत्त्वेपि तदभावो नतु सर्वत्र, अत उत्कटप्राचीनकर्माभावे उक्तविधप्राशस्त्याप्राशस्त्यज्ञानस्य उत्कटरागद्वेषजनकत्वात्तद्वारा प्रवृत्तिनिवृत्त्योरुपयोगः । नचैवं यस्य स्वत एव रुच्य रुची तंप्रतिप्राशस्त्याप्राशस्त्यज्ञानस्यानुपयोगेन सर्वान् पुरुषान्प्रत्यनुपयोगइति वाच्यं । सर्वपुरुषान्प्रत्यनुपयोगेपि पुरुषविशेषंप्रत्युपयोगेनैवार्थवादप्रामाण्योपपत्तेः । स्वतस्सिद्धस्मरणवतोमंत्रजन्यस्मरणस्यानुपयोगेपि मंत्राम्नानवशेन तज्जन्यस्मरणस्याभ्युदयकारित्वकल्पनवदर्थवादाम्नानबलेन तद्बोधितप्राशस्त्यस्याभ्युदयकारित्वकल्पनयोपपत्तेश्च । एवंविधप्राशस्त्यादेश्च लक्षणयैवार्थवादैः प्रतिपादनात् लाक्षणिकत्वसिद्धांतस्यापि न भंगः । साच वाक्यलक्षणायां बाधकाभावादर्थवादस्थपदसमुदाये एकस्मिन्नेववा पदे लक्षणा । इतरपदानि तात्पर्यग्राहकाणीत्यन्यदेतत् । तच्च प्राशस्त्यमप्राशस्त्यंवा इतिकर्तव्यतात्वसंबंधेन शाब्दभावनायामन्वेतीति बहवः । स्वरूपसंबंधेन धात्वर्थादावेवान्वेतीतिकेचित् । ....

वस्तुतस्तु वक्ष्यमाणरीत्याऽन्यसुखंतार्थवदेककार्यकारणभावकल्पनालाघवानुरोधेन प्राशस्त्यस्य स्वविषयकज्ञानजन्येष्टविषयकोत्कटरागजन्यत्वसंबंधेन प्रवृत्तौ, अप्राशस्त्यस्यच स्वविषयकज्ञानजन्यानिष्टविषयकोत्कटद्वेषप्रयोज्याभावप्रतियोगित्वसंबंधेन प्रवृत्तावेवान्वयः । नचैवं प्रधानार्थवादेनैव क्रियाजन्यतात्कालिकदुःखापेक्षया स्वफले आधिक्यसिद्धौ अंगार्थवादवैयर्थ्यं, प्रधानजन्यफलापेक्षयांगजन्यफलस्य भेदाभावात्, क्रतूपकारेचाधिक्यासंभवादितिवाच्यं । तत्तदंगजन्यतात्कालिकदुःखकूटापेक्षया प्रधानफले आधिक्यबोधनार्थत्वात् । अतोविध्यर्थवादेषु प्रकृष्टफलकत्वरूपप्राशस्त्यलक्षणा । निंदार्थवादेषुच प्रकृष्टदुःखजनकत्वरूपाप्राशस्त्यलक्षणेति मूलग्रन्थान्नीतःपन्थाः । ....

वस्तुतस्तु अभ्यनुज्ञाविध्यर्थवादेषु " नातिरात्रेषोडशिनंगृह्णातीत्यादि " निषेधार्थवादेषुच नैवंविधप्राशस्त्याप्राशस्त्यलक्षणासंभवः । नहि " हुतायां वपायां दीक्षितस्यान्नमश्नीया"दित्यत्र क्रियाजन्यानिष्टापेक्षयातृप्तयाख्यस्यफलस्याधिक्यंबोधयितुंशक्यं । निषेधप्रमितानिष्टस्याधिक्यावश्यंभावात् । क्रियाजन्यतात्कालिकदुःखापेक्षया आधिक्यस्य लोकसिद्धत्वेन निषेधसत्त्वे तज्ज्ञानस्य प्रवृत्त्यनुपयोगित्वात् । षोडशिग्रहणजन्यसुखापेक्षया तज्जन्यदुःखस्याधिक्यं नैवसंभावयितुंशक्यम् ।

अपिच श्येनार्थवादे श्येनजन्यतात्कालिकदुःखापेक्षया यद्यभिचाराधिक्यं बोध्यते तदा तज्ज्ञानस्य नैवप्रवृत्त्युपयोगित्वं । श्येनप्रयोज्यनरकादिदुःखापेक्षया आधिक्यंतु नैवबोधयितुंशक्यं । नहिंस्यादिति निषेधार्थवादेन तस्याभिचारापेक्षया आधिक्यबोधनाच्च । अतोविध्यर्थवादेषु विधेयतावच्छेदकसामानाधिकरण्येनबलवदनिष्टाननुबंधित्वरूपं प्राशस्त्यं लक्ष्यते । निषेदार्थवादेषुच निषेध्यतावच्छेदकसामानाधिकरण्येन बलवदनिष्टानुबंधित्वरूपमप्राशस्त्यं । अत्रानिष्टेबलवत्त्वमुत्कटद्वेषविषयत्वं, नत्वाधिक्यं. स्वर्गन्यूनेपि तात्कालिकदुःखे प्राचीनकर्मवशेन कदाचिदुत्कटद्वेषोदयात् , अतएवनैवतदायागादौप्रवर्तते । नरकन्यूनेपिच तात्कालिकसुखेप्राचीनकर्मवशेनोत्कटरागोदयाच्च, अतएवाभिचारादौ प्रवर्तते । अतएवयागादौकदाचित्प्राचीनशुभकर्मवशाद्बलवदनिष्टाननुबंधित्वं,नतुसर्वदा । अतएव विधेयतावच्छेदकसामानाधिकरण्येनेत्यनेन तस्य कालिकाव्याप्यवृत्तित्वं विवक्षितं । एवं"नकळञ्जंभक्षये"दित्यादौ कदाचिदेव शुभकर्मवशाद्बलवदनिष्टानुबंधित्वज्ञानम् । अत स्तत्रापिकालिकाव्याप्यवृत्तित्वसिद्ध्यर्थं निषेध्यतावच्छेदकेत्यादि । एतादृशाव्याप्यवृत्तित्वज्ञापनार्थमेव कौस्तुभादौयोग्यतापदं । एवंविधबलवदनिष्टाननुबंधित्वज्ञानस्यच येन पुरुषेण यागे सर्वदैव बलवदनिष्टानुबंधित्वं बुद्धं तं प्रति तद्वृत्तिज्ञाने अप्रामाण्यज्ञानादिसंपादकतयो पयोगः । येनच कळञ्जभक्षणे बलवदनिष्टाननुबंधित्वं सर्वदैव बुद्धं तं प्रति तद्वृत्तिज्ञानेऽप्रामाण्यज्ञानसंपादकतया एवंविधबलवदनिष्टानुबंधित्वज्ञानस्योपयोगः, अवच्छेदकावच्छेदेन तद्वृत्ताबुद्धि प्रति सामानाधिकरण्येन तदभाववत्तानिश्चयस्य विरोधित्वात्, अतश्चैतादृशप्राशस्त्यज्ञानस्य सामग्रीसंपादनद्वारा प्रवृत्तावुपयोगः, तादृशप्राशस्त्यज्ञानस्यच प्रवृत्तिसामग्रीविघटनद्वारा निवृत्तावुपयोगः. संभवतिचेदमभ्यनु-

ज्ञाविध्यर्थवादे, वपाहोमोत्तरदीक्षितान्नभोजनस्य निषेधप्रयुक्तानिष्टाननुबंधित्व-ज्ञापनात् ।

नच तस्य दोषाभावरूपस्य विधिनैवाक्षेपात्कृतमर्थवादेनेति वाच्यं । तेन तदाक्षेपेपि सामानाधिकरण्येन बलवदनिष्टाननुबंधित्वस्यार्थवादेन बोधनोपपत्तेः. एवं षोडशिग्रहणनिषेधार्थवादेपि ग्रहणजन्ये तात्कालिके स्वल्पेपि दुःखे सामानाधिकरण्येनोत्कटद्वेषविषयत्वाख्यं बलवत्त्वं बोध्यतइति नकाचिदनुपपत्तिः । अतएवंविधे स्तुतिनिंदे क्वचित् " वायुर्वैक्षेपिष्ठे " त्यादावर्थवादपदैः स्वशक्यार्थज्ञानजन्यशाब्दबोधविषयीभूतवाक्यार्थसंबंधादेव लक्ष्येते । सच वाक्यार्थः क्षेपिष्ठत्वादिगुणको वायुस्त्वदेवताकर्मजन्यं फलं शीघ्रं प्रयच्छतीत्येवंरूपः । अत्रहि सएवेत्यत्रैवकारस्यवैयर्थ्यपरिहारार्थं गमयत्येवेत्येवंयोजना । ततश्च तेनौदासीन्यस्यापि व्युदासाद्दाने शीघ्रत्वादिप्रतीतिः, एतादृशवाक्यार्थशाब्दबोधश्च तात्पर्यविषयीभूतएव जन्यते । गंगापदेन प्रवाहोपस्थितिवत् । फलगतशैघ्र्यज्ञानस्यच प्रायशः फले रागोत्कर्षजनकत्वदर्शनात्तत्संबंधसत्त्वेन स्तुतिलक्षणासिद्धिः । एवमन्यत्राप्यूह्यम् । यत्रत्वयोग्यतानिश्चयसत्त्वे नैतादृशशाब्दबोधः, यथा " यजमानःप्रस्तर " इत्यादौ,अभेदान्वयस्यबाधितत्वात् , तत्र यजमानपदं यजमानकार्यकारित्वसमानजातीय कार्यकारित्वरूपगुणयोगेन प्रस्तरे गौणमंगीकृत्य यजमानःप्रस्तरइति वाक्यजन्यशाब्दबोधोत्तरं स्वकार्यकर्तृत्वरूपवाक्यार्थसंबंधात्तेन वाक्येन बलवदनिष्टाननुबंधित्वरूपस्तुतिलक्षणा ॥

नच यजमानपदे गौणीमनंगीकृत्यैव बलवदनिष्टाननुबंधित्वलक्षणामंगीकृत्य तस्य प्रस्तरे न्वयः किं न स्यादिति वाच्यं । यजमानपदस्य प्रस्तरवृत्तिनिरुक्तस्तुतिलक्षणायां शक्यसंबंधाभावात् । अस्मन्मते सुबंतयोःपरस्परसंबंधाभावेन प्रस्तरेऽन्वयानुपपत्तेश्च ॥

नचैवं तात्पर्यविषयीभूतशाब्दबोधदशायां गौण्या वृत्त्या उक्तस्य स्वकार्यकारित्वविशिष्टस्याप्यभेदसंबन्धेन प्रस्तरेन्वयानापत्तिः; अध्याहृतास्त्याख्यातार्थएवोभयोरन्वयेन परंपरान्वयस्य पार्ष्ठिकत्वात् । तस्मादध्याहृतास्त्याख्यात पदेनवाक्येन शाब्दबोधे जनिते पश्चात्तल्लक्षितप्राशस्त्यस्य विधावन्वयः ॥

नचैवं पश्चादपि यजमानपदेनैव प्राशस्त्यवन्तं लक्षयित्वा तस्य पार्ष्ठि

कान्वयलभ्यपरस्परसंबंधांगीकारेणाध्याहृताख्यातार्थ एव उभयान्वयोभवतु । पूर्वमेव यजमानपदे गौणीगर्भा स्तुतिलक्षणामंगीकृत्य तदन्वयोपपत्तेः । एक एवत्रा शाब्दबोधोस्तु, कृतं विध्यन्वयेन. वाक्यैकवाक्यतयैव तदाकांक्षितपूरणोपपत्तेरिति वाच्यम् । वाक्ये लक्षणामङ्गीकृत्यैकवाक्यत्वे संभवति वाक्यभेदस्या न्याय्यत्वात् ॥

नचास्मदुक्तरीत्या ध्याहृताख्यातार्थान्वयेपि पश्यमृगोधावतीतिवदेकाख्यातार्थस्य विध्याख्यातार्थे प्रकारतयान्वयेनाप्येकवाक्यतोपपत्तिः । आख्याताख्यातार्थस्य मुख्यविशेष्यत्वव्युत्पत्तिभङ्गभयेन " स्योनन्त " इतिवदाख्यातद्वयसत्त्वे भिन्नवाक्यत्वस्यैवापातात् । अन्यथा । प्रयाजाद्यङ्गभावनायाअपि इतिकर्तव्यतात्वेन प्रधानभावनान्वयापत्तेस्सर्वस्याप्येकवाक्यतापत्तिः । " पश्यमृगोधावती " त्यादौतु पश्येत्यस्य कर्मान्वयंविना शाब्दबोधाजनकत्वाद्युक्तो धावनभावनायाः कर्मत्वेन तस्यामन्वयः । नहिकर्मान्वयं विना शाब्दबोधापर्यवसानवदितरकारकान्वयं विना तदपर्यवसानं । वाक्यमात्रस्य साकांक्षत्वापत्तेः । तस्मा यजमानपदमात्रे प्राशस्त्यलक्षणामङ्गीकृत्याध्याहृताख्यातार्थेऽन्वयांगीकारे वाक्यभेदापत्तेर्वाक्ये लक्षणांगीकरणम् ।

वस्तुतस्तु आख्यातद्वयसत्त्वेवाक्यभेदस्यादोषत्वेन वाक्य लक्षणायां प्रमाणाभावः । तेन "यजमानः प्रस्तर इत्यादौ वाक्यैकवाक्यत्वेपि न काचि क्षतिः ।

नचैवं "जर्तिलयवाग्वाजुहुया,, दित्यादावपि प्राशस्त्यलक्षणया पयोहोमविध्येकवाक्यतानापत्तेर्भिन्नवाक्यतापत्तिः । तत्र वाशब्देनैकवाक्यत्वप्रतीतिः । "एकं ब्रणीत,, इत्यादावपि विधायकतया भिन्नवाक्यत्वस्य विकल्पापादकतयानुपपत्तेः अगत्या वाक्ये प्राशस्त्यलक्षणयाप्येकवाक्यत्वांगीकरणम् । नहि तत्र "यजमानःप्रस्तर,, इतित्रदैकस्मिन्पदे लक्षणामङ्गीकृत्य लक्षितप्राशस्त्यस्योत्तरपदार्थेन्वयः संभवति । अतस्तत्र वाक्यएव लक्षणा । तेन यत्रैकस्मिन्पदे प्राशस्त्यलक्षणामङ्गीकृत्य तस्येतरपदार्थेन्वयमङ्गीकृत्य वाक्यार्थपर्यवसानं, तत्रार्थवादविध्योर्वाक्यैकवाक्यता . यत्रतु नतथा तत्र सर्वत्र वाक्यएव प्राशस्त्यलक्षणामंगीकृत्य पदार्थविधयोपस्थितस्य विध्याख्यातार्थ एवान्वयाद्विध्यर्थवादयोः प

दैकवाक्यतैवेति युक्तमुत्पश्यामः । तत्सिद्धं लिङादिवाच्या शाब्दीभावना प्राशस्त्यज्ञानाद्यनुगृहीता इष्टसाधनत्वाद्याक्षेपमुखेन मुख्यविशेष्यभूतायामाख्यातार्थकृतावन्वेतीति । विधिवादस्समाप्तः ॥

श्रीः ॥

नन्वाख्यातार्थस्य कृतेर्मुख्यविशेष्यत्वे मानाभावः . तथाहि-तिङुपात्तैकत्वादिसंख्यातावदन्याविशेषणीभूतप्रथमान्तपदोपस्थाप्ये चैत्रादावाश्रयतासंबंधेनान्वेतीति तावदविवादम् . सच चैत्र ओदनं पचतीत्यत्र कर्त्राख्याते चैत्रः . ओदनः पच्यते चैत्रेणेत्यत्र कर्माख्याते चौदनः . तस्यैवान्याविशेषणत्वात् . इतरस्य कर्मत्वादिविशेषणत्वात् । अत्रच चैत्रइव गच्छति मैत्रइत्यादौ चैत्रे प्रथमांतपदोपस्थाप्येपि न तिङुपात्तसंख्यान्वयः . तस्य इवशब्दार्थे सादृश्ये प्रतियोगितात्वसंसर्गेण विशेषणत्वात् , अपितु मैत्रएव. अतएव चैत्रइव मुखम् चन्द्रश्च भासत इत्यत्रोभयत्र संख्यान्वयः. उभयोरप्यन्याविशेषणीभूतपदोपस्थाप्यत्वात् । भावाख्यातेधात्वर्थस्यान्याविशेषणत्वात्तत्र संख्यान्वयवारणार्थं प्रथमांतेति ॥

अतश्च तद्वदेवाख्यातोपात्तार्थभावनाया अपि तस्मिन्नेवाश्रयतासंबंधेनान्वयः . नतु तस्य मुख्यविशेष्यत्वम् . कालादिव्यतिरिक्ताख्यातार्थप्रकारकबुद्धित्वावच्छिन्नं प्रति उक्तविधप्रथमान्तपदजन्योपस्थितिः कारणमित्येककार्यकारणभावकल्पनेलाघवादिति चेत् . उक्तप्रथमान्तार्थस्यैवाधेयतासंबंधेन कृतावन्वयस्य कालादिवत्संभवेन तादृशकार्यकारणभावकल्पनएव नियामकाभावात् , नह्याख्यातार्थभावनायाः प्रथमान्तार्थं प्रति प्रकारत्वेनैवान्वयबोध इत्यत्र नियामकं किंचिदस्ति । जैमिनिपाणिन्याद्यनुभवविरुद्धानुभवस्य शपथनिर्णेयत्वात् । "तद्भूतानां क्रियार्थेन समाम्नायः" (१—१—२५) इति जैमिनिना क्रियामुख्यविशेष्यकानुभवस्योक्तत्वात् , नचैवं गौतमानुभवोप्यस्ति ॥

किञ्च संख्याया अपि तिङुपात्ताया नैव नामार्थे चैत्रादावन्वयः; तस्य प्रथमोक्तत्वसंख्याविरोधात् ॥

नच तस्यास्साधुत्वार्थत्वान्नाविरोधकत्वम् । एकपदोपात्तत्वप्रत्यासत्त्या झटित्युपस्थितस्य तस्यान्वयेन विलंबोपस्थितायास्तिङुपात्ताया एव साधुत्वार्थकत्वौचित्यात् ॥

नचैवं चैत्रो मैत्रश्च गच्छत इत्यत्र द्वित्वान्वयानुभवानापत्तिः । द्वित्वा न्वयानुभववत् सुपा प्रत्येकैकत्वान्वयानुभवस्याप्यपह्नोतु मशक्यतयाऽवश्यमेक स्यानुभवस्याशाब्दत्वे वाच्ये पदान्तरोपात्तद्वित्वस्यैव तदौचित्यात् ॥

वस्तुतस्तु तिङो लाघवानुरोधेन कृतौ शक्तावपि वक्ष्यमाणरीत्या क त्रादेर्निरूढलक्षणया भानस्यावश्यकत्वात्तत्र चैकपदोपात्तत्वप्रत्यासत्त्या संख्या याअन्वयेन न कुत्रापि तस्याः प्रथमान्तेन्वयः । अतश्च "एकपदोपात्तानामेक विशेष्यकत्वमौत्सर्गिक,, मिति न्यायेन एककार्यकारणभावकल्पनालाघवानुरोधे नच यदि संख्याविशेष्ये भावनान्वय इत्याग्रहः, तदास्त्वाख्यातलक्ष्यएव क त्रादावुभयान्वयः । नतु प्रथमान्तपदोपस्थाप्ये । यथा चैवं सति भावना यास्तं प्रति मुख्यविशेष्यत्वम् तथाग्रे निरूपयिष्यामः ॥

किंच भवन्मते कालाद्यतिरिक्ताख्यातार्थ निष्ठप्रकारतानिरूपित विशे ष्यतासंबंधेनाख्यातपदज्ञानजन्यशाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासंबंधेन प्र थमान्तनामपदजन्यान्याविशेषणीभूतार्थविशेष्यकोपस्थितित्वेन कारणतेत्येवम् का र्यकारणभावः पर्यवसन्नः, नचासौ संभवति. न पचति चैत्रः पचत्येव चैत्रः , पचत्यपि चैत्र इत्यादावाख्यातार्थभावनायाश्चैत्रएवान्वयप्रसङ्गेन नञर्थेभावे एव कारार्थान्ययोगव्यावृत्त्यैकदेशभेदे अपिशब्दार्थभूते समुच्चये वान्वयानापत्तेः । तत्र चैत्रे संख्यान्वयेन भावनाविशेष्ये संख्यान्वय इति नियमस्यापि व्यभिचारा पत्तेश्च । अतएव निपातासमभिव्याहृतत्वम् नाख्यातेत्यस्य विशेषणं । सं ख्यायाश्चैत्रेन्वयापत्तेः ॥

नचोक्तकार्यकारणभावे तेन विशेषणेपि निपातसमभिव्याहृतस्थले सं ख्याभावनयोः प्रथक्कार्यकारणभावमङ्गीकृत्य स्वस्वविशेष्येन्वयोपपत्तिः, अनेक कार्यकारणभावकल्पनापत्तेः ॥

अस्मन्मते त्वेककार्यकारणभावेनैव वक्ष्यमाणरीत्या सर्वेषांभावनान्वयेन भावनायामुख्यविशेष्यत्वात्तदनापत्तिः ॥

• किंच सर्वनिपातसाधारण्येनापि नैकरूप्यं । चैत्र एव पचति घटएवदृश्यत इत्यादौ निपातसमभिव्याहारेप्युभयोरपि संख्याभावनयोश्चैत्रान्वयप्रतीतेः । नच

क्रियासमभिव्याहृतस्थलएव संख्याभावनयोर्वैरूप्यम् नान्यत्रेति नियमोपि संभवति, पचति न चैत्रः, चैत्रो न पचतीत्यादावुभयथापि वैरूप्यात् ।

अतो भवन्मते कार्यकारणभावानन्त्याद्व्यभिचाराच्च न प्रथमान्तपदोपस्थाप्यस्य भावनाविशेष्यत्वम् ॥

अपिच ओदनम् पचतीत्यत्र प्रथमान्तपदाभावे कारणाभावादेव भावनाप्रकारकबोधानुपपत्तेरितरसामग्रीवशाद्भावनाया मुख्यविशेष्यत्वे बाधकाभावः ।

नचानुभवानुरोधेन भावनाप्रकारकबोधत्वावच्छिन्नम् प्रत्येवाख्यातपदज्ञानस्य कारणत्वं कल्पयित्वातादृशबोधार्थप्रथमान्तपदाध्याहार इति वाच्यम् अनुभवस्य शपथनिर्णेयत्वेन तत्कार्यकारणभावकल्पने गौरवात् ॥

नच तवापि पण्डितश्चैत्र इत्यादावाख्यातपदाभावे प्रथमान्तस्य मुख्यविशेष्यत्वापत्तिः । सुबर्थप्रकारकबोधत्वावच्छिन्नम् प्रत्येव सुब्ज्ञानस्य कारणत्वात् , वक्ष्यमाणरीत्या प्रथमाया अपि संख्यातिरिक्तार्थसद्भावाच्च । अनतिरिक्तत्वेपि प्रथमान्तनामपदोपस्थाप्यप्रकारकबोधत्वावच्छिन्नम् प्रति प्रथमान्तपदज्ञानस्य कारणत्वकल्पनेन तादृशस्थले आख्यातपदाध्याहारोपपत्तेः । न च विनिगमनाविरहः, " अस्तिर्भवतिपरः प्रथमपुरुषेऽप्रयुज्यमानोप्यस्तीति " स्मृत्यनुमतत्वेन तस्यादोषत्वाम् । तादृशानुशासनज्ञानाभावे निरुक्तबोधस्येष्टत्वाच्च ॥

किञ्च भावनाप्रकारकबोधत्वावच्छिन्नं प्रत्याख्यातपदज्ञानत्वेन कारणत्वे चैत्रेण सुप्यते, गगनेन स्थीयत इत्यादिभावाख्यातस्थले प्रथमान्तपदाध्याहारापत्तिः ॥

अथ तत्राख्यातार्थविशेष्यकबोधमेवांगीकृत्यकारणतावच्छेदके भावभिन्नत्वं निवेश्यते तदा तदपि गौरवम् । अस्मन्मतेतु सर्वत्र आख्यातार्थविशेष्यकत्वाद्भावाख्यातस्थलेच कर्तुरनभिधानेन प्रथमान्तस्याप्रसक्तिः ॥

किञ्च यदि अन्याविशेषणीभूतप्रथमान्ते भावनासंख्ययोरन्वयः , तदा चैत्रएव पचति घटएव दृश्यत इत्यादौ कुत्रभावनासंख्ययोरन्वयः कथं वा शाब्दबोधः । नतावच्चैत्रादौ, तस्यैवकारार्थभूतान्ययोगव्यावृत्त्येकदेशे भे

दे प्रतियोगिताकत्वसंसर्गेण विशेषणत्वात् । नाप्येवकारार्थभूतायाम् व्याघृत्तौ प्रति योगिताकत्वसंसर्गेणभावनायाः आश्रयतासंसर्गेणच एवकारार्थभूते न्यस्मिन् संख्यायाअन्वयः, तयोः प्रथमान्तपदोपस्थाप्यत्वाभावात् ॥

नचाव्ययोपरि सुपोलोपेन दधि तिष्ठतीतिवत् प्रथमान्तत्वाविरोधः । तथात्वेपि चैत्रे पाकभावनान्वयानुपपत्तेः ; चैत्रान्येषु बहुष्वपि चैत्र एव पचतीत्येकवचनप्रयोगाच्च । अतएव पचतिपदस्य व्युत्पत्तिवैचित्र्येण वारद्वयमन्वयमङ्गीकृत्य पाकानुकूलकृतिमच्चैत्रभिन्नः पाकानुकूलकृत्यभावाश्रय इत्येवमेवकारार्थैकदेशविशेष्यकशाब्दबोध इत्यपास्तं, तद्बहुत्वेनैकवचनस्य तत्रान्वयानुपपत्तेः । चैत्रस्यान्यविशेषणतया तत्राप्यन्वयानुपपत्तेश्च ॥

नच चैत्रपदस्य विशेष्यतया विशेषणतया च वारद्वयमर्थबोधकत्वं, तत्र पाकानुकूलकृतिमांश्चैत्रः पाकानुकूलकृत्यभाववांश्चैत्रान्य इति शाब्दबोधः. इतराविशेषणत्वञ्च विशेष्यत्वाभावविशिष्टं यद्विशेषणत्वं तदभाव इति वाच्यं. तथात्वेपि चैत्रौमैत्रश्च गच्छतः इति चैत्रोमैत्रादयश्च गच्छंतीति बद्विवचनबहुवचनयोरप्यापत्तेः.

नच चैत्रो गच्छति न मैत्र इतिवदेकवचनोपपत्तिः. तथात्वे तत्र-गच्छतिपदानुषंगेण भिन्नवाक्यत्ववदिहापि मुख्यविशेष्यभेदेन भिन्नवाक्यत्वापत्तेः. अस्मन्मतेतु चैत्रवृत्तिश्चैत्रान्यवृत्तिश्चैककर्तृकाभावनेति बोधः. भेदे च चैत्रप्रतियोगिकत्वं पार्ष्णिकं, एवकारस्यैव वा तत्र लक्षणेति नविरोधः.

वस्तुतस्तु पचति चैत्रे मैत्रेचापचति कीदृशौ चैत्रमैत्राविति प्रश्ने चैत्रएव पचतीत्युत्तरापत्तिः. अतएव कीदृशश्चैत्रइति प्रश्ने पचतीत्युत्तरापत्तेर्न प्रथमांताविशेष्यकोबोध इत्युक्तं. कीदृशी कृतिरिति प्रश्नोत्तरंतु न, लिंगानास्कांदितत्वादित्यप्युक्तं. अतोनुभवसिद्धमेव भावनामुख्यविशेष्यकत्वं.

किंच सत्यपिसंख्याभावनोभयसाधारण्येनोक्तविधप्रथमांतपदजन्योपस्थितेः कारणत्वे भवन्मते प्रथमातृतीयादिप्रयोजकं किं. न तावत् कर्त्राद्यभिधानानाभिधाने तत्प्रयोजके. तस्य त्वयानंगीकारात्. नापि संख्याभिधानानाभिधाने, संख्यायास्सर्वत्र सर्वकारकाभिधेयत्वेन सर्वत्र प्रथमापत्तेर्द्वितीयादिविभक्त्यभावप्रसङ्गात्.

अथ तिङुपात्तसंख्यान्वयित्वमेव प्रथमाप्रयोजकम् । तदन्वयश्च यगादिसमभिव्याहारसत्त्वे कृतिविषयत्वाख्यफलाश्रये कर्मणि शबादिसमभिव्याहारे कृयाश्रयाख्ये कर्तरि । यादृशसमभिव्याहारे आख्यातस्य कर्तृवाचित्वं वैयाकरणमते, मीमांसकमतेवा कर्तृलक्षकत्वं, तादृशसमभिव्याहारे तिङुपात्तसंख्यायाः कृत्याश्रयरूपकर्तृगामित्वं । यादृशसमभिव्याहारेच तयोर्मते कर्मपरत्वं, तादृशसमभिव्याहारे तिङुपात्तसंख्यायाः कृतिविषयरूपकर्मगामित्वम् । अतस्तादृशसंख्याभिधानमेव संख्याविशेष्यवाचिनामपदोत्तरप्रथमाप्रयोजकम् । तादृशसंख्यानभिधानन्तु तदविशेष्यवाचिनामपदोत्तरकर्तृकर्माद्यभिधायक तृतीयाद्वितीयादिविभक्तिप्रयोजकम् । अतएव भावाख्यातस्थले कर्तृकर्मगतसंख्यानभिधानाच्चैत्रेण सुप्यतइति तृतीया । चैत्रेणपच्यते ओदनइत्यत्र कर्माख्याते कर्मवाचिपदएव प्रथमा, चैत्रः पचतीत्यत्र कर्त्राख्याते कर्तृवाचिपद एवेतिव्यवस्थालाभइतिचेत् । तथात्वे चैत्रेण पाचकस्यपुत्रः ओदनं पक्वस्य विक्लृप्तिरित्यादिप्रयोगापत्तेः । कृत्प्रत्ययेन कर्तृकर्मगतसंख्याया अनुक्तत्वात् । चैत्रस्यपाचकस्य पुत्रः, ओदनस्य पक्वस्य विक्लृप्तिरितिप्रयोगानापत्तेः । चैत्रः पाचकः , ओदनः पक्व इति प्रयोगानापत्तिरपि । " विपवृक्षोपिसंवर्ध्य स्वयंछेत्तुमसांप्रतम् । " इत्यादावपि प्रथमानापत्तेश्च । ....

नच तत्र कृत्प्रत्ययेन सांप्रतमिति निपातेनच कर्त्राद्यभिधानादेव प्रथमासिद्धिः । संख्याकर्त्राद्यन्यतरानभिधानेच तृतीयादिरिति सूत्रार्थ इतिवाच्यं ।

तथात्वेपि चैत्रइव गच्छति मैत्रइत्यादौ चैत्रे प्रथमानापत्तेः, गच्छतीति तिङा चैत्रगतसंख्याया श्चैत्रगतकर्तृत्वस्यचानुक्तत्वात् । ....

यत्तु कृत्यनभिधाने तृतीया । फलानभिधाने द्वितीया । अभिधानेतु सर्वत्र प्रथमेतिमतम् । तदपिन । भावाख्याते भावनाभिधानेन प्रथमापत्तेः । कर्माख्यातेपि क्रियतइति विवरणानुरोधेन कृतिवाचित्वस्यावश्यकत्वात् प्रथमापत्तेश्च । ....

अस्मन्मतेतु सत्यपि तिङो भावनावाचित्वे वक्ष्यमाणरीत्या कर्त्रादेरपि लक्षणयाऽभिधानात् कृत्प्रत्ययेन सांप्रतमिति निपातेनच शक्त्यैव कर्त्राद्यभि

धानाम् सर्वत्र प्रथमोपपत्तिः । सांप्रतमिति निपातेन योग्यइत्यर्थकेन कर्माभिधानात् । चेत्रइवेत्यादावपि इवशब्देन गमनकर्तृत्वरूपसादृश्याभिधानात् कर्त्रभिधानं। चन्द्रइव मुखमित्यादावपि अस्तीति क्रियापदाध्याहारस्यावश्यकत्वा दाद्धृदकत्वावच्छिन्न सत्ताश्रयत्वरूप कर्त्रभिधानम् । ....

अतएव क्त्वाप्रत्ययेनापि समानकर्तृकत्वाभिधानात् चैत्रः पक्त्वा चैत्रो भुङ्क्ते इत्यादौचैत्रपदेपि प्रथमोपपत्तिः । ....

नचैवं चैत्रेण पक्त्वा चैत्रेणभुज्यतइत्यत्र चेत्रपदे तृतीयानापत्तिः, क्त्वाप्रत्ययेन कर्तुरुपादानादितिवाच्यम् । ....

तत्र " आत्मानमात्मनावेत्सि " " अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपेव्याकरवाणि " इत्यादिवत् करणत्वस्य तृतीयार्थत्वात् । ....

अतएव यद्वृत्तिकारकत्वं स्वान्वयिक्रिया प्रतिपादकेन पदेन वृत्त्या प्रतिपाद्यते, तत्त्वं प्रथमाप्रयोजकीभूताभिहितत्व मित्युक्तं भाट्टदीपिकायां । अस्तिचेदं चैत्रः पचति, ओदनः पच्यतइत्यादौ, चैत्रादिवृत्तिकर्तृत्व कर्मत्वादेर्निरुक्तक्रियापदेनाभिधानात् । पाचकेन गम्यतइत्यादौच कृदुपात्तस्य पुरुषस्य गमनक्रिययैवान्वयः, नतु पाकक्रियया । प्रथमं तस्याएव तस्मिन्नन्वयात् । अन्वयश्चात्र प्राथमिकशाब्दबोधविषयीभूत एव विवक्षितः । तेन " औदुम्बरो यूपोभवति " " स्वर्गकामोयजेत " इत्यादौ यूपस्वर्गादीनां प्रथमया कर्मत्वादिलक्षणायामपि प्राथमिकयूपकर्तृकभावनाश्रयत्वादि शाब्दबोधे कर्तृत्वस्योक्तत्वात् प्रथमोपपत्तिः ।

नच तत्रप्रमाणाभावः । तथात्वे धर्मिज्ञानाभावेन वैयर्थ्यप्रतिसन्धानाभावात्तात्पर्यज्ञानाभावेन लक्षणानुपपत्तेः । ....

अतएव यत्रान्वयानुपपत्त्यैव लक्षणा तत्र लक्षणाजन्यशाब्दबोधस्यैव प्राथमिकत्वात्, तत्रच तत्कर्तृत्वानुक्तौ प्रथमान्तपदस्यायोग्यत्वमेव । यथा - अग्निना चैत्रः पाके यतत इत्यर्थे अग्निश्चैत्रःपाकेयततइति । अत्रहि न प्रथमायाःकरणत्वलक्षणया शाब्दबोधः । अत्रहि अन्वयानुपपत्त्यैव करणत्वलक्षणा । अतः तत्र लक्षणातः पूर्वं शाब्दबोधाभावादयमेव बोधः प्राथमिकोवाच्यः । नच तदानींभासमानं करणत्वं स्वान्वयिक्रियाप्रतिपादकेन यततइति पदेनउक्तम् । यत्तु य

ततइत्यनेनोक्तं कर्तृत्वं नतदग्निवृत्तीति प्रथमाप्रयोजकरूपाभावात् तद्वाक्यं तस्मिन्नर्थेऽसाधु । उक्तविधं तद्वृत्तिकर्तृत्वं न कर्माख्यातेनाभिहितमिति युक्तैव तत्र तृतीया । ....

एवं चैत्रेण भुक्त्वा गम्यतइत्यत्र चैत्रस्य भुजिक्रियायामनन्वया द्गमनक्रियायामन्वयाङ्गीकारेणतृतीयोपपत्तिः । एवञ्चपक्त्वौदनोभुज्यतइत्यादौ पचिधातोः कर्माकांक्षायां द्वितीयान्तौदनपदाध्याहारेण वाक्यपूरणम् । नहिप्रधानक्रियायामुक्तस्य कारकस्य गुणभूतक्रियायामप्युक्तिरिति नियमे प्रमाणमस्ति येनाध्याहारं विनापि वाक्यंपूर्येत । तथात्वे " ओदनं भुक्त्वाशास्त्रंपठ्यते " " श्रुत्वाप्यर्थन्नानुमतः तेनसोर्थःकुबुद्धिने " त्यादौ द्वितीया प्रयोगोनोपपद्येत । अतस्सकर्मकधातूत्तरक्त्वाप्रत्ययस्थले द्वितीयान्तौदनपदाध्याहोरेपि कर्तृविशेषवाचिपदं विनापि शाब्दबोधोपपत्तेः चैत्रेणभुक्त्वा गम्यतइति प्रयोगे बाधकाभावः । यदित्वस्मिन्पक्षे चैत्रोभुक्त्वा चैत्रोगम्यतइति प्रयोगापत्तिरिति विभाव्यते। तदा मास्तु क्त्वाप्रत्ययस्य समानकर्तृकत्वपूर्वकालत्वयोश्शक्तिः । किन्तुभावकृत्त्वात् भावएव। तस्यैवोत्तरक्रियायां समानकर्तृकत्वपूर्वकालत्वसंसर्गेणान्वय इति।

एवञ्चैत्रः पक्त्वा चैत्रो भुङ्क्त इत्यपप्रयोगएव । प्रधानक्रियायामुक्तस्य कर्तृकारकस्यैव गुणभूतक्रियायामप्युक्तिरिति नियमांगीकारेण वा तस्य साधुत्वं प्रधानक्रियावाचिनः कर्त्राख्यातत्वे क्त्वाप्रत्ययस्यापि समानकर्तृकत्वादौ लक्षणेतिवा ध्येयम् ॥

अतएव चैत्रेण पक्त्वा चैत्रो भुङ्क्त इत्यप्यप्रयोगः ॥

अतएव मयैव पक्त्वा मयैव भुज्यते इत्यत्रापि कर्तर्येव तृतीया । पक्त्वौदनोभुज्यत इत्यादौ कर्मकारकाध्याहारएव ॥

ओदनं भुक्त्वा शास्त्रं पठ्यत इत्यादयः प्रयोगाश्च सुखोपपादाः ॥

एवं पचनी स्थाली दानीयो ब्राह्मणः, कुठारः करणमित्यादौ अधिकरणत्वादेः कृदुक्तत्वात्प्रथमोपपत्तिः ॥

नचैवमपि यत्र तिङन्तोपरि पचतितरां पचतिकल्पं पचतःकल्पं पचन्तिकल्पमित्यादौ अतिशयार्थकः ईयसमात्यर्थकोवा प्रत्ययः कृतस्तस्य तद्धि

तत्वेन प्रातिपदिकसंज्ञया प्रातिपदिकार्थमात्रविवक्षायां प्रथमान्तत्वात्तत्र प्रथमाप्रयोजकरूपाभावः । तद्वृत्तिकर्तृत्वस्य तिङानुक्तत्वात् । ईषत्त्वाद्याश्रयस्य मे दसंबन्धेन पाकभावनायामेवान्वयादिति वाच्यम् । तादृशस्थले धातोरेव ईषद्द समासत्वादौ लक्षणाङ्गीकारात् । कल्पबादिप्रत्ययस्य लक्षणातात्पर्यग्राहकत्वमा त्राङ्गीकारेण तदर्थान्वयस्यैवानङ्गीकारे तत्रत्य प्रथमायास्साधुत्वमात्रार्थत्वात् ।

अतएव शाब्दबोधजनकप्रथमाया एवेदं प्रयोजकम् । नतु साधुत्वा र्थायाः। तस्यास्तु प्रथमातिक्रमे कारणाभावएव । इदञ्च असंबुद्धिविषये संबोधन प्रथमायाः स्वतन्त्रविधेयत्वात् । ....

अतएव तद्वृत्तिकर्तृत्वानभिधानेपि चैत्र मैत्रः पचतीति प्रयोगः ।

केचित्तु कृदादिभिरनभिहितत्वमेव तृतीयादिविभक्ति प्रयोजकम् । प्रथमायान्तु कर्तृत्वाभिधानं, कर्तृत्वाद्यविवक्षाच प्रयोजिका । अतश्च पचति कल्पमित्यादौ विभक्त्यर्थाविवक्षायां प्रातिपदिकार्थमात्रविवक्षायां प्रथमोपपत्तौ बाधकाभावः । अतएवाविवक्षाविरहविशिष्टानभिधानम् तृतीयादिप्रयोजकं तदभावः प्रथमाप्रयोजक इत्येवानुगमः । नचैवमपि प्रकारतया करणत्वा द्यविवक्षायां भवन्मते करणत्वादिसंसर्गेण काष्ठादीनां भावनान्वयापत्तेः "चै त्रः काष्ठानि स्थाली ओदनः पचतीति प्रयोगापत्तिः । परमतेहि तेषां धा त्वर्थेन्वयात्तत्रचभेदसंबंधेनैव नामार्थान्वयान्न तथा प्रयोगापत्तिः, तेषामपि दधि प श्यतीत्यादिवत् काष्ठकरणत्वलक्षणया प्रयोगापत्तिरनिवार्यैव । भवन्मतेतु सर्व स्याख्यातार्थएवान्वयात्तत्रच नामार्थस्यापि चैत्रादेर्भेदसंसर्गेणान्वयांगीकारात् काष्ठादीनामप्यन्वयोपपत्तिरिति वाच्यम् । एतादृशप्रयोगापत्तिभयादेव मया पि स्वबोधककृदाद्यभिहितकारकवाचिनामभिन्ननामार्थस्य तद्गतलिंगसंख्यादेर्वा क्रियासंबंधे सुबुपात्तलिंगसंख्याव्यतिरिक्तद्वितीयादिविभक्त्युपस्थितार्थद्वारकत्वं तंत्र मिति नियमस्य कल्पनात् । स्वपदं स्वान्वयिक्रियापरम् । अत्र नामार्थ स्यापि चैत्रादेः चैत्रः पचतीत्यादौ साक्षादेव क्रियान्वयाङ्गीकेत्यन्तम् । पा चकमानयेत्यादौ कृदाद्यभिहितकारकत्ववाचिनोपि पाचकपदस्यानयनानुकूलकृ तावन्वये द्वितीयोपस्थापितकर्मत्वद्वारकस्यावश्यकत्वात्स्वबोधकेत्युक्तं । पाच

ः पक्वमित्याद्यावपि लक्षणया भावनाबोधस्य वक्ष्यमाणत्वात्तत्र काष्ठादीना न्वये करणत्वादिबोधकतृतीयादि आवश्यकम् । अतएवैतन्नियमानुरोधेनैव क्तौ तुभादौ प्रातिपदिकार्थस्य सुबुपात्तलिंगसंख्ययोश्च साक्षाद्भावनान्वयोनांगीकृ ः । अतः पचतिकल्पमित्यादौ प्रातिपदिकार्थमात्रविवक्षायां प्रथमेत्याहुः ॥

तन्न । एवमपिईषदसमाप्तेः कल्पप्प्रत्ययवाच्यायाः भावनया सह भेदसंबंधविवक्षया षष्ठ्यापत्तेदुर्वारत्वात् । ईषदसमाप्तेरपि तादृशनामार्थतया नि रुक्तक्रियासंबंधे द्वितीयादिविभक्त्यर्थद्वारकत्वाभावात् व्यभिचारापत्तेश्च ॥

अतोन्यत्र व्याकरणस्य वृत्तिबोधकत्वेपि प्रकृते तात्पर्यग्राहकतामात्र परतेति युक्तमुत्पश्यामः ॥

केचित्तु पचतिकल्पमित्यादौ तिष्ठतीत्यध्याहारात् पाकभावनावृत्तिरीषद समाप्तिस्तिष्ठतीत्यर्थः । अस्मिंश्च पक्षे पचतीति तिङर्थोपि कल्पप्प्रत्य यार्थेन भेदसंबंधेनान्वेति, एकपदोपात्तत्वात् । अतश्च कल्पप्प्रत्ययस्य वाच कत्वेपि तस्यतिष्ठतीत्यत्रैवान्वयात्प्रथमेोपपत्तिरित्याहुः ॥

तन्न – बहुत्वविवक्षायां पचंतिकल्पा इत्यस्याप्यापत्तेः ॥

एवंचास्मन्मते सर्वत्र प्रथमाप्रयोजकरूपलाभस्सुलभः, नतु भवन्मत इति सिद्धम् ॥

नन्विदमाख्यातस्य कृतिवाचिनः कर्तृलक्षकत्वे सिद्ध्येत् ; तत्रैवतु प्र माणाभाव इति चेत् : पचतीत्युक्ते कीदृग्विधः इति प्रश्नस्यैव तत्र प्र माणत्वात् । नहि धर्मिज्ञानं विना धर्मविशेषप्रश्नोयुज्यते, नच धर्मिज्ञानं त्वन्म ते संभवति, पचतिपदार्थपाकप्रकारकानुकूलतासंसर्गकाख्यातार्थविशेष्यका खण्डवाक्यार्थबोधस्यैव जननात् प्रथमान्तपदजन्योपस्थितिरूपकारणाभावेन कृतिप्रकारकाश्रयविशेष्य कबोधस्य जनयितुमशक्यत्वात् ॥

यद्यपि भवन्मते कृतिप्रकारकबोधं प्रति आख्यातपदज्ञानत्वेनापि का रणतास्ति । तथापि तत्कार्यतावच्छेदकं यदि कृतिप्रकारकबोधत्वं तदा- श्रयज्ञानाभावाद्धर्मिज्ञानाभावस्सुलभएव । यदितु कृतिप्रकारकाश्रयविशेष्यक- बोधत्वं तदापि तत्र प्रथमांतपदजन्योपस्थितेरपि दण्डचक्रादिवत् समुच्चि-

त्यकारणत्वात् तदभावेनाभावस्सुलभः । ....

अतोवश्यं प्रश्नोपपादकधर्मिज्ञानार्थं प्रथमांतपदाध्याहारार्थं चाश्रयज्ञानं वाच्यम् । तच्च शाब्दं मानसं स्मरणं वेति विप्रतिपत्तिः । तत्र "लः कर्मणिच भावे चाकर्मकेभ्यः" (३—४—६९) इत्यनुशासनाच्छाब्दमेव । अत्र चकारात् "कर्तरिकृत्" (३—४—६७) इतिसूत्रीयस्य कर्तरीत्यस्यानुकर्षणात् कर्तर्यपि लकारलाभः। इदंहि न लकारस्य कर्त्रादौ शक्तिरित्येवंपरं, पदार्थे वृत्तौ च तात्पर्यकल्पने गौरवात् । लाघवेन कृतौ शक्तावबधारितायां तदनुशासनस्यनिरूढलक्षणयैव व्याख्येयत्वाच्च. कर्तुर्मानसत्वे तत्र संख्यान्वयानुपपत्तेः. पचतीत्येतावन्मात्रश्रवणे कर्तरि एकत्वसंशयापत्तेश्च. पचतीति पाचक इत्येवं कृदर्थविवरणाच्च. अत आश्रयज्ञानस्य शाब्दत्वमुक्तं ॥ ....

युक्तंचैतत्-आख्यातोपात्तसंख्याप्रकारकशाब्दबोधं प्रति आख्यातपदस्य प्रथमांतपदापेक्षया उपस्थितत्वेनाख्यातपदजन्योपस्थितित्वेन कारणत्वकल्पने लाघवात् . अतो लाघवादनुशासनात् धर्मिज्ञानानुरोधादाख्यातस्य कर्त्रादौ लक्षणा ॥

एतेनैकत्वादेरस्मन्मते कर्त्रादिघटितसामानाधिकरण्यसंबंधेनैव भावनान्वयात्कर्त्रादेः सांसर्गिकविषयितयैव बोधइत्यपास्तम्. पाककर्ता एको नवेत्यस्य संशयस्य पचतीत्यतो व्युदासानुपपत्तेः. धर्मितावच्छेदकविशिष्टधर्मिज्ञानाभावात्पाककर्ता क इति संशयानापत्तेश्च । नच क्वचिदपि शक्तिमात्रजन्यशाब्दबोधाभावे तस्यैवपदस्यार्थांतरलक्षकत्वासंभव इत्यत्र प्रमाणमस्ति. मुख्यार्थासंभवस्थ्ये वार्थांतरबोधानुपपत्तेरेव लाघवतर्कसहकृतायाः लक्षणातात्पर्यग्राहकत्वात् , तत्रापि शबादिविकरणस्थलेकर्तरि, यगादिविकरणस्थलेच कर्मणीत्येवं व्यवस्थया लक्षणा । लक्ष्यतावच्छेदकञ्चाश्रयत्वं, कर्तृत्वकर्मत्वाद्यखण्डोपाधिर्वा । कर्तृत्वादिकंहिकृत्याश्रयत्वादिसमनियतोऽखण्डधर्मोनुगतव्यवहारसाक्षिकः, नतु कृत्याश्रयत्वादिकमेव. तथात्वे चैत्रेण पाकः क्रियत इत्यत्र चैत्रेण पाकइत्येतावतैव चैत्रनिष्ठकृतिसाध्यः पाक इत्यर्थबोधोपपत्तेः पुनः क्रियतइति कृतिवाचकपदप्रयोगवैय्यर्थ्यापत्तेः. अतः कर्तृत्वादिकमखण्डमेव तृतीयाद्यर्थः. तस्यचाश्रयत्वादिवदेव कृत्यादिनिरूपितत्वादि धर्मकल्पनाचैत्रनिष्ठकर्तृत्वनिरूपककृतिसाध्यः पाक इत्यर्थबो-

धोपपत्तिः. इदञ्च परमतेनोक्तं. स्वमते उक्तकृतिसाध्यत्वं पाकवृत्तीत्येवं शाब्दबोधस्य वक्ष्यमाणत्वात्. सर्वथा कर्तृत्वादिकमखण्डोपाधिः. इष्टञ्चैतत्प्राचां दंपत्योर्व्यासज्यवृत्तिकर्तृत्वसिद्ध्यर्थं, अग्नीषोमयोर्व्यासज्यवृत्तिदेवतात्वसिद्ध्यर्थञ्च. अन्यथा कृत्याश्रयत्वरूपकर्तृत्वस्य, त्यज्यमानद्रव्योद्देश्यत्वरूपस्यच देवतात्वस्य, आश्रभेदेन भिन्नतया व्यासज्यवृत्तित्वसिद्धांतानुपपत्तेः. अतः कर्तृत्वं कर्मत्वञ्च लक्ष्यतावच्छेदकीकृत्य कर्तृकर्मणोराख्यातस्यलक्षणा. इदञ्चौत्सर्गिकीं रीतिमनुसृत्योक्तं. यत्र पष्ठ्युक्तन्यायेनाश्रयानेकत्वग्राहकं प्रमाणांतरमस्ति, यथा-दंपत्योः, तत्र विधिवाक्ये एकवचनश्रवणादाख्याते नाश्रयलक्षणा, एकत्वानन्वयापत्तेः. अतस्तत्र द्वित्वलक्षणायां प्रमाणाभावादाख्यातेनैव लाघवात्कर्तृत्वत्वेन कर्तृत्वं लक्ष्यते. नतदाश्रयोपि. तस्यार्थादेव बोधोपपत्तेः. इष्यतेच कर्तृत्वत्वादिना कर्तृत्वबोधस्तृतीयादौ. सपरं शक्त्या तत्र, अत्रतु लक्षणयेत्येतावान् भेदः तत्रैवच साक्षात्संबंधेनैकत्वान्वयः. नत्वाश्रये. तस्याद्वित्वात्. यदपि तत्राख्यातसमानाधिकरणं स्वर्गकामपदं, तदपि न कर्तृपरं अपितु लक्षणयोपस्थितस्वर्गाख्यभाव्यपरमेव. प्रथमाच तत्रत्यालक्षणयाकर्मत्वार्थिकेति न तत्सामानाधिकरण्यबलेनाप्याख्यातेनाश्रयलक्षणा. प्रथमाप्रयोजकंतु सर्वत्राकर्तृत्वोक्तिरेव, सापरं कर्तृत्वप्रकारिका कर्तृत्वविशेष्यिकावेत्यन्यदेतत्. अतस्सिद्धाऽऽख्यातेपि कर्तृत्वादिलक्षणा ॥

तदपिच न भावनां प्रतिविशेष्यम्. किन्तु भावनैव तद्विशेष्या. इतरथा पचति ब्रूतइति प्रयोगापत्तिः. पक्ता ब्रूत इतिवत् तस्य योग्यत्वात्. पचति भवतीति भाष्योदाहृतप्रयोगानापत्तेश्च ॥

यत्तु अपाक्षीद्भवति, पक्ष्यति भवतीति तदुदाहृतप्रयोगः. सचभूधातुना युक्तत्वलक्षणया भूतभाविपाकभावनाद्वयविवर्तमानयुक्तत्वाश्रयत्वमिति शाब्दबोधांगीकारान्नायुक्तः. दृश्यतेच युज्यत इत्यर्थे लोके भवतीतिप्रयोगः. एवं पचतिभवतीति प्रयोगोपि कर्तृविशेष्यत्वपक्षेनोपपद्यते. तथात्वे पचंति भवंतीति प्रयोगापत्तेश्च. " भावप्रधानमाख्यातं „ इति निरुक्तस्मृत्या भावनांतिरिक्ताख्यातार्थमात्रं प्रति भावपदवाच्यभावनाया विशेष्यत्वोक्तेश्च. अत्रहि न प्रकृत्यर्थं प्रति भावनायाः प्राधान्यं बोध्यते " प्रकृ-

तिप्रत्ययौप्रत्ययार्थसहभूतः तयोस्तु प्रत्ययः प्राधान्येन ,, इतिस्मृत्यैव प्रकृत्यर्थनिरूपितप्रत्ययार्थप्राधान्यस्य सुबर्थसाधारण्येन सिद्धेः ॥

नच "धात्वर्थःकेवलश्शुद्धोभाव इत्यभिधीयते,,इति वैयाकरणस्मृत्यनुरोधेन भावशब्दस्य धात्वर्थपरत्वावसायात् , तस्यैवाख्यातार्थापेक्षया प्राधान्यमनया स्मृत्या नियम्यते, प्रत्ययार्थप्राधान्यस्मृतिस्तु सामान्यविषयत्वात् सुबर्थाभिप्रायेण व्याख्येयेतिवैयाकरणमतमेव युक्तमिति वाच्यम् . एतस्य परिभाषारूपत्वेन नदीवृद्ध्यादिवदन्यत्राप्रवृत्तेः. अतएव व्याकरणशास्त्रएव तस्य " भावे घञ् ,, (३--३--१८) इत्यादौ प्रवृत्तिः, सापि न सर्वत्र " भावेत्वतला ,, वित्यादावप्रवृत्तेः ' अतश्च निरुक्तभावशब्देन णिजन्तभूधातोरन्प्रत्ययान्तत्वव्युत्पत्त्या भावनानुकूलव्यापाररूपा भावनैवोच्यते न धात्वर्थः ॥

अतएव " सर्वमाख्यातजं नाम ,, इति स्मृत्याऽऽख्यातशब्दस्य धातुपरत्वावसायादनयापि स्मृत्या धातोरेव भावप्राधान्यनियमाद्धात्वर्थमुख्यविशेष्यकत्वोपपत्तिरित्यप्यपास्तम् · कृदन्ते पाचकपदादौ आख्यातशब्दप्रयोगाभावेन तत्रत्याख्यातशब्दस्य धातौ लाक्षणिकत्वस्य कौस्तुभे व्युत्पादितत्वात् । अतश्चाख्यातार्थानेकत्वे कस्य प्राधान्यं कस्यवा गुणत्वमित्यपेक्षिते " भावप्रधानमाख्यातं,, इति स्मृत्या भावनातिरिक्ताख्यातार्थं प्रति भावनाया एव प्राधान्यमिति नियम्यते ॥

अतएव कालादिसाधारण्येनैकः कार्यकारणभाव इत्यपि लाघवं ॥

कालोपि नञ्समभिव्याहाराभावे कालिकसंबंधेन भावनायामन्वेति, नञ्समभिव्याहारेतु तत्कालीनाभावप्रतियोगित्वसंबंधेन साक्षादेववा तस्यामेव, तथाहि—— " वर्तमानेलट् ,, (३--२--१२३) इति सूत्रात्पचतीत्यत्र वर्तमानत्वं लडर्थः, तच्च लडुच्चारणकालभिन्नकालकत्वं । तच्च कालिकवृत्तित्वसंबंधेन कृतावन्वेति विक्लित्युपधायककृतिकूटान्तर्गतयाकिंचित्कृतेस्तदुच्चारणकालीनत्वात्, अत्र सर्वत्र कृतिशब्दो भावनापरः, तेन जानातीत्यादावाश्रयत्वस्य वर्तमानत्वान्न क्षतिः, नश्यतीत्यादौच धातुना नाशस्यैवोक्तिः - प्रत्ययेनच प्रतियोगित्वस्य लक्षणा । वर्तमानकालस्य परमनुभवानुरोधेन स्ववृत्त्युपत्तिकनाशीयत्वसंबंधेन

प्रतियोगित्व एवान्वयः तथाच घटवृत्तिनाशप्रतियोगित्वं वर्तमानकालो त्पत्तिकनाशीयत्वसंबंधेन वर्तमानत्ववदित्येवास्मन्मते शाब्दबोधः । एवञ्च धातुना उत्पत्तिं लक्षयित्वा तस्यां कालस्य कथञ्चिदन्व यस्यापि न कल्पनीयम् . एवं संबंधभेदसत्त्वेपि वर्तमानकालस्सर्वत्र कृतावे वान्वेतीति न क्वापि तस्य विशेष्यान्तरकल्पना ॥

नचैकविशेष्यत्वलाभेपि संबंधभेदेनसमभिव्याहारज्ञानस्य कार्यकारण भावानन्यतादवस्थ्यमिति वाच्यम् । वस्तुत स्संबंधभेदेपि संबंधसामान्येन तत्प्रकारक तद्विशेष्यकशाब्दबुद्धित्वावच्छिन्नम्प्रति तादृश समभिव्याहारज्ञानस्य कारणतेत्येवमेकस्यैव तस्योपपत्तौ संबंधाननुगमस्यादोषत्वात् । यथैवहि संयोग समवायकालिकादिसंबंधभेदेपि घटवद्द्रव्यमित्येवंविधवाक्यात्संबंधसामान्यसंसर्गके घटप्रकारके मत्वर्थद्रव्यविशेष्यके शाब्दबोधे जाते पश्चात्संबंधस्य तत्त्वेन जि ज्ञासायां प्रमाणान्तरेण तात्पर्यावधारिते यत्रैकस्मिन्नेव संसर्गे तात्पर्यमवधा रितं तत्र तत्संसर्ग एव शाब्दबोधपर्यवसानम् । यत्रानेकेषु तात्पर्यं तत्रानेकेषु शाब्दबोधपर्यवसानम् । तत्रचवस्तुतस्तात्पर्यविषयीभूतस्यापि संबंधस्य तत्त्वेन बोधस्य प्रमाणान्तराधीनत्वात् , शाब्दबोधेच संबंधत्वेनैव बोधान्नव टवद्द्रव्यमित्येवंविधसमभिव्याहारज्ञानस्य कार्यकारणभावानन्यम् । पर्यवसितबो धमादायैवच बाधबुद्धिप्रतिबध्यप्रतिबन्धकभावः । अतएव संयोगेन न घ टवद्द्रव्यमितिबुद्धिसत्त्वेपि घटवद्द्रव्यमितिबुद्धिर्जायमाना संबंधान्तरमादाय पर्य वस्यति । संयोगविषयतातु तस्याआपातत: प्रतीता बाध्यत इति स्वानुभ वसिद्धमेतत् । घटोनास्तीत्यादौ वा संयोगसमवायाद्यवच्छिन्नप्रतियोगितारूप संबंधभेदोनुसंधेयः । अतस्संबन्धभेदेपिनकार्यकारणभावभेदः ॥

एवं विशेष्यप्रकारभेदेपि तदनुगमकधर्मैक्ये न तदानन्त्यं । नहि श्वेतरक्तादिप्रकारभेदे घटपटादिरूपविशेष्यभेदेवा नामार्थयोरभेदान्वयइति व्युत्पत्तिर्भिद्यते ॥

अस्तुवा एवमादिस्थलेसर्वत्र तद्भेदः । तथापि एककार्यकारणभाव कल्पनादशायामुपस्थितस्य विशेष्यस्यैव कार्यकारणभावान्तरे विशेष्यत्वकल्पनौ चित्यात् । नच विनिगमनाविरहः । द्वितीयान्तादिपदानान्तावक्रियापदंवि

ना निराकांक्षत्वाभावस्य उभयवादिसिद्धतया क्रियाप्रतिपादकपदस्य विशेष्यप्रतिपादकत्वावश्यंभावात् । तत्रापि धात्वर्थं प्रति कालादिकंच प्रति विशेष्यभूताया भावनायां एव प्रधानभूतविशेष्यत्वेसंभवति प्रकारविशेष्यत्वस्यान्याय्यत्वादिति न्यायेन विशेष्यत्वोपस्थितिलाघवानुरोधेनच विशेष्यत्वकल्पनौचित्यात् । नच प्रथमान्तस्य क्रियापदसाकांक्षत्वे प्रमाणाभावः । चैत्रइत्येतावन्मात्रस्य शाब्दबोधाजनकत्वेन तस्यापिसाकांक्षत्वात् . नचतथात्वेपिपण्डितादि पदसमभिव्याहारेणापिशाब्दबोधजननात्क्रियापदसांक्षत्वेप्रमाणाभावः "अस्तिर्भवति परः प्रथमपुरुषेऽप्रयुज्यमानोप्यस्ती,,ति कात्यायनस्मरणेन तस्यापि क्रियापद साकांक्षत्वात् । भवतिपरः लडन्तइत्यर्थः ।

नच क्रियापदान्तराध्याहारस्यापि योग्यतानुसारेणावश्यकत्वादेतदनुशासनवैयर्थ्यम् । योग्यतासाधारण्ये वेदादौ तात्पर्यग्रहाभावेच सत्यस्यध्याहारनियमार्थत्वात् । प्रथमान्तमुख्यविशेष्यकत्वभ्रमनिरासार्थत्वेनैव सार्थक्याच्च ॥

नचैवं तर्हि प्रथमपुरुषभिन्ने अहंपण्डितस्त्वपण्डित इत्यादौ तत्साकांक्षत्वे प्रमाणाभावः । तत्रापि प्रातिपदिकार्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासंबंधेन सुबर्थप्रकारकोपस्थितिः कारणं, लिंगसंख्याव्यतिरिक्तसुबर्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रतिच क्रियापदजन्योपस्थितिः कारणमितिकल्पनकार्यकारणभावयोरेव प्रमाणत्वात् ।

अतएव प्रथमास्थलेपि न प्रातिपदिकोपस्थितस्यैव चैत्रस्य क्रियायामन्वयः । अपितु प्रथमोपस्थितस्यैव । प्रातिपदिकार्थमात्रे प्रथमेत्यनुशासनेन प्रातिपदिकार्थस्यैव प्रथमार्थत्वात् । प्रकृतिप्रत्ययार्थयोश्चाभेदसंबंधेनान्वयान्न कल्पनव्युत्पत्तिभङ्गः । प्रातिपदिकंवा तात्पर्यग्राहकमितिवक्ष्यते ।

यदातु अभिहितकारकवाचिनी प्रथमेति मतं तदा सुतरां ।

अतस्सिद्धं लाघवानुरोधेन सर्वत्र भावनैव मुख्यविशेष्यभूतेति ।

नचानुभवानुरोधेन व्युत्पत्तिनानात्वमप्यङ्गीकृत्य योग्यतया साक्षात्संबंधेन तत्तद्विशेष्ये तस्य तस्यान्वयोनायुक्तइतिवाच्यम् । तथात्वे राजपुरुष इत्यादावपि राज्ञस्साक्षात्स्वस्वामिभावसंबंधेनैवान्वयानुभवात् , समासस्थले व्यु

त्पत्त्यन्तरमङ्गीकृत्य राज्ञ एव भेदसंबंधेन तत्पुरुषान्वयोपपत्तेः, पूर्वपदेसंबंधिल क्षणानापत्तेः । अर्धपिप्पलीत्यादौ उत्तरपदे लक्षणानापत्तेश्च ॥

यजेत स्वर्गकाम इत्यादौ स्वर्गसाधनत्वस्य यागे प्रतीमानस्य मानस बोधविषयत्वमङ्गीकृत्य क्लृप्तव्युत्पत्तित इष्टसाधनीभूतयागानुकूलकृतिमान् स्वर्ग काम इत्येवंविधशाब्दबोधस्य भवत्संमतस्यानापत्तेश्च ॥

तस्मादनुभूयमानस्य साक्षासंबंधस्यपरंपरासंबंधघटकत्वेन मानसबोधवि षयतयावो पपत्तेर्न प्रथमक्लृप्तव्युत्पत्तिभङ्गेन व्युत्पत्त्यन्तरकल्पनं प्रमाणवत् ॥

अतस्सिद्धंसर्वत्र वर्तमानकालस्य कृतावेवान्वयइति ॥

अतस्तत्तत्क्षणेष्वेवलटश्शक्तिः, नतु लडुच्चारणस्य शक्यतावच्छेदककोटिप्रवेशः । तस्य तदादौ बुद्धिस्थत्वस्येव शक्तिग्रहोपलक्षणत्वात् ॥

अथवा लादेर्लट्त्वादिकमेव शक्ततावच्छेदकम् तदवच्छिन्नस्यच कालि कसंबंधेन प्रकृतशाब्दबोधोपधायकस्ववृत्तित्वं कृतौ संबंधः । कृतेराख्यात त्वेन रूपेण लङ्ग्राध्यत्वात् । तेन मैत्रीयप्रयोगकालीनकृतिध्वंसकाले न चैत्र लट्प्रयोगापत्तिः ॥

एवं लिडर्थोपिभूतानद्यतनत्वविशिष्टपारोक्ष्यरूपोभावनायामेवान्वेति । तत्रभूतत्वं-लिङुच्चारणकालीन ध्वंसप्रतियोगिक्षणवत्त्वं । तच्च कालिकसंबंधेन कृता वन्वेति । इदञ्चान्तिमकृतावेव, तेनानेकदिनसाध्यपाकस्थलेप्याद्यकृतिध्वंसका ले न पपाचेति लिट्प्रयोगः । लिङुच्चारणकालीनध्वंसप्रतियोगित्वंवा । त दपि स्वरूपसंबंधेनान्तिमकृतावन्वेति । लिङुच्चारणकालएववा लिडर्थः. लिडेव वा पूर्ववत् । तस्यच स्ववृत्तिध्वंसप्रतियोगित्वादिसंबंधेन तस्यामन्वयः । न नाशेत्यादौ भूतत्वान्वयः पूर्ववत्. अनद्यतनत्वं- लिङुच्चारणदिनभिन्नदिनवृत्तित्वं. परोक्षत्वञ्च- प्रयोक्तृवृत्ति साक्षात्करोमीत्येतादृशविषयताशालि ज्ञानाविषयत्वम् । इदं द्वयमपि कृतावन्वेति । परंत्वाद्यंसाक्षात्संबंधेन । द्वितीयंतु स्वसंबंधि धात्वर्थावच्छिन्नत्वसंबंधेन । चैत्रवृत्तिकृतेः प्रयोक्तृसाक्षात्काराविषयत्वेन तस्या न्तदभावबोधस्य व्यर्थत्वात् । बुद्ध्यतांवा स्वकृतौ प्रसिद्धस्य साक्षात्काराविषय त्वस्य तस्यामभावः । उत्तमपुरुषेप्यनवधानेन पारोक्ष्यंदृष्टव्यं. शक्तिस्त्वर्थत्र

ये प्रत्येकं , विशेषणविशेष्यभावे विनिगमनाविरहात् , अतएवोक्तदिनस्यो त्क्षणेपि न विशेषणता । विनिगमनाविरहात् ॥

लुडर्थस्तु - पक्ता इत्यादौ अनद्यतनत्वविशिष्टं भावित्वं; तच्च लुङ्ङु च्चारणकालीनप्रागभावप्रतियोगिक्षणवृत्त्यादिकं पूर्ववदाद्यकृतावेवान्वेति ॥

लृडर्थोपि पक्ष्यतीत्यादौ अद्यतनानद्यतनसाधारणंभविष्यत्त्वसामान्यं तत्रैव ॥

लेड्डेदएव । तदर्थो लिङर्थएव " समिधोयजती " त्यादौ ।

लोडर्थोपि लिङर्थ एव । प्रैषादयः कृत्यप्रत्ययार्थाश्च " प्रैषातिसर्गप्राप्तकाले कृत्याश्च " (३-३ - १२६) इति सूत्रे चकारेण लोटोप्यनुकर्षणात् ॥

लङर्थस्त्वनद्यतनभूतत्वं, अपच दित्यत्र 'भूत' इत्यनुवृत्तौ " अनद्यतनेलङ् " (३-२-१११) इतिसूत्रात् ॥

लिङर्थस्तु पूर्वमेव निरूपितः ॥

लुङर्थः—अपाक्षीदित्यत्र भूतत्वमात्रं ॥

लृङर्थस्तु हेतुहेतुमद्भावविशिष्टक्रियातिपत्तिः । यथा-यदि-सुवृष्टिरभविष्यत्त दा सुभिक्षमभविष्यदित्यत्र वृष्टिसुभिक्षयोर्हेतुहेतुमद्भावात् , उभयोरनिष्पत्त्याच्च क्रियातिपत्तिः । अयं भूते भाविनिच — दृष्टोमया भवतः पुत्रोन्नार्थे चंक्रममाण णः, दृष्टश्चापरो द्विजो ब्राह्मणार्थी, यदि तेन स दृष्टोभविष्यत्ततोऽभोक्ष्यत् , नतु भुक्तवानित्यादौ भूतेपि प्रयोगदर्शनात् . अनयोश्चार्थयोस्साक्षादेव स्वरू पसंबंधेन भावनान्वयः ॥

अत्रच सर्वत्र लकारेषु शक्तितावच्छेदकं तत्तल्लकारत्वं । वक्ष्यमाण रीत्यावा तत्तदादेशविशेषत्वं बोध्यं । सर्वथा तदर्थस्य भावनायामेवान्वय इति सिद्धम् ॥

एवमुपग्रहविशेषरूपस्यात्मनेपदाद्येरर्थः कर्तृगामि फलादिरूपः । सो पि कर्मतादिसंबंधेन तस्यामेवान्वेति ॥

यद्यपि स्वर्गत्वादिरूपेणासौ स्वर्गकामादिपदैरुक्तः । तथापि कर्तृगामित्वादिना तदभिधानमात्मनेपदादिना नानुपपन्नं । अस्तुवा कर्तृगामित्वादिकमेव तदर्थः । सच स्वाश्रयफलकर्मत्वादिसंबंधेन कृत्यन्वयी ॥

एवमेकत्वादिसंख्याया अपि तिङाद्युक्तायास्सामानाधिकरण्यसंबंधेन तस्यामेवान्वयः । नतु साक्षात्संबंधेन कर्त्रादौ । भावप्रधानमिति स्मृतिसंकोचे प्रमाणाभावात् कार्यकारणभावादिकल्पनागौरवापत्तेश्च । तत्रापिकर्त्राख्यातस्थले स्वाश्रयसमवेतत्वसंबंधेन । कर्माख्यातस्थले स्वाश्रयभूतकर्मवृत्तिफलप्रयोजकत्वसंबंधेन । चैत्रेणौदनः पच्यत इत्यत्रहि चैत्रेण पाकेनौदनः क्रियत इति विवरणानुसारात्कृतिरेवाख्यातार्थः । पाकस्य करणत्वं चैत्रस्यच कर्तृत्वं प्रतीयते । आत्मनेपदेनच लक्षणया कर्म । उक्तानुशासनानुरोधात् । फलन्तु विक्लित्त्यादि न कस्यापि पदस्यार्थः । तस्यान्यलभ्यत्वात् ॥

अतएव फलमात्मनेपदस्यार्थः, कृतिस्तृतीयार्थ इत्यप्यपास्तम् । चैत्रःपचत इत्यादौ कृतावपि शक्तेरावश्यकत्वेनानेकशक्तिकल्पने गौरवात्, चैत्रेणौदनः क्रियत इति तृतीयातः कृतेः प्रथग्विवरणाच्च । अतश्च तत्र कृतेरेवाख्यातार्थत्वात्तस्यामेकत्वान्वयः स्वाश्रयीभूतौदनवृत्तिविक्लित्तिरूपफलजनकपाकजनकत्वसंबंधेन नानुपपन्नः ॥

एवं भावाख्यातेपि चैत्रेण सुप्यते गगनेन स्थीयत इत्यादावाख्यातेन स्वापःक्रियत इति विवरणाद्भावनैवोच्यते । स्थीयत इत्यत्राप्याश्रयत्वं नच तत्र लक्षणायां प्रमाणाभावः । चैत्रो जानातीत्यादौ विशेषणीभूतधात्वर्थान्वयस्येव गगनेन स्थीयत इत्यादौ विशेषणीभूतधात्वर्थान्वयस्यापि लक्षणाबीजत्वोपपत्तेः । नच तत्र धात्वर्थविशेष्यकएव बोधः भावनाप्रकारकबोधत्वावच्छिन्नं प्रत्याख्यातपदज्ञानत्वेन कारणत्वस्यान्यत्र कल्पनात् या " समिधोयजती " त्यादौ प्रथमान्तपदाध्याहारस्येव धात्वर्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति धातुपदज्ञानत्वेन कारणत्वस्यान्यत्रकल्पनतया तन्निर्वाहार्थं-भावाख्यातेप्याश्रयत्वलक्षणोपपत्तेः । तत्रापि भावप्रधानमिति स्मृत्या प्रत्ययार्थप्राधान्यस्मृत्याच भावनाया एव प्राधान्यम् । अनुशासनबलाच्चाख्यातेन कर्तृकर्मलक्षणाव्यापारभावरूपधात्वर्थस्यापि गुणत्वेन लक्षणा । तथाच गगाननिष्ठं

स्थितिमत् स्थित्याश्रयत्वमिति शाब्दबोधः । द्वितीयवारंस्थितिबोधस्त्वनुवादसौधुत्वार्थः । अतः स्थीयत इत्येकत्वमपि स्वाश्रयीभूतभावरूपधात्वर्थनिरूपितत्वसंबंधेनाश्रयत्वादावेवान्वेति । भावप्रधानमिति स्मृतिसंकोचे प्रमाणाभावात्

नचैवं धात्वर्थस्य द्वित्वादिविवक्षायां द्विवचनाद्यापत्तिः । प्रयोगाभावसहकृतानुशासनबलेन एकवचनेनैवद्वित्वादिलक्षणात् ॥

अतएव " उष्ट्रासिकाआस्यन्त " इति महाभाष्यकारवचनात् भावेपि बहुवचनं क्वाचित्कम् ।

एवं " कर्मवत्कर्मणातुल्यक्रियः „ (३-२-८७) इतिसूत्रात् पच्यते ओदनस्स्वयमेवेत्यादौ यत्रसकर्मकधातोर्यत्कर्मकारकं तद्वृत्त्यखण्डोपाधिरूपकर्मत्वाविवक्षया कर्त्रत्वविवक्षा तत्राख्यातेन तस्यैव गुणत्वेन लक्षणयोपादानादाख्यातेन विवरणानुसारेण शक्त्यैव कृतेरुपादानात् तस्यामेव कर्तृत्वस्य स्वनिरूपकविक्लित्तिरूपफलजनकपाकजनकत्वसंबंधेन , ओदनस्यच स्वनिष्ठकर्मत्वनिरूपकफलप्रयोजकत्वसंबंधेनान्वयइति व्यक्तंकौस्तुभे ॥

तत्सिद्धं भावनातिरिक्ताख्यातार्थस्य सर्वस्य भावनायामेव प्रकारतेति तस्या मुख्यविशेष्यत्वं । धात्वर्थं प्रतितु तस्या विशेष्यत्वं , " प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येन' इति स्मृतिवशादेवाविवादं । अतएव न तस्प्रत्ययार्थान्तरम्प्रति प्रकारता , विशेष्यगामित्वे संभवति प्रकारगामित्वस्यान्याय्यत्वात् ॥

अथकोयं धात्वर्थोनाम । यत्र विवदन्ते बहवः । तत्र मण्डनमिश्रास्तावत् विक्लित्त्यादिरूपं फलमेवधात्वर्थः, तदनुकूलफूत्कारादिरूपो व्यापारसंघस्तु सर्वोपि व्यापारत्वेन प्रत्ययार्थः, फलस्यच तंप्रति प्रकारत्वमित्याहुः. तन्न, गमनजन्यसंयोगाश्रयो ग्राम इति प्रयोगानापत्तेः. संयोगाख्यस्यफलस्य गमनरूपत्वेन तज्जन्यत्वाभावात्. गमनाश्रयो ग्रामइति प्रयोगापत्तेश्च ॥

नच ल्युटो भावनावाचकेन व्यापाराभिधानान्नैतादृशप्रयोगाद्यापत्तिः . गम्यर्थवान् ग्राम इति प्रयोगस्यैवमप्यापत्तेः . गम्यर्थजन्यसंयोगाश्रयो ग्राम इति प्रयोगानापत्तेश्च . स्वत्वध्वंसाख्यस्य फलस्य यज्जिपदार्थत्वे तस्यैव फलभावना

करणत्वेन स्वर्गसाधनतापत्तेः , स्थायिनस्तस्मादेव स्वर्गोत्पत्त्युपपत्तावपूर्वक ल्पनानापत्तेश्च । अतोव्यापारमात्रं धात्वर्थः , फलंच द्वितीयार्थ इत्यन्ये, तदपि न— व्यापारत्वेन वाच्यत्वे सर्वधातूनां पर्यायत्वापत्तेः . क्रियात्वादिना विशेषरूपेण वाच्यत्वे त्यजिगम्योःपर्यायतापत्तेश्च. पूर्वदेशविभागानुकूलाक्रिया त्यजेरर्थः. उत्तरदेशसंयोगानुकूला सैव गमेः, तयदि क्रियामात्रं धात्वर्थः फलसामान्यञ्च द्वितीयार्थस्तदा तयोः पर्यायतापत्तिः. अत उभयं फलं व्यापारश्च धात्वर्थः । उभयत्रच प्रत्येकं शक्तिः . नात ओदनादिपदार्थस्यैकदेशान्वयशंका. तयोश्च जन्यजनकभावस्संसर्गः . व्यापारविशेष्यकश्च बोधः. तत्रैव कर्मकारकातिरिक्तसर्वकारकाणामन्वयः . कर्मकारकस्यचफले । व्यापारश्च शरीरनिष्ठः फूत्कारादिरात्मनिष्ठः प्रयत्नादिश्च तत्त्वेन वाच्यः। अनुगतैकधर्मान्तरस्य निर्वक्तुमशक्तेः

नचैवं सर्वकारकव्यापाराणां तत्त्वेन वाच्यत्वे नानार्थकत्वापत्तिः , इष्टापत्तौवासर्वकारकाणां प्रथमान्ततापत्तिः, नानार्थत्वेपि यत्कारकव्यापाराणां यदा विवक्षा तदा तेनामेव बोधस्तदादाविवबुद्धिस्थस्य। तत्कारकस्यैवच तदाप्रथमान्तत्वं. अतएव स्थाली पचतीत्यादिप्रयोगोपिविवक्षायांसङ्गच्छते ॥

अतस्सर्वोपि व्यापारोधात्वर्थः। आख्यातार्थस्तु यगादिविकरणस्थले कर्म . शबादिविकरणस्थले कर्ता . अकर्मकधातूत्तरयगादिविकरणस्थलेचभावरूपो धात्वर्थएव . " लः कर्मणीत्याद्यनुशासनात् . सर्वेषांच धात्वर्थम्प्रति योग्यसंबन्धेन गुणत्वम् . " भावप्रधानमाख्यातमिति स्मृत्या भावपदवाच्यधात्वर्थस्याख्यातार्थं प्रति प्राधान्योक्तेः . प्रत्ययार्थप्रधान्यस्मृतिस्तु सुबादिविषयेति वैय्याकरणाः . तदपिन—फूत्कारत्वादेः पचतीत्यतोऽप्रतीतेः . अभासमानस्यशक्यतावच्छेदकत्वायोगात् . फूत्कारादिकं विनापि चैत्रनिष्ठक्रियान्तरमादाय स्वतस्सिद्धज्वालया जायमाने ओदने चैत्रः पचतीति प्रयोगाच्च . तत्तद्व्यापारस्यतत्त्वेन तत्त्वेनानुभवे याग इच्छा ज्ञानं वेतिवादिविप्रतिपत्त्यनुपपत्तेश्च. अतोनुभूयमानं पाकत्वयागत्वादिकमेव तत्तत्फलोपधायकतावद्व्यापार वृत्त्यखण्डोपाधिरूपसामान्यं पच्यादिपदशक्यतावच्छेदकम् . तत्सत्वे पाकः पाक इत्याद्यनुगतप्रतीतिः प्रमाणम् . फलोपधायकतावच्छेदकतया शक्यतावच्छेदकतयैवा तत्सिद्धिः . फलोपधायकव्यापारत्वादेः प्रमाणान्तरतो बोधः . नंतु शाब्द

बोधः अतएव फलस्यापिनद्वितीयबोधः । अखण्डोपाधिरूपकर्मत्वस्यैव तदर्थतायाः स्थापयिष्यमाणत्वात् . शक्तावच्छेदकंच तत्तद्धातुत्वम् . पाकत्वादिकंच विक्लित्तिजनकव्यापारवृत्त्येव . नतु तत्प्रयत्नादिवृत्त्यपि. पाकंकरोमीत्यादिना यत्नादेः पाकात्पृथग्विवक्षीयमाणत्वात् . ...

नच घञादिसमभिव्याहृतधातोः फलएव शक्तिकल्पनात् पृथग्विवरणोपपत्तिः . अनेकशक्तिकल्पने व्यापारविषयकशक्तिप्रतिबन्ध कल्पने वा गौरवात् . ग्रामो गमनवानिति प्रतीत्यापत्तिभयेन व्यापारप्रतीतेरप्यावश्यकत्वाच्च . ...

अतएव विक्लित्तिजनकव्यापारसमूहएव पाकपदार्थो नतु तज्जनकयत्नादिरपि, तस्य पृथग्विवक्षीयमाणत्वेन पच्यर्थत्वाभावात् . ...

अतएव तेजस्संयोगमात्रं पच्यर्थः, नतु विक्लित्त्यनुकूलव्यापारसामान्यमित्यपि प्रत्युक्तं, अग्निसंयोगानुकूलकृत्यभावत्वत्यपिभक्तविक्लित्त्यनुकूलावस्थावणकर्तरि पचतीतिप्रयोगात् . ...

अतएव पाकात्प्रथग्विवक्षीयमाणयत्नादेर्भासमानस्य भानकारणजिज्ञासायां पारिशेष्यादाख्यातार्थत्वमेव. तस्मिंश्चपाकादेः प्रकारत्वं प्रकृत्यर्थत्वादेव, एवंच प्रत्ययार्थप्राधान्यस्मृतिरपि नसंकोचिता भवति . अत्रच पकाद्यनुकूलव्यापारसामान्यस्यैव प्रत्ययार्थत्वं, पाकं भावयतीति णिजन्तभूधातुना व्यापारसामान्यवाचकेन विवरणात् . यदपि पाकंकरोतीति विवरणम्, तदपि करोतेर्व्यापारसामान्यवाचकत्वादनुकूलमेव . नहि करोतिर्यत्नार्थकः , तथात्वे करोतेर्यततेरिवाकर्मकतापत्तेः . फलव्यधिकरणव्यापारवाचित्वं हि धातोस्सकर्मकत्वम् . फलसमानाधिकरण व्यापारवाचित्वं चाकर्मकत्वम् . पचेः फलं विक्लित्तिरोदनवृत्तिः . व्यापारश्चैत्रवृत्तिरिति व्यधिकरणत्वात्सकर्मकः . स्वापस्य फलं सुखं, तच्चैत्रएवेति द्वयोस्समानाधिकरणत्वमिति सोकर्मकः . तद्यदि करोतियत्योरेकार्थकत्वम् , तदा एकस्यैवार्थस्य फलव्यधिकरणत्वं फलसमानाधिकरणत्वञ्च विरुद्धम् . अतः करोतिरपि व्यापारसामान्यवाच्येव . ....

अतएव रथोगच्छतीत्यत्र रथो गमनं करोतीति विवरणमपि संगच्छते.

अतः करोति भावयतिभ्यां विवरणादाख्यातस्यापि फलोद्देश्यकं प्रकृतधात्वर्थातिरिक्तं व्यापारसामान्यं वाच्यम् . तच्च फलं क्वचिद्धात्वर्थः क्वचित्स्वर्गादीत्यन्यदेतत्. ....

व्यापारसामान्यस्यच विशेषाकांक्षारूपेतिकर्तव्यतांकांक्षायां प्रयाजादिवाक्यैर्विशेषसमर्पणमितिपार्थसारथिः ॥

वस्तुतस्तु तत्तत्फलभेदेन तत्तद्व्यापारभेदेन चानुगतैकलवुभूतशक्यतावच्छेदकाभावात् पचति- पाकं यतते, पाकं करोतीत्यादि विवरणाच्चाख्यातस्य यत्नत्वमेव शक्यतावच्छेदकम् । नच करोतिस्तदनुकूलव्यापारवाची, वातरोगादिना स्पन्दमाने चैत्रे स्पन्दानुकूल विजातीय वायुसंयोगरूप व्यापारवत्यपि नाहं स्पन्दं करोमि, अपितु वातरोगेण मच्छरीरं स्पन्दत इति प्रतीत्या करोतेर्यत्नार्थकत्वप्रतीतेः । यत्नत्वस्य शक्यतावच्छेदकत्वे लाघवाच्च । एवञ्चरथो गमनं करोतीत्यादौ अनुकूलव्यापारैकत्रो लक्षणेति ध्येयं ॥

नच भवत्यर्थ कर्तृ कर्मविशेषात् करोतेर्भावयतिपर्यायत्वं । पर्यायत्वाभावेपि भावयति शक्यतावच्छेदक व्याप्य यत्नत्व शक्यतावच्छेदककत्वेनापि भवत्यर्थकर्तृकर्मकत्वोपपत्तेः ॥

नच करोतेः यत्नार्थकत्वे यततेरिवाकर्मकतापत्तिः । सत्यपि यत्नरूपैकार्थत्वे धात्वर्थतावच्छेदकफलभेदेन सकर्मकत्वाकर्मकत्व व्यवस्थोपपत्तेः । यततेर्हि चैत्रनिष्ठा क्रियैव यत्नसमानाधिकरणं फलं । करोतेस्तु तद्व्यधिकरणम् उत्पत्त्याख्यं धात्वर्थतावच्छेदकं फलं । ततश्च यथैव पचति गच्छत्योर्व्यापाररूपक्रियैकत्वेपि फलभेदादेव व्यवस्था , एवमिहापि व्यापाररूपयत्नैकत्वेपि फलभेदादेव सकर्मकत्वाकर्मकत्वव्यवस्थोपपत्तिः । तत्फलं पुनरुभयत्रापि प्रमाणान्तरावगतमेव धात्वर्थोपलक्षणम् धातुवाच्यमेव वेत्यन्यदेतत्

वस्तुतस्तु एतल्लक्षणस्य कौस्तुभोक्तरीत्या अव्याप्त्यादि दोषदुष्टत्वात् अविवक्षाविरह विशिष्टकर्माकांक्षधातुत्वमेव सकर्मकत्वं, तदभावश्चाकर्मकत्वमित्येवं कौस्तुभोक्तलक्षणंयुक्तम् । अत्रचाकांक्षा समभिव्याहारात्मिका शब्दधर्मः ।

तेन सत्यप्यर्थैकत्वे यथा घटःकर्मत्वमित्यादावनाकांक्षत्वं घटमित्यादौ साकांक्षत्वम्, तथैव यततेः कर्मानाकांक्षत्वं करोतेश्च कर्मसाकांक्षत्वमविरुद्धं । पच्यादेश्च स्वरूपेण कर्मसाकांक्षत्वेप्यविवक्षा दशायामकर्मकत्वादविवक्षाविरहेति । अतएव ओदनस्य पच्यत इति भावेपि प्रयोगः । आसादि धातूनां च स्वरूपेणाकर्मकाणामपि मासादिकालयोगे कर्मसाकांक्षत्वात् सकर्मकत्वाच्चैत्रेणास्य तेमास इति प्रयोगोपपत्तिः । एवमेकस्यैव ग्रथधातोः चैत्रनिष्ठव्यापार वाचित्वरूपधर्मपुरस्कारेण कर्मसाकांक्षत्वात् सकर्मकत्वं, पुष्पनिष्ठव्यापारवाचित्वेन कर्मानाकांक्षत्वादकर्मकत्वञ्चद्रष्टव्यम् । अतो यत्नार्थकत्वेपि करोतेरस्य कर्मत्वाक्षतेस्तेन विव्रीयमाणाख्यातस्यापि यत्नार्थकत्वम् । एवञ्च रथो गच्छति जानाति इच्छति प्रयतते इत्यादौ यत्र यत्नस्य बाधः, तत्रानुकूल व्यापारस्याश्रयत्वस्यवा लक्षणेति द्रष्टव्यं । नश्यतीत्यादौ प्रतियोगित्वे लक्षणा ॥

तत्सिद्धं भाक्तमुख्यसाधारण्येन सर्वत्र धात्वर्थातिरिक्ता भावनाऽख्या तार्थ इति । तस्याश्च शक्ततावच्छेदकं करोतीति विव्रीयमाणाख्यातत्वं, अतश्च भवतीत्यादौ करोतिना विवरणाभावेन भावनाभावात् धात्वर्थएव कारकान्वयः, परंपरासंबंधेनैकत्वान्वयश्चेति प्राचः ॥

वस्तुतस्तु लाघवादाख्यातत्वमेव शक्तावच्छेदकं । भवतीत्यादावा श्रयत्वे लक्षणा । एवंचकारकाद्यन्वये नव्युत्पत्त्यन्तरकल्पनापि । शक्तावच्छेदकञ्च नलत्वं, यथाकथंचिदुपस्थितलकारादपि भावनोपस्थित्यापत्तेः । नाप्यादेशोपस्थापितत्वं, शानजाद्यादेशोपस्थापितलकारादपि शक्त्या भावनाबोधापत्तेः । नापि तिबाद्यादेशोपस्थापितत्वं, तथात्वे तिबादीना मनेकेषां प्रवेशात् शक्तावच्छेदकानामननुगमेन शक्त्यनेकत्वापत्तेः । तद्वरं तिप्त्वादिनैव प्रत्येकं शक्तिः । अतएवतिप्त्वादिना लकारानुपस्थितावपि शाब्दबोधः । अन्यथाऽनेकेषु तिबादिषु तावतां शक्तिभ्रमाणां कारणत्वकल्पने गौरवात् ॥

एतेनाख्यातत्वमेवैकं शक्तावच्छेदकम् । तच्च शक्यत्वसंबंधेनाख्यातपदवत्त्वं । तद्वत्त्वंच तिबादिष्विति ते शक्ता इत्यप्यपास्तं, तिप्त्वादिषु आख्यातपदवाच्यत्वाज्ञानेपि तिप्त्वेन पचतीत्यादौ ज्ञानेपि भावनाबोधात् ॥

अतस्सिद्धमाख्यातार्थो भावनेति । तस्याश्च धात्वर्थस्य प्रकारत्वेनान्वयः । प्रत्ययार्थ प्राधान्यस्मृतेः संकोचे प्रमाणाभावात् । भावप्रधानमित्यस्याख्यातार्थे ष्वनेकेषु कस्यप्राधान्यमित्यपेक्षिते भावपदवाच्यभावना प्राधान्यमित्यपेक्षिता र्थविधायकत्वोपपत्तौ प्रत्ययार्थप्राधान्यस्मृतिसंकोचानुपपत्तेः । अतो निरुक्त स्मृतौ भावपदेन वैयाकरणपरिभाषितधात्वर्थस्य न ग्रहणमित्युक्तमेव ।

नच प्रत्ययार्थप्राधान्यस्मृतेः सुबाद्यर्थलिंगसंख्यादेः प्रकृत्यर्थं प्रति प्र कारतया संकोचावश्यकत्वे यत्र करणत्वादौ प्रमाणान्तरेण प्रकृत्यर्थं प्रति प्राधान्यं प्रमितं तदनुवादमात्रतया भावनाविषयेपि बाधकाभावः, 'प्रत्ययार्थं सह ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येने' त्येकवचनश्रवणेन प्रत्ययार्थत्वसामानाधि करण्येन प्रकृत्यर्थं प्रति प्राधान्यनियमात् सुबाद्यर्थलिंगसंख्यादीनामप्राधान्येपि क्षतिविरहात् ॥

वस्तुतस्तु लिङ्गसंख्यादीनामपि प्रत्ययार्थान्तराणां न प्रकृत्यर्थप्रकार ता, अपितु समानाभिधानश्रुत्या करणत्वादिरूपप्रत्ययार्थान्तरम्प्रत्येवेतिवक्ष्यते ॥

अतस्सिद्धं धात्वर्थस्य भावनायां प्रकारतेति । धात्वर्थश्च क्वचिच्छक्या र्थएव प्रकारः । यथा -"सोमेनयजेते"त्यादौ । क्वचिल्लक्ष्यार्थएव । यथा-"अग्नीषो मीयं पशुमालभेते"त्यादौ यागः । लक्ष्यार्थोपि क्वचिच्छक्यार्थयुक्तः । यथा -"पृ ष्ठैरुपतिष्ठत " इत्यादौ । आत्मनेपदानुरोधेन समीपस्थितिरूपशक्यार्थविशिष्टम भिधानम् ॥

वस्तुतस्तु "सोमेन यजेते"त्यादि तत्तद्विधिष्वपि विजातीययागत्वादिनै वलक्षणेति शक्यार्थान्वयोन्यत्रानुसंधेयः । तस्यच क्रतौ संसर्गानानुकूलत्वं । पचति पाकं करोतीति पाककर्मत्वस्यैव विवरणबलेन संसर्गत्वप्रतीतेः । अत एवौदनं पचतीत्यादौ पाकेनौदनं करोतीति विवरणात् पाककरणत्वस्यापि प्रतीतेस्तस्यापि संसर्गत्वं । अतश्च कर्मत्व करणत्वान्यतरसंसर्गेणैव सर्वत्र भावनायां धात्वर्थस्यान्वयः ॥

यद्यपि क्रतिं प्रति पाकस्य करणत्वं बाधितं, कृतिसाध्यत्वाापाकादेः ।

तथापि स्वनिष्ठकरणत्वनिरूपकौदनोद्देश्यकत्वसंबंधेन पाकस्य कृतावन्वयात् करणत्वस्यापि संसर्गघटकतया संसर्गत्वोपपत्तिः । अस्तिचौदनस्यापि कृता वुद्देश्यताख्या विषयतेति नैतादृशसंसर्गबाधः । तत्रच यत्र विध्यश्रवणं तत्र द्वितीयान्तपदाद्यश्रवणे पचति चैत्र इत्यादौ धात्वर्थस्येष्टसाधनत्वाज्ञानेपि तस्य कर्मत्वमेव, आख्यातोपात्तभावनायाः करोत्यर्थतया तद्वदेव सकर्मकत्वनि यमात् । अत एवा कर्मकधातुस्थलेपि आख्यातोपात्ताया भावनायाः सकर्मक त्वमेव । अतएव तस्यास्तदाकांक्षायां स्वास्थ्यकामश्शयीते त्यादौ कामपदोपा त्तस्वास्थ्यादेरेव कर्मत्वेनान्वयः । स्वर्गकामपदेनेव लक्षणया स्वर्गादेः । धातुस्त्वकर्मकएव । अतएवात्र न भावना कर्मणिद्वितीया, सातु धात्वर्थकर्मण्येव । स कर्मकधातुस्थले यथा-"व्रीहीनवहन्ती"त्यादौ, तत्र तेषां प्रथमतो भावनायां कर्म त्वेनान्वयेपि पार्ष्ठिकं धात्वर्थेपि कर्मत्वमितितेषां धातूनां सकर्मकत्वोपपत्तिः । अतो भावनाया नित्यसकर्मकत्वात् पचति चैत्र इत्यादिनिरुक्तस्थले भाव नायाः कर्माकांक्षायां समानपदश्रुत्याधात्वर्थस्यैव कर्मत्वं । लौकिकवाक्यत्वाच्च तस्य वैय्यर्थ्येपि न दोषः, वेदेतु विध्यन्तरैकवाक्यत्वादिना स्तावकत्वाद्य संभवेन स्वाध्यायविध्यवगत प्रयोजनवत्त्वानुरोधेन लडादेरेव लेट्त्वं लेडर्थ कत्वंवा लक्षणया परिकल्प्य भावनाया स्वर्गादिभाव्यान्तरपरिकल्पनया धात्वर्थस्य तत्र करणत्वेनान्वयः । विधेः प्रवर्तकत्वान्यथानुपपत्त्या तत्साभि व्याहृतायां भावनायामिष्टभाव्यकत्वावश्यंभावात् । घटं घटज्ञानयेत्यादौ च कारं विना कर्मद्वयान्वयादर्शनात् करोतेरिवाख्यातोपात्तभावनाया अपि एककर्मकत्वनियमेन यागादेरपि तस्यां कर्मत्वा नुपपत्तेश्च । अतएव यत्र वि धिसमभिव्याहारस्य सत्त्वे असत्त्वेवा द्वितीयादिना भाव्यान्तरं निर्दिष्टं,यथा - "व्रीहीनवहन्यात्"ओदनं पचतीत्यादौ,तत्र धात्वर्थस्य करणत्वमेव । यत्रातु तादृश स्थलेअप्राप्तकरणान्तर सत्त्वं धात्वर्थस्यच प्रकरणादिना प्राप्तिः, यथा- " गोदोहनेन पशुकामस्य प्रणयेत् ,, " दध्नेन्द्रियकामस्य जुहुया ,,दित्यादौ, तत्राश्रयत्व या प्रकरणप्राप्त धात्वर्थानुवादमात्रम् । साधुत्वसिद्ध्यर्थं धातुः । नतु तदर्थ स्य करणत्वे नान्वयः । नवाश्रयत्वेन, कर्मत्वातिरिक्तस्याश्रयत्वस्य निर्वक्तुम शक्यत्वेन भावनायामिंद्रियरूपकर्मावरुद्धायां होमस्यापि कर्मत्वेनान्वये एककर्म

कत्वभङ्गापत्तेः । अतएवानेकोद्देश्यनिमित्तवाक्यभेदेपि एककर्मकत्वभङ्गएव दूषकताबीजमुक्तं कौस्तुभादौ । एककर्मकत्वञ्च-नैककर्मत्वकत्वं एककर्मत्वाश्रयकर्मकत्वंवा, " सर्वेभ्योदर्शपूर्णमासौ „ घटानानयेत्यादौ तदनापत्तेः। तत्र पुत्रादिवृत्तिकर्मत्वानां कर्मत्वाश्रयपुत्रादीनांवानेकत्वात् । नाप्येककर्मत्वावच्छेदककत्वं " सर्वेभ्योदर्शपूर्णमासावि त्यादौ " व्रीहीन्प्रोक्षती „ त्यादौच तदनापत्तेः। तत्र पुत्रत्वपशुत्वादीनां तदपूर्वसाधनत्वानांच कर्मतावच्छेदकानां भेदात्. किंत्वेक बोधविषयकर्मत्वपर्याप्तयधिकरणतावच्छेदकधर्मवत्त्वमित्युक्तं कौस्तुभे । निरुक्तस्थलेवुच सर्वत्र कर्मत्व पर्याप्तयधिकरणतावच्छेदक धर्माणामेकेन पदेनैकस्यैव समूहालम्बनात्मकस्य बोधस्य जननात् एककर्मकत्वोपपत्तिः । "अध्वर्युयजमानौ वाचं यच्छत„ इत्यत्र चाध्वर्युत्व यजमानत्वयोः कर्मत्वाधिकरणत्वावच्छेदकयोरेकबोधविषयत्वाभावात् द्विकर्मकत्वापत्ति रतः " पर्याप्तीति „ । तत्र द्वंद्वोत्तरविभक्तया देवतात्वादेरिव कर्मत्वादेरपि व्यासज्यवृत्तित्वावसायात् तत्पर्याप्तयधिकरणतावच्छेदकधर्मस्याध्वर्युयजमानोभयत्वस्य द्वन्द्वजन्यैकबोधविषयत्वेनैककर्मत्वोपपत्तेः, उपपादितं चैतत् कौस्तुभादौ । एवं शुक्लंघटमानयेत्यादौ शुक्लस्य घटे अभेदान्वयात् पदद्वयेन, घटपदेनैववा शुक्लगुणविशिष्ट घटलक्षणादेककर्मत्वोपपत्तिः । एवं घटं पटंचानयेत्यादौ इतरेतरयोगार्थक चकाररूप तात्पर्यग्राहकानुरोधेन द्वितीयान्तपदद्वये लक्षणया तदुपपत्तिः । यथाचैवंसति निमित्तद्वयस्थले उद्देश्यानेकत्वनिमित्तकवाक्यभेदस्य दूषकताबीजं एककर्मकत्वभङ्गापत्तिः तथा कौस्तुभे व्यक्तं ॥

तत्सिद्धं यत्र द्वितीयादिना भाव्यान्तरं भावनायां अन्वययोग्यमुपात्तं, तत्र नधात्वर्थस्य कर्मत्वमिति, यत्रतु तदुपात्तं धात्वर्थस्य चेष्टसाधनत्वं प्रमाणान्तरेण प्रमितं तत्र स्ववाक्यविधेयगुणान्तरसत्त्वे धात्वर्थस्य कर्मत्वमेव यथा - "दध्नाजुहोती" त्यादौ ॥

नचैवं "जुह्वाजुहोती" त्यादौ जुहोतेस्सकर्मकत्वात् कर्मान्तरावश्यंभावे न भावनायाः द्विकर्मकत्वापत्तिः । सकर्मकस्यापि भावाख्यात इत्र कर्मा विवक्षोपपत्तेः । एतादृशेपि विषयेयदि तृतीयान्तनामधेयश्रवणं तदा करणत्व मेव, यथा - "समे दर्शपूर्णमासाभ्यांयजेत„ " उच्चैःप्रवर्ग्येण „ त्यादौ । यत्रतु

तादृशगुणश्रवणाभावः, तत्र धात्वर्थस्यैव कर्मत्वेन प्रयोजनान्तरार्थमनुवादः, यथा - विद्वद्वाक्ययोः. तदभावेतु " तनूनपातंयजती त्यादौ कर्मान्तरमेव करणत्वेनेत्याद्याकरेव्यक्तं. यत्रतु नेष्टसाधनत्वं प्रमितं, स्ववाक्येचोद्भिदादिवन्नवातृतीयान्तनामधेयश्रवणं यथा— " सोमेनयजेत,, "अग्निहोत्रंजुहोती,, त्यादौ, तत्र स्ववाक्ये इष्टविशेषानवगमेपि विधिबलेन भावनाया इष्टभाव्यकत्वावगमात् इष्ट सामान्यस्यैव तत्रभाव्यत्वमङ्गीकृत्य धात्वर्थस्य करणत्वमेव अग्निहोत्रमित्यत्र द्वितीयापि तत्र करणत्वलक्षणार्थेवेति सांप्रदायिकाः. एतादृशेविषये समानपदश्रुत्या भावनापेक्षितं कर्म धात्वर्थ एव, सुतराम् अग्निहोत्रमिति द्वितीयान्तश्रवणे । नच इष्टसाधनत्वेनाज्ञातस्य कर्मत्वानुपपत्तिः, अनीप्सितकर्मत्वेनान्वयोपपत्तेः. नच विधेः प्रवर्तकत्वव्याप्यातः, विध्यवगतेष्टभाव्यकत्वज्ञानस्य प्रवृत्तिं प्रति कारणत्वेपि शाब्दबोधं प्रत्यकारणत्वात्, तदभावेपि होमकर्मकभावना शाब्दज्ञानोपपत्तेः. नच भाव्यत्वेनान्वितस्य तस्य भाव्यान्तरानाकांक्षत्वात् फलवाक्येपि स्वर्गसाधनत्व बोधानापत्तिः । साधनत्वेनान्वितस्यार्थाद्विध्यनुरोधेन कृतिसाध्यत्वज्ञानवत् कृतिसाध्यत्वेन बुद्धस्यापि विध्यपेक्षानुरोधेनैव इष्टविशेषसाधनतायां वाक्यान्तरेण विश्वजिन्न्यायेनवा बोधोपपत्तेः. अत उत्पत्तिवाक्ये धात्वर्थस्य-कर्मत्वेनैवान्वय इतिप्रभाकरोक्तमपि युक्तमिति तर्करसिकाः.

सर्वथा सिद्धं धात्वर्थस्य कर्मत्वकरणत्वान्यतरसंसर्गेण भावनायां प्रकारतेति .

सांप्रदायिकास्तु धातुना स्वार्थवृत्तिकर्मत्वकरणत्वान्यतरत् लक्षणया प्रतिपाद्यते. तस्यैव स्वनिरूपकत्व स्वनिरूपकोद्देश्यकत्वान्यतर संसर्गेण भावनायामन्वयः. नतु कर्मत्वादेरपि संसर्गत्वम्. तथात्वे " प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत " इति साहित्यरूपान्वयानुशासन वैयर्थ्यापत्तेः. नहि पदार्थानुशासनप्रवृत्तानां तेषामन्वयानुशासकत्वं युज्यते. अतः कर्मत्वकरणत्वादि रूपान्वयोपि वृत्त्यैव पदार्थविधयाभासते. अतएव ज्योतिष्टोमेनेति तृतीयापि पदार्थविधया भासमान करणत्वानुवादिकेति संगच्छते. विशेषणविशेष्ययोः

प्रकारतया भासमानकारकवत्त्वस्यौत्सर्गिकत्वा दित्याहुः. तत्सिद्धं धात्वर्थस्य स र्वत्र भावनायां प्रकारतेति. सा परं आख्यातोपात्ता कृदाद्युपात्ताच लिंगान्वयिनीति वक्ष्यते. तेन वस्तुपदोपात्तायां भावनायां नान्वयः.

एवं सुबर्थस्यापि लिंगसंख्याभिन्नस्य तस्यामेवान्वयः प्रकारतयेतिज्ञेयं. तथाहि — प्रथमार्थस्तावल्लिंगसंख्याभिन्नः तस्यां प्रकारत्वेनान्वेति. नच तस्याः साधुत्वमात्रार्थमुच्चारणेन तदर्थेमानाभावः, संबोधनेभिमुखत्वस्यापि भा समानत्वेन तदसिद्धेः. तच्च प्रकृतशाब्दबोधाश्रयत्व प्रकारक वक्तृभिन्न वि शेष्यक वाञ्छिच्छाविषयीभूत शाब्दज्ञानवत्त्वम्. प्रकृतशाब्दबोधनिष्ठ विषयितानिरूपित वक्तृभिन्ननिष्ठ वाञ्छिच्छाविषयतावत्त्वंवा. युष्मत्पदशक्यतावच्छेदकंच तदेव. अस्तिचेदं देवदत्त गामानयेत्यादौ, देवदत्त चैत्रो गामानयतीत्यादौच. तस्य उक्तविधज्ञानवत्त्वात्.

नच यत्र स्नुषां बोधयितुं कन्यासंबोध्यवाक्यप्रयोगः, तत्र स्नुषायाम तिव्याप्तिः. तत्र स्नुषाया स्संबोध्यत्वेपि तत्संबोधनस्य शाब्दतात्पर्यविषयत्वाभावेन तस्यां संबोधनप्रथमानापत्तेः. तात्पर्यविषयत्वसत्त्वेच भवत्येव सा. अतएव चेतनएव संबोधनं मुख्यम्. अचेतनेतु ज्ञानवत्त्वारोपेण गौणो व्यवहारः. अतएवाद्योदाहरणेऽभिमुखत्वं कर्तृत्वंचेत्युभयं प्रथमार्थः.

तत्र चाधेयत्वंप्रातिपदिकार्थसंसर्गः, तयोश्चविषयत्वनिरूपकत्वाभ्यां भावनायामन्वयः. अन्येचाभिमुखत्वस्यैव विषयत्वसंसर्गेण । चैत्रमैत्रः कीदृश इत्यादावपि " अस्तिर्भवती,,त्यादिना क्रियापदाध्याहरस्या वश्यकत्वाच्छाब्दबोधाविघातः । चैत्रमैत्रोग्रामंगच्छतु इत्यादौतु लोडर्थप्रार्थनाविषयीभूतायां भावनायां निरुक्तसंबंधेनसंबोध्यत्वस्य स्वरूपसंबंधेन स्वनिष्ठव्यापारप्रयोज्यत्वस्यचान्वयः. प्रतीत्यनुसारेण तत्तदर्थकलोडादेरेवतात्पर्यग्राहकत्वात् । अत्रच - प्रथमादेशविशेषाणामेव संबोधनेशक्तिः प्रथगनुशासनबलात्, हेशब्दादिकंतात्पर्यग्राहकं, व्यापारप्रयोज्यत्वादौतु लक्षणैव । चैत्रमैत्रोग्रामंगच्छती त्यादौ प्रथमांतेच तार्किकमतेपि भावनाविशेष्यत्वंनास्ति, प्रथमार्थरूपान्वयविशेषणत्वात्. तत्रा ख्यातोपात्तसंख्यान्वयाभावाच्च । अतस्तैस्संबुद्धिभिन्न प्रथमांतपदजन्योपस्थितिरेव-

भावनान्वयप्रयोजकेतिवाच्यं. नचतदपि वक्तुंशक्यं चैत्रगामानयेत्यादौ तदनापत्तेः॥

नच तत्रत्वंपदाध्याहारः, तथात्वे भो ब्राह्मणाः त्वंपचेति प्रयोगापत्तिः । नच युष्मदर्थकर्तृसंबुद्ध्योरेकसंख्याकत्वं, व्युत्पत्त्यंतरकल्पनापत्तेः । एतेनाभिमुखत्वादेः सर्वत्रप्रातिपदिकार्थप्रकारत्वमित्यप्यपास्तं. चैत्रमैत्रःपचतीत्यादौचैत्रेभावनाद्यन्वयापत्तेः ॥

वस्तुतस्तु अस्मन्मतेपि चैत्र मैत्रः पचतीत्यादौचैत्रस्य कर्तृत्वेनभावनान्वयस्य निवारयितुमशक्यत्वात् सर्वत्र संबोधनमेव संबुद्धिप्रथमाया अर्थः । नतुकर्तृत्वमपि, चैत्र पचेत्यादौ मध्यमपुरुषस्थले आख्यातेन संबोध्यावद्धयक्तेरेव कर्तृत्वेन लक्षणान्नसंबोद्ध्यातिरिक्तस्य कर्तृत्वप्रसङ्ग इतिध्येयं । अतो द्वितीयादिसाधारण्येन प्रथमासुबर्थस्यापि प्रकारत्वमेव सर्वत्र युक्तम् ।

नच प्रथमायाः लिङ्गसंख्ययोरिव संबोधनरूपार्थवत्त्वेपि तदतिरिक्तार्थाभावात् चैत्राः पचतीत्यादौ प्रातिपदिकार्थातिरिक्तस्य विशेष्यभूतार्थस्याभावेन कथं द्वितीयादिसाधारण्येन सर्वत्र प्रथमार्थस्य प्रकारत्वमिति वाच्यम् , असंबुद्धिप्रथमाया अपि अनुशासनबलेनलिङ्गसंख्याव्यतिरिक्तार्थवाचित्वावगतेः । तथाहि पाणिनिमतं तावत् "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" (२-३-४६) इतिसूत्रात् प्रातिपदिकार्थ एव, इदंहि लिंगाद्यंशे शक्यत्वानुशासनवत् प्रातिपदिकार्थांशेपि शक्यत्वानुशासनमेव, नतु प्रातिपदिकार्थे प्रातिपदिकेन विवक्षते प्रथमायास्साधुत्वमित्येवंपरं, वैयर्थ्यापत्तेः । वैरूप्यापत्तेश्च । अतश्च-प्रातिपदिकार्थश्चैत्रादिरेव प्रथमार्थः ॥

नचैवमपि तस्य प्रातिपदिकेनैव बोधसिद्धेः प्रथमायास्तदंशे साधुत्वार्थमनुवादकतया न प्रथमार्थस्यान्यत्रप्रकारतेति वाच्यं, प्रातिपदिकस्यैव प्रथमार्थ विशेषतात्पर्यग्राहकत्वांगीकारेण प्रथमार्थस्यान्यत्र प्रकारत्वे बाधकाभावात् । इतरथा सुबर्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति धात्वादिपदजन्योपस्थितिः कारणमित्येवंविध कार्यकारणभावे प्रथमातिरिक्तत्वप्रवेशेगौरवात् । प्रकृत्यर्थस्य प्रत्ययार्थं प्रति प्रकारत्वे प्रथमान्त प्रातिपदिकातिरिक्तत्वप्रवेशेगौरवाच्च । आख्यातार्थभावनादेः प्रथमान्तार्थं प्रति प्रकारत्वे व्युत्पत्त्यन्तरकल्पनापत्तेश्च ।

अतो लाघवात्तुबर्थत्वेन प्रथमार्थस्यापि चैत्रादेराख्यातार्थभावनायामेव प्रकारता । अतएवैतादृशे विषये प्रकृत्यर्थस्य चैत्रादेर्न प्रथमार्थचैत्रादावन्वयः; प्रकृतिप्रत्ययार्थयोर्व्युत्पन्नस्य भेदान्वयस्यं बाधात्, अभेदान्वयस्य चाव्युत्पन्नत्वात् । अतः प्रातिपदिकं तत्र प्रथमार्थविशेषतात्पर्यग्राहकमेव । प्रथमोपस्थापितस्तु सएवाख्यातार्थभावनान्वयी । नचैवमाख्यातपदाभावे तस्यानन्वयः। काष्ठैरोदनमित्यादौ क्रियापदाध्याहारेणेव नीलो घट इत्यादावपि अस्तीत्यध्याहारस्यानुशासनशिष्टतया सुतरामुपपत्तेः । नीलपदस्यापि वक्ष्यमाणरीत्या नीलगुणे नीलत्वजातौवा शक्तस्य लक्षणया लक्षितलक्षणयावा नीलत्वावच्छिन्नगुणविशिष्टद्रव्यपरस्य तात्पर्यग्राहकत्वात्, तदुत्तरप्रत्ययोक्तस्य तद्द्रव्यस्यापि न घटेन सहाभेदेनान्वयः , अपितु घटवदेवास्तीत्याख्यातोपात्तभावनायामेव, एकव्युत्पत्त्यैव शाब्दबोधोपपत्तेः । इतरथा विशेषणवाचकनामार्थस्याभेदसंबंधेन नामार्थान्तरान्वयकल्पनात्तदुत्तरद्वितीयादिविभक्तेरपि साधुत्वार्थकत्वकल्पना, प्रकृत्यर्थस्य प्रत्ययार्थेन्वयव्युत्पत्तेश्च विशेषणवाचकप्रकृतिभिन्नविषयत्वकल्पनेत्येवं गौरवापत्तेः । ....

नच नीलघटयोरभेदानुभवानुरोधेन गौरवांगीकरणमपि न दोष इति वाच्यम् । प्रथमाद्वयार्थस्य नीलगुणविशिष्टस्य घटस्यच कर्तृतासंसर्गेण शाब्दबोधे भावनाविशेष्यके जाते पश्चाद्घटस्य परिच्छेदकीभूतगुणापेक्षायां गुणविशिष्टस्यच जात्यपेक्षायां मानसोऽभेदानुभव इति पार्ष्टिकबोधमादायानुभवोपपत्तेः ॥ ....

नच शब्दादभासमानस्याभेदस्य वेदोत्थज्ञानविषयत्वाभावात् , अरुणैकहायनीत्यत्रारुण्यस्यैकहायन्यामन्वयाकरणेपि दोषाभावापत्तिः । वेदापेक्षितार्थविषयकस्य मानसस्यापि ज्ञानस्य वेदतात्पर्य विषयतया वेदार्थत्वात् । नहि वेदपदवृत्तिविषयत्वं वेदजन्यशाब्दबोधविषयत्वमेववा वेदतात्पर्यविषयत्वप्रयोजकं । तथात्वे " इमामगृह्णन्नशनामृतस्येत्यश्व भिधानीमादत्ते " इत्यत्र शाब्दबोधे मन्त्राश्वाभिधानीसंबंधमात्रस्यैव विषयीकरणात् , तस्यच लिङ्गकल्प्यश्रुत्यैव सिद्धावेतद्वाक्यवैय्यर्थ्यापत्तेः , तत्परिहारार्थमनुमीयमानस्य लैङ्गिकश्रु

त्यभावस्यापि वेदतात्पर्यविषयत्वानापत्तेः, परिसंख्याफलकत्वानापत्तिः । अत एवेदापेक्षाशामकज्ञानविषयत्वमेव वेदतात्पर्यविषयत्वप्रयोजकम्, तच्चगुणविशिष्टद्रव्यस्य एकहायन्यादेश्चाभेदेपि अक्षतमेव । आवश्यकं चैतत् परेषामपि, इष्टसामान्यसाधनत्वस्यैव लिङर्थत्वात्, स्वर्गादिपदार्थस्यच कामनाविशेषणत्वेन इष्टे अभेदान्वयानुपपत्तेः, इष्टसाधनीभूतयागानुकूलकृतिमान् स्वर्गकाम इति शाब्दबोधस्यावश्यकत्वात् । तदुत्तरमिष्टे स्वर्गाभेदबोधो मानस एव शास्त्रतात्पर्यविषय इति, एतादृशतात्पर्यविषयीभूतबोध एव चेष्टे स्वर्गभेदनिश्चयप्रतिबद्धः नतु शाब्दबोध इति त्वयाप्यङ्गीकार्यमिति न ममैव तत्रोद्यावकाशः । ....

यदितु त्वया एतादृशदोषभिया स्वर्गादिसाधनत्वमेव शक्त्या लक्षणयावा लिङर्थः, स्वर्गादिपदंच तात्पर्यग्राहकमित्यभ्युपेयते, तदा मयापि नीलपदोत्तरप्रथमार्थस्य गुणविशिष्टद्रव्यस्य स्वाभिन्नघटवृत्तिकर्तृत्वसंसर्गेणभावनान्वयः, घटपदंच संसर्गेपि तात्पर्यग्राहकं, घटपदोत्तरप्रथमार्थस्य स्ववृत्तिकर्तृत्वेनेति शक्यम् वक्तुं, ततश्चाभेदस्यापि शाब्दत्वोपपत्तेः न कश्चिद्दोषः ॥

केचित्तु विशिष्टविध्यादौ विशेषणविध्यादिवाचक पदसमूह कल्पनावदभेदबोधक वाक्यान्तरकल्पनैवेत्याहुः । सर्वथा प्रथमार्थस्य भावनायाः द्वितीयादिसाधारण्येन भेदसंबंधेन प्रकारतेतिसिद्धम् । ....

एतेन चैत्रादे र्नामार्थस्य प्रथमार्थस्यैववाक्यात्तोपात्त कर्त्रादावभेदान्वय इतिवैय्याकरणमतमप्यपास्तम् । व्युत्पत्त्यन्तरकल्पने प्रमाणाभावात् ।

यत्तु स्तोकं पचतीत्यादौ नामार्थस्य स्तोकस्य पाके अभेदान्वयार्थं अभेदसंबंधेन निरर्थकसुप्समभिव्याहृत नामार्थप्रकारकशाब्दत्वावच्छिन्नम्प्रति निरुक्तनामसमभिव्याहृत पदजन्योपस्थितिः कारणमिति कार्यकारणभावस्यावश्यकत्वात्, तेनैवचैत्रादेः योग्यतया कर्त्रादावभेदेनान्वयोपपत्तिरिति । तन्न- चैत्रपदोत्तरप्रथमायाः निरर्थकत्वस्य पाणिन्यादिविरुद्धत्वात् । स्वलेख्व न विरुद्धत्वाच्च । स्तोकप्रातिपदिकार्थः स्तोकत्वं, द्वितीयार्थो लक्षणया आ

श्रयत्वं तस्यच साक्षात् परंपरयावा पाकादौ भावनायांचान्वयान्न निरर्थकसुप्त्वमिति तादृशव्युत्पत्तिकल्पनाया असिद्धेश्च । यस्यापि स्तोकत्वविशिष्टं प्रातिपदिकार्थः, तस्यापि मते अभेदो लक्षणया द्वितीयार्थः, सच स्तोकप्रतियोगिकान्योन्याभावाभावरूपः स्तोकत्वमेव, तस्यचभेदसंबंधेनैव पाकादावन्वयः । द्रव्यत्वा वच्छिन्नवृत्तिद्रव्यत्ववान् पट इतिवच्च स्तोकत्वावच्छिन्नवृत्तिस्तोकत्ववान् पाकादिरिति शाब्दबोध इति कनामार्थस्याभेदसंबंधेनान्वयः, कवा द्वितीयाया निरर्थकत्वं ॥ ....

नच लक्षणादोषभिया व्युत्पत्त्यन्तरकल्पनम् द्वितीयाया निरर्थकत्व कल्पनञ्च नदोषः । तथात्वे चैत्रो जानातीत्यादौ आश्रयत्व लक्षणाया श्शिरोमणिसम्मताया अनापत्तेः । अत्रापि कृत्यविषयीभूतार्थकधात्वर्थस्य व्युत्पत्त्यन्तरेणैव नामार्थप्रकारत्वोपपत्तेः । लक्षणायाः फलमुखत्वाच्च । अन्यथा लक्षणोच्छेदापत्तेः । तस्माद्युक्तंप्रथमार्थस्यापि कर्तृत्व कर्मत्व रूपसंसर्गेणाख्यातार्थभावनायामन्वयः, प्रातिपदिकंच तात्पर्यग्राहकम्, लिङ्गसंख्यान्वयश्च प्रथमार्थ एवेति । इति सर्वमनवद्यम् ॥ ....

संसर्गश्च आख्यातनिपातोपात्तकर्तृत्वकर्मत्वमेव, नतु कृदाद्युपात्तमपि, तेन पाठकश्चैत्रः पचतीत्यत्र चैत्ररूपप्रथमार्थस्य पाकक्रिया कर्तृत्वसंसर्गेणैवान्वयः, अतएवाख्यातोपात्तभावनायामेव, योग्यत्वात् । नतु लिंगानन्वयित्वेपि कृदुपात्तायां पाठकृतौ, तस्यामाख्यातोपात्त कर्तृत्व संसर्गेणायोग्यत्वात् । एतादृशसंसर्गविवक्षानंगीकारेच्च चैत्रः पाठकेन पच्यते ओदन इत्यस्याप्यापत्तेः । अतः चैत्रः पाठकर्ताच द्वावपि पाककृतावेव तन्निरूपितकर्तृत्वसंसर्गेणान्वयेते, तयोः परस्पराभेदभानंतु पूर्ववत् । चैत्रस्य पाठकृत्या श्रयत्वभानंतु सर्वमतेमानसमेव । एवं पक्व ओदनो भुज्यत इत्यत्रापि ओदनरूपप्रथमार्थस्य भोजनकृतिनिरूपितकर्मत्वसंसर्गेण भोजनकृतावेवान्वयः, नतु पाककृतिकर्मत्वेन पाककृतौ तदुपात्तायां, तथात्वे ओदनः पक्वं चैत्रो भुङ्क्त इत्यस्याप्यापत्तेः । अतस्तत्रापि पूर्ववदेवान्वयः । चैत्र इव मैत्रोगायति " विपवृक्षोपि संवर्द्ध स्वयं छेत्तुमसांप्रत " मित्यत्राख्यातो

पात्तकर्तृत्वकर्मत्वाभावेपि इवादिनिपातोपात्तकर्तृत्वकर्मत्वसंसर्गेण तदुपात्तभाव नायां लिंगान्वयरहितायां चैत्रवित्रवृक्षयोः प्रथमोपात्तयोरन्वयाच्च, "निपातेति"।

तदेवं पाणिनिमते प्रथमार्थनिष्कर्षः ॥ ....

* कात्यायनस्तु न प्रातिपदिकार्थे प्रथमा । तथात्वे प्रातिपदिकस्य तात्पर्यग्राहकत्वमात्रकल्पनया शाब्दबोधजनकत्वानापत्तेः । अपितु अभिहित कारकत्वमेव प्रथमार्थः । तस्मिंश्च कर्तृत्वादिरूपे प्रथमार्थे प्रातिपदिकार्थश्चैत्रादिर्भेदसंबंधेनैवान्वेति । संख्यादिकंचद्वितीयान्त पद इवेति न क्वापि व्युत्पत्त्यन्तरकल्पना । कर्तृत्वादिकंच सुबन्तरार्थवदेव क्रियापदार्थ इति न तत्रापि सा ॥ ....

नच कर्तृत्वादेराख्यातावगतस्य भावनायामन्वितत्वात् पुनर्बोधवैय्यर्थ्यं । चैत्रत्वावच्छिन्नवृत्तित्वेन तस्याख्यातेनानवगमात् सार्थक्योपपत्तेः ॥

नच तथापि आख्यातजन्यस्य सामान्यधर्मप्रकारकबोधस्य वैय्यर्थ्यं । तस्य प्रथमोत्पत्तिप्रयोजनकत्वात् । इतरथा तृतीयाद्यापत्तेः । नहि कृत्याद्यभिधानमात्रं तत्प्रयोजकं । भावाख्यातेपि चैत्रेण सुप्यत इत्यादौ कृज्ञाविवरणेन कृत्यभिधानात्प्रथमापत्तेः, अतःकर्तृत्वाद्यभिधानमेव प्रथमाप्रयोजकं । तच्च शक्तया लक्षणया वेत्यन्यदेतत् । तस्मादभिहितकारकत्वं प्रथमार्थः ॥

नच प्रासाद आस्ते पक्वं भुङ्क्ते इत्यादौ कृत्प्रत्ययेनाधिकरणत्वकर्मत्वयोरुक्तत्वात् प्रथमापत्तिः । तिङ्निपाताभिहितकर्तृत्वकर्मत्वयोरेव प्रथमार्थत्वात् । प्रासाद इत्यत्र सदि धातूत्तरघञ्जा अधिकरणत्वाभिधानेपि सप्तम्यविरोधात् । पक्वमित्यत्र क्तप्रत्ययेन कर्मत्वाभिधानेपि द्वितीयाया अविरोधाच्च । तिङ्निपातोदाहरणानि पूर्वमेव प्रदर्शितानि । ....

नन्वेवं तिङ्निपाताभिहिते कारके प्रथमा, तदनभिहितेतु तृतीयादिरित्यर्थापत्तेः, तिङर्थान्वयिनि चैत्रादौ प्रथमोपपत्तावपि कर्त्रर्थकक्तदुपात्तभावनान्वयी विवक्षितेतृतीयापत्तेः, चैत्रेण पाचकोभुङ्क्त इति प्रयोगापत्तिः । नहि क्तदुपात्तभावनायां कारकाणामनन्वयः । काष्ठै स्थाल्यामोदनस्य पाचकोनं भुङ्क्त इत्यादौ काष्ठादीनामन्वयदर्शनात् । अतश्च तद्वदेव कर्तृकारकस्यापि अन्वयोपपत्तेः, त

त्रच तिङुपात्तक्रियान्वयविवक्षाभावेन प्रथमानुपपत्तेः, कृदुपात्तक्रियान्वयित्वेन विवक्षितस्य चैत्रस्य तिङाद्यनभिहितकर्तृत्वार्थका तृतीया दुर्वारा । एवं ओदनं पक्वो भुज्यते चैत्रेणेत्यपि द्वितीयांतप्रयोगापत्तिः, कर्मत्वस्य पाकनिरूपितस्य तिङानुक्तत्वात् । शाब्दबोधश्च तत्र चैत्रकर्तृकपाकानुकूलकृतिश्रयो भुङ्क्त इति, वारद्वयं कर्तृत्वबोधश्च घटत्ववान् घट इतिवन्नानुपन्नः । एवं ओदनः पक्वो भुज्यत इत्यत्रापि शाब्दबोधो वारद्वयं कर्मत्वबोधश्चानुसंधेय इति चेत् । अनभिहितइत्यस्य स्वान्वयिभिः कृदादिभिः अनभिहित इत्यर्थात्, अतश्च तत्र कृता कर्तृत्व कर्मत्वयो रुक्तत्वान्नतृतीयाद्यापत्तिः, प्रथमायास्तु तदन्वयविवक्षायां निमित्तभावएव । ....

नचैवमपि तदन्वयविवक्षायां षष्ठ्यापत्तिः, अनभिहितइत्यधिकारस्य प्रथमाविधायकसूत्रेण विच्छेदात् । " कर्तृकर्मणोः कृति „ इति कर्तृषष्ठीविधायक सूत्रेऽनुवृत्त्यभावादिति वाच्यम् , मण्डूकप्लुतिन्यायेन तत्रापि तदनुवृत्तेः सर्व सम्मतत्वात् । अन्यथा चैत्रः पक्त्वा भुङ्क्त इति वक्तव्ये चैत्रस्य पाचको भुङ्क्त इत्यपि प्रयोगापत्तेः । अतश्चैत्रः पाचक इति प्रथमान्तयोरुभयोरपि भुङ्क्त इति क्रियायामेवान्वयः, परस्परभेदान्वयबोधस्तु पूर्ववत् । यत्रापि क्रियापदाश्रवणं तत्रापि " अस्तिर्भवन्ति „ इत्यनेनाध्याहर्तव्यम् ।

नचैवं प्रथमायास्तिङ्निपातान्यतरसामानाधिकरण्यनिमित्तत्वे चैत्रःपचल् इतिस्थितिदशायांतिङोभावात् प्रथमानिमित्ताभावेन अप्रथमासमानाधिकरणपदत्व रूपस्य शतृशानचोर्निमित्तस्यसत्त्वात् "लटश्शतृशानचावप्रथमासमानाधिकरणे " (३-२-१२४) इत्यनेनविशेषविधिनाशतृशानचोरेव लटिप्राप्त्यापत्तेः तिङादेर्लिडादिमात्रविषयत्वेनापि सामान्यविधिवशा दुपपत्तेः लटितिङोभावापत्तिरिति वाच्यम्, एतादृशार्थस्य लटिशतृशानञ्विधानमात्रेणैव सिद्धेरप्रथमासमानाधिकरण इतिपदवैय्यर्थ्यापत्तेः, तत्परिहारार्थं प्रथमायालब्ध्यपि ज्ञापकबलेन सिद्धेः तस्याश्च प्रयोजकीभूत तिङादिसामानाधिकरण्यं विनानुपपत्तेः लटि तिङ्सिद्ध्युपपत्तेः । अतएव ज्ञापकेन भावितिङादिकंनिमित्तीकृत्य सर्वाएव विभक्तयो लटिभवन्तीति ज्ञाप्यते । तत्रच प्रथमाभिन्नविभक्तिसामानाधिकरण्ये शतृशानचोर्विधा

नेपि न तयोः पूर्वप्रमितितिङादिबाधकत्वं । एवंचाप्रथमासमानाधिकरण इत्यस्य पर्युदासत्वेपि लटितिङाद्युपपत्तिः । प्रसज्यप्रतिषेधत्वपक्षेतु सुतराम् । महाभाष्यकारीयालटितिङाद्यनुपपत्तिपरिहारास्तु दुरुपपादत्वादिहनालिखिताः । सर्वथा तिङ्निपातोभयाभिहितकर्तृत्व कर्मत्वयोः प्रथमेत्याह । * तयोश्च द्वितीयाद्यर्थवदेवाख्यातोपात्तभावनान्वय इति सिद्धम् । ....

नचैवमपि प्रथमार्थस्याख्यातार्थादावेवान्वयः, द्वितीयार्थादेस्तु कृदाद्यर्थेपीति कथं कार्यकारणभावैक्यमिति वाच्यम् , सुबर्थप्रकारकशाब्दत्वावच्छिन्नम् प्रति लिंगानन्वयिपदजन्योपस्थितेर्भावनाविशेष्यतासंबंधेन कारणत्वेपि प्रमाणान्तरजन्याभिहितत्वाद्युपस्थितिरूपकारणान्तरवशेन विशेषलाभोपपत्तेरितिदिक् । इतिभाट्टरहस्येप्रथमार्थविचारः ॥ ....

द्वितीयार्थस्तु " कर्मणिद्वितीया „(२-३-२) इतिसूत्रात् कर्मत्वम् । तदपि भावनायामेवान्वेति । अत्र विवदन्ते । तत्र नवीनतार्किकास्तावत् धात्वर्थानधिकरणत्वे सति धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं । पच्यादिधात्वर्थोहि फलावच्छिन्नो व्यापारः, तदवच्छेदकीभूतफलस्य विक्लित्त्यादेः देवदत्तवृत्तिव्यापारानधिकरणीभूतौदनवृत्तित्वादोदनादेः कर्मत्वमिति लक्षणसमन्वयः । गमनफलस्य संयोगस्य ग्राम इव चेत्रेपि सत्त्वात् धात्वर्थानधिकरणत्वे सतीति, चैत्रस्य गमनरूपधात्वर्थाधिकरणत्वात् । गमनजन्यपूर्वदेशविभागशालिनि पूर्वदेशेगमनानधिकरणत्वविशिष्टधात्वर्थजन्यफलशालित्वस्य सत्त्वादतिव्याप्तिः, एवं वृक्षात् भूमौ पर्ण पततीत्यत्र पतनक्रियाजन्यसंयोगविभागरूपफलाश्रययोर्भूमिवृक्षयोरतिव्याप्तिः, अतो धात्वर्थतावच्छेदकेति फलविशेषणं । एवंच गमेस्संयोगएव । त्यजेर्विभागएव । पततिस्पंदत्यादेः नैव किञ्चित्फलं धात्वर्थतावच्छेदकमिति नोक्तातिव्याप्तिः । फलपदंच क्रियाजन्यफलपरं । तेन धात्वर्थतावच्छेदकव्यापारत्वमादाय व्यापारे अथोदेशमादायाथोदेशावयवेच नाति व्याप्तिः । पततेरधोदेशसंयोगः फलं । अतएव नरकं पततीत्यपि प्रयोग इति केचित् ॥ ....

ननु ग्रामं गमयति चैत्रो मैत्रमित्यत्र मैत्रे कर्मत्वलक्षणस्याव्याप्तिः। मैत्रस्य गमनरूपधात्वर्थाधिकरणत्वात्। नच "सनाद्यंताधातवः" (३--१--३२) इति वचनात् णिजन्तस्य धातुसंज्ञत्वावगतेः णिजंतगमिधात्वर्थस्य गमनानुकूलव्यापारस्य मैत्रे अभावान्नाव्याप्तिः, तदर्थतावच्छेदकस्य गमनाख्यफलस्य मैत्रे सत्त्वेन विशेष्य दळस्यापि सत्त्वादितिवाच्यम्। तथात्वे ग्रामस्य कर्मत्वानुपपत्तेः । नचणिजंतस्य धातुत्वेपि गमेरपि धातुत्वानपायात् ग्रामस्य तत्कर्मत्वोपपत्तिः । तथात्वे पाचयति चैत्रो मैत्रेणेत्यत्रापि मैत्रस्य कर्मत्वापत्तेः। नचेष्टापत्तिः, द्वितीयांतत्वापत्तेः। "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्तासणौ" (१-४-५२) इत्यनेन सूत्रेण गत्यादीनां धातूनामण्यंतानां यः कर्ता स ण्यंतानां कर्मेत्यर्थकेन गत्यादिभिन्नधातुयोगे कर्मसंज्ञानिषेधेन तत्रापीष्टापत्तेः कर्तुमशक्यत्वात्। "हृक्रोरन्यतरस्याम्" (२-४-५३) इति सूत्रेण हारयति कारयति धातुयोगे विकल्पेन कर्मसंज्ञाविधानात् हारयति कारयति कटं भृत्यो हारयति कारयति कटं भृत्यमिति प्रयोगद्वयावगतेः, तत्र भृत्ये धात्वर्थतावच्छेदकीभूतप्रयोज्यव्यापाररूपफलाश्रयत्वस्य सर्वदा सत्त्वेन कर्मत्वतदभावयोर्वक्तुमशक्यत्वात्। ....

एतेन स्वप्रकृत्यर्थभिन्नसमवेतक्रियाजन्यधात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमित्यप्यपास्तं, पाचयति चैत्रो मैत्रेणेत्यादावतिव्याप्तेरितिचेत्. तत्तत्क्रियाव्यक्तिभेदेन कर्मत्वानां भेदात्। इतरथा उभयकर्मजसंयोगस्थले चैत्रस्य स्वभिन्न मैत्रसमवेतकर्मजन्यसंयोगाश्रयत्वाच्चैत्रो मैत्रं गच्छतीत्यत्र चैत्रस्य कर्मत्वापत्तेः। अन्यथा मैत्रस्यापिक्रियासमानाधिकरणफलाश्रयत्वात् कर्मत्वानापत्तेः। अतस्तत्क्रियांतर्भावेनैवलक्षणं निर्वाच्यम्, तथात्वे चैत्रनिष्ठक्रियायाः परसमवेतत्वाभावादेव तत्र नातिव्याप्तिः । ततश्च यत्क्रियाजन्यधात्वर्थतावच्छेदकफलशालिसत् यद्यत्क्रियानधिकरणं तत्तत्क्रियाकर्मेति विशिष्यैव कर्मत्वनिरुक्तिः । परसमवेत यत्क्रियाजन्यधात्वर्थतावच्छेदकफलशालि यत् तत्तत्क्रियाकर्म इतिवा निरुक्तिः. पच्यादिक्रियामादायैव लक्षणसमन्वयः स्पष्ट

एव, चैत्रो मैत्रं गच्छति मैत्रश्चैत्र मित्यत्रा तत्तत्कर्तृनिष्ठक्रियामादाय, गमय तीत्यादौच गमिक्रियामादाय ग्रामस्य, तदनुकूलव्यापाररूपणिजर्थमादाय मै त्रस्य कर्मत्वं निर्वाच्यम् । घटं भावयतीत्यादौ तु णिजर्थमादायैव, भृधा तो रकर्मकत्वात् । पाचयतीत्यादौच पच्यर्थमादायैव ओदनस्य, तत्वनुकूल व्यापारमादायमैत्रस्य, उक्तसूत्रानुरोधात् । अतएव तत्रणिजर्थोकर्मकएव ॥

अथवा तस्यापि ओदनएव कर्म; विक्लित्त्यनुकूलत्वाविशेषात् , एवंच हा रयति कारयति निरूपित कर्मत्वनिरुक्तो तृतीयान्तपदानभिधेयत्वमपि देयं, तेन हरणादिकर्तुः पाक्षिककर्मत्वाविघातः. एवं गमि पतत्यादौ विवक्षा. समभ्य न्तपदाभिधेयत्वं वादेयं, तेन ग्रामेगच्छति नरकेपततीत्यादिप्रयोगस्याप्युपपत्तिः ॥

नचैवं तत्तत्कर्मत्वानां भेदात् द्वितीयायाश्शक्तिग्रहानुपपत्तिः, लाघ वेन वृत्तित्वे अभावेच द्वितीयायाश्शक्तेः . पदार्थान्तराणामन्यलभ्यत्वेन तत्र शक्तिकल्पनायां गौरवात् . तथाहि - ग्रामं गच्छतीत्यत्र द्वितीयार्थोवृत्तित्वं धात्वर्थतावच्छेदके संयोगेन्वेति . तज्जनकं गमनं धात्वर्थएव . एवं द्वितीया र्थोभावोपि प्रतियोगितासंबन्धेन धात्वर्थ एव . ग्रामादिश्च प्रकृत्यर्थो द्वित्वि धेपि द्वितीयार्थे . एवञ्च ग्रामनिष्ठाभावप्रतियोगि ग्रामवृत्तिसंयोगजनकगमनानु कूलकृतिमानित्यादिश्शाब्दबोधः . ...

यदितु गमनात्यन्ताभावोपि चैत्रेकालिकाव्याप्यवृत्तित्वादाशंक्येत, त दा परसमवेतेत्याद्यन्योन्याभावघटितलक्षणमादाय भेदोद्वितीयार्थः, सच प्रतियो गिता समवायोभयघटितसामानाधिकरण्यसंबन्धेन गमनान्वयी . ततश्च ग्राम निष्ठभेदप्रतियोगि समवेत ग्रामवृत्तिसंयोगजनकगमनवानित्यादिशाब्दबोधः ॥

वस्तुतस्तु भेदाव्याप्यवृत्तित्वमते चैत्रे गमनव द्वेदस्य तुल्यत्वात्तद्वार णाय प्रकृत्यर्थो ग्रामोभेदे प्रतियोगितासंबंधेनान्वेति । भेदश्चाभावीयवि शेषणतासमवायोभयघटितसामानाधिकरण्यसंबन्धेन गमनेन्वेति . ततश्च ग्राम

प्रतियोगिकभेदवत्समवेतग्रामवृत्तीत्यादि शाब्दबोधः । अतएवान्वेयत्वापरपर्यायवृत्तित्वार्थकसप्तमीतो वृत्तित्वार्थकद्वितीयाया भेदः । भेदाद्यर्थस्याधिकत्वात् । अयं चांशविशेषः- यद्द्वितीयार्थोवृत्तित्वं धात्वर्थतावच्छेदके फलत्वान्वेति, स सम्यर्थस्तु वृत्तित्वं धात्वर्थे नामार्थेवेति । एवं ग्रामस्य गन्तेत्यादौ कर्मण्यष्ठीस्थलेपि बोध्यम् । एवञ्च चैत्रेण ग्रामो गम्यते इत्यात्मनेपदेन फलं भेदश्चाभिधीयते । तत्र प्रथमान्तपदोपस्थाप्यो ग्रामः प्रतियोगिताकत्वसंसर्गेण भेदान्वयी । सच धात्वर्थगमने सामानाधिकरण्यसंबन्धेन । सच धात्वर्थोगमनं पुनरात्मनेपदार्थे फलेजन्यत्वसंबन्धेन । तच्चाश्रयत्वेन नामार्थे ग्रामे । ततश्चैत्रकर्तृकग्रामभिन्नसमवेतसंयोगजनकगमनजन्यसंयोगाश्रयो ग्राम इत्येव शाब्दबोधः। एवं पक्व ओदनइत्यत्र कर्मकृत्प्रत्ययस्थलेपि । तत्र त्वयंविशेषः, कृदर्थः प्रतियोगिभेदः वृत्तित्वं आश्रयत्व; ओदनो भेदेन प्रतियोगिनि, सच भेदे, स चक्रियायां, सा च फलद्वारावृत्तित्वे, तच्चाश्रये, सचाभेदेनौदनइति. अनुभवानुसारेण व्युत्पत्तिवैचित्र्यस्यादोषत्वात् । ....

नन्वेवं भेदेप्रतियोगिनः प्रतियोगितासंबंधेनवान्वयः, अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वेनवा । नाद्यः-वैशिष्टयव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताक भेदस्य चैत्रेपि सत्वेन स्वं गच्छति चैत्र इतिप्रयोगापत्तेः । अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वव्युत्पत्तिभंगापत्तेश्च । नान्त्यः - जलंगच्छति जलमित्यत्र जलत्वावच्छिन्नप्रतियोगिताकभेदस्य जलेअभावादिति चेत् । धात्वर्थतावच्छेदकफलाश्रयत्वम् यद्वयक्तेः तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वेन प्रतियोग्यन्वयस्य वा च्यत्वात् । एवंच व्युत्पत्तिभङ्गभिया जलपदं जलविशेषे लाक्षणिकम् । तत्सिद्धं वृत्तित्वं भेदश्च द्वितीयार्थ इति ॥ ....

नचैवं तृतीयान्तपदानभिधेयत्वादेपि वाच्यत्वापत्तिः, तस्यान्यलभ्यत्वे न वाच्यत्वे गौरवात् । काय्यति कटं मैत्र मित्यादि प्रयोगस्थेष्टत्वेन वाच्यतया प्रवेशे प्रयोजनविरहात् । भेदस्यावाच्यत्वे स्वं गच्छतीति प्रयोगापत्तिर्बाधिका , नच्च तथा किंचिद्बाधकम् । अतो न तस्य वाच्यत्वमिति दिक् । एवंच यत्र एतादृशकार्यत्वं बाधः, तत्र घटं जानाति मैत्र इच्छति

कुरुते घटस्य ज्ञातेत्यादौ सविषयपदार्थाभिधायिधातुयोगेद्वितीयाषष्ठ्योर्विषयत्वे लक्षणा । घटविषयकज्ञानाश्रयो मैत्र इति शाब्दबोधः । मैत्रेण ज्ञायते इत्यादौतु कर्मप्रत्ययेन विषयत्वम् लक्ष्यते । मैत्राश्रितज्ञानविषयो घट इतिच बोधः । ज्ञातो घट इत्यादिकर्मकृत्सुतु विषये लक्षणा , तस्यच घटे अभेदान्वय इति द्रष्टव्यम् । नष्ट इत्यादौ प्रतियोगिनि, नत्वत्र परसमवेतत्वप्रवेशः, वैयर्थ्यात् । स्वात्मानं जानामि " आत्मानमात्मनावेत्सी " त्यादि प्रयोगाच्च । एवं अकथितकर्मादौ कर्मप्रवचनीययोगनिमित्तकाद्वितीयायांच लक्षणेत्याहुः । ....

अत्रेदमवधेयं । यदि फलावच्छिन्नो व्यापारो धात्वर्थः, तदा द्वितीयाद्यर्थवृत्तित्वस्य पदार्थैकदेशे संयोगादौ फलेन्वयादेकदेशान्वयनिबन्धनो व्युत्पत्तिभंगः । नच चैत्रस्य नता चैत्रादन्य इत्यादावपि तदाश्रयणम्, षष्ठ्या द्वयर्थस्य परंपरासंबन्धस्य विशेष्य एवान्वयोपपत्तेः, पञ्चम्यर्थस्यापि प्रतियोगित्वादेः परंपरासंबन्धेनांगीकाराच्च । किञ्च किमिदं फलस्यावच्छेदकत्वं, नतावत्तत्तद्धातुशक्यतावच्छेदकत्वं , विशिष्टशक्तौ प्रमाणाभावात् । चैत्रो ग्रामं गमयति मैत्रमित्यादिणिजर्थरूपधात्वर्थस्यावच्छेदकीभूते गमनरूपे फलेऽव्याप्तेः ।

अथ फले पृथगेव धातोश्शक्तिः, तस्यच व्यापारे प्रकारत्वमेवावच्छेदकत्वमिति चेत्, तृतीयाद्यर्थकारणत्वादौ पाचयतीत्यत्र णिजर्थविशेषणीभूतेपाके चातिव्याप्तेः । अतः स्वरूपसंबन्धात्मकमवच्छेदकत्वं पदार्थान्तरमेव कल्प्यम्, तच्च धर्मिग्राहकप्रमाणेन यदाश्रये द्वितीयाप्रामाणिकी तत्रैव कल्प्यते नान्यत्रेतिवाच्यम् । नच तत्र शाब्दव्यवहारातिरिक्तंकिञ्चित्प्रमाणमस्ति । तद्वदेव वक्ष्यमाणविधया कर्मत्वादिकारकाणां अखण्डोपाधिरूपाणां द्वितीयादिवाच्यत्वकल्पनोपपत्तेः नाधेयत्वादेरनेकव्युत्पत्तिकल्पनापादिका वाच्यत्वकल्पनायुक्ता समाश्रयितुम् । तथाहि — द्वितीयायास्तावद्वृत्तित्वे भेदेच शक्तिरित्यनेकशक्तिकल्पना , धातोश्च फलावच्छिन्नव्यापारे एका फले व्यापारेच नानाशक्तीतिकल्पना । अस्मन्मतेतु पूर्वोक्तविधया तत्तत्फलावच्छिन्नव्यापारवृत्तिपाकत्वगमनत्वादिकमेव तत्तद्धातुशक्यतावच्छेदकमिति नानेकशक्तिकल्पना । पुनश्च भवन्मते फलस्य त

त्वेन बोधे पूर्वदेशविभागस्यापि क्रियाजन्यत्वाविशेषात् पूर्वदेशं गच्छतीति प्रयोगापत्तिः । संयोगत्वादिना बोधे वृक्षस्थितस्यैव सर्पस्य मूलदेशादग्रदेशं गच्छतो वृक्षं गच्छतीति प्रयोगापत्तिः, तत्तदवयवसंयोगनाशेनावयविसंयोगानां नाशात् । तया क्रियया जनिताग्रसंयोगेनाभिनवस्यैवावयविसंयोगस्य उत्पत्तेः । नह्यवयविसंयोगो नधात्वर्थतावच्छेदकः, ग्रामं गच्छतीति प्रयोगानापत्तेः । अ तस्तदुत्तरदेशसंयोगस्यैव फलत्वं वाच्यम् । उत्तरत्वञ्च तत्तत्क्रियापूर्व देशघटितमिति अनन्तशक्तिकल्पना, लक्षणावा । नच तत्तत्फलानुभवबलादेवसानदोषः, अनुभवस्यानुमानादिनापिसम्भवेनशाब्दत्वएवविप्रतिपत्तौ धातुजन्यत्वेसुतरांग्रमाणाभावात् । इतरथाफलस्यधातुवाच्यत्वं द्वितीयावाच्यत्वंवेतिनानापक्षप्रतिपादनानुपपत्तेः । नहि घटमानयेत्यत्र घटो धातुवाच्यः, नामपदवाच्योवेति पक्षान् कश्चित्प्रतिपादयति । अतएव गमनत्वादिनैव क्रियाया धातुतोनुभवाद्धस्तुत स्तत्फलावच्छिन्नक्रियावृत्तिगमनादिकमेव तत्तद्धातुशक्यतावच्छेदकमित्युक्तं प्राक्। तदेवं भवन्मते शक्तयानन्त्यं तावत्स्फुटमेव । व्युत्पत्त्यानन्त्यमपि - ग्रामं गच्छतीत्यत्र तावत्प्रातिपदिकार्थस्य ग्रामस्य तत्तत्संसर्गभेदेन वृत्तित्वभेदेचान्वयाद्धयुत्पत्तिद्वयं , पुनश्चान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वव्युत्पत्तिभंगः , तद्भंगायवा ग्रामप्रातिपदिकेन ग्रामविशेषलक्षणेति दोषः , द्वितीयार्थस्यच भेदस्य निरुक्तसामानाधिकरण्यसंबन्धेन क्रियायां वृत्तित्वस्यच साक्षात्संबन्धेन फलइति व्युत्पत्तिद्वयं । स्वं गच्छतीति प्रयोगवारणार्थं भेदोवा द्वितीयार्थः समवायोवा, ग्रामस्यच तस्मिन्समवाये स्वप्रतियोगिकभेदवद्वृत्तित्वं संसर्गः । समवायस्यच साक्षात्संबन्धेन क्रियायामन्वय इत्यस्यापि सुवचत्वेन विनिगमनाविरहश्च ॥ ....

एतेन फलं भेदश्च द्वितीयार्थः, आधेयत्वं फले प्रकृत्यर्थसंसर्गः । फलस्यच जनकत्वेनावच्छेद्यत्वेनवा व्यापारेऽन्वयः । व्यापारमात्रं धात्वर्थः । तत्तद्धातुसमभिव्याहाराच्च द्वितीयायाः फलविशेषबोधकत्वमित्यप्यपास्तम् -- अनेकशक्तिकल्पनादेः तदवस्थत्वात् । एवं ग्रामस्य गंतेत्यादिकर्मणिषष्ठीस्थले शक्त्यनेकत्वं व्युत्पत्त्यनेकत्वं विनिगमनाविरहश्चेति बोध्यम् । ग्रामो गम्यत इ

ति कर्माख्यातेचात्मनेपदस्य फलेभेदेच शक्त्यन्तरकल्पनात् , ग्रामस्यप्रथमान्तप दोपस्थाप्यस्यापि आख्यातार्थे भेदेन्वयकल्पनं, तस्य भेदस्य प्रत्ययार्थस्यापि धात्वर्थव्यापारेऽन्वयकल्पनं, तस्यच व्यापारस्य धातूपस्थापितफलं प्रति विशे ष्यभूतस्यापि पुनर्जन्यत्वसंबंधेनात्मनेपदार्थे फलेन्वयकल्पनं, तस्य फलस्य चाश्रयतासंबंधेन प्रथमान्तपदोपस्थाप्ये ग्रामेन्वयकल्पनमिति दोषाः । किंच ग्रामपदस्यात्मनेपदस्यच नतावद्युगपदेव कारकतया विशेष्यतयाच बोध-जनकत्वं , विरोधात् । विशेषणतावच्छेदकप्रकारकविशेषणनिश्चयस्यानुद येन विशिष्टवैशिष्ट्यबोधात्मकस्यानुभूयमानस्यापलापापत्तेश्च । नापि क्रमिक बोधद्वयजनकत्वं, जनितान्वयबोधेनैराकांक्ष्यात् । एकतरशाब्दबोधवेळायामित रशाब्दबोधानुत्पत्तौ प्रतिबन्धकान्तरकल्पनापत्तेश्च । एवं पक्व ओदन इत्यत्र क र्मकस्थलेपि द्रष्टव्यम् ॥

यत्तु भेदो नद्वितीयार्थः अपितु आधेयत्वादिकमेव । नचैवं चैत्रश्चैत्रंगच्छतीति प्रयोगापत्तिः, "आकडाराद्देकासंज्ञा" (१-४-१) इतिसूत्रेण एकसंज्ञाप्रयुक्तकार्य सत्वे संज्ञान्तरप्रयुक्तकार्यनिषेधात् । प्रकृतेच परत्वात्कर्तृसंज्ञाप्रयुक्तकार्यस्यावश्यक त्वेन कर्मसंज्ञाप्रयुक्तद्वितीयाद्यनापत्तेः । अतो नतत्प्रयुक्तशक्त्यन्तरकल्पनाद्या पत्तिरिति, तन्न - स्वं जानामि चैत्रोहं स्वात्मानं जानामि " आत्मानमात्म-नावेत्सि " इत्यादावेकसंज्ञावरोधेपि संज्ञान्तरप्रयुक्तकार्यदर्शनात् । नच शरीर मनोरूपावच्छेदकभेदमादाय तत्रासांकर्योपपादनं, तथात्वे स्वपदप्रयोगा-नुपपत्तेः । चैत्रश्चैत्रं गच्छतीति प्रयोगेपि शरीरप्रदेशांतरावच्छिन्नात्मादि भेदकल्पनोपपत्तेश्च । इतरथा चैत्रो मैत्रं गच्छतीति प्रयोगस्याप्यनापत्तेः वस्तुतः फलाश्रयत्वसत्त्वे चैत्रेपि द्वितीयाप्रसक्तौ सूत्रवशेनापि संज्ञां तरप्रयुक्तकार्योपस्थितेः तत्प्रतिबंधकत्वकल्पने तवापि गौरवस्य सत्वाच्च । मम-त्वखण्डोपाधिरूपस्य कर्मत्वस्य परसमवेतक्रियाजन्यफलशालित्वसमनियतस्यैव क-ल्पनात् ,चैत्रे तस्याप्रसक्तत्वादेव नप्रतिबद्ध्याप्रतिबंधकभावकल्पनेति विशेषः । अत उक्तयुक्तया लाघवात् कर्मत्वमखण्डोपाधिरूपमेव द्वितीयार्थः । तच्च उक्त-कर्मत्वलक्षणसमनियतमेव, तत्रैव गोकर्मकमानयनं, ओदनकर्मकः पाकः,

ग्रामकर्मकं गमनमिति व्यवहारात् । तच्च धर्मिग्राहकप्रमाणेन ससम्बंधिकमेव कल्प्यत इति तस्य तत्तद्धात्वर्थनिरूपितत्वसिद्धिः । तत्तद्धात्वर्थस्तु तत्तत्फलावच्छिन्न व्यापारविशेषत्व समनियताखण्डोपाधिरूप पाकत्व गमनत्व रूप शक्यतावच्छेदकधर्मावच्छिन्नोव्यापारविशेष इत्युक्तमेव । तत्तद्धात्वर्थनिरूपिततत्तत्कर्मत्वानां भेदेपि च भवन्मते आधेयत्वत्वस्यैव कर्मत्वत्वस्याप्यखण्डस्य स्वीकारात्तस्यैकस्य शक्यतावच्छेदकत्वेन नानेकशक्तिकल्पना । निरूपकीभूतधात्वर्थतावच्छेदकावच्छिन्नगमनाद्यन्वयवशाच्च चैत्रस्य घट इति वत् कर्मत्वविशेषलाभः । अतश्च चैत्र श्चैत्रंगच्छति चैत्रो वाचयति मैत्रमित्यादिप्रयोगापत्तिशंकैव दुर्लभा । ग्रामे गच्छति कारयति चैत्रो मैत्रेणेत्यादौतु कर्मत्वाविवक्षायां अधिकरणत्वादिविवक्षया सप्तम्यादिप्रयोगोप्यविरुद्धः । एवंच द्वितीयायामेकैवशक्तिः । प्रातिपदिकार्थस्यच तृतीयादिसाधारण्येन सुबर्थकर्मत्वादावन्वयादेकैवव्युत्पत्तिः । तस्यच उद्देश्यत्वेनवा स्वनिरूपकधात्वर्थजनकत्वेनैववाख्यातार्थकृतौ अन्वयादपरेति लाघवम् । एवं कर्मणिषष्ठीस्थलेपि । कर्माख्यातस्थलेतु पूर्वोक्तरीत्याख्यातेन कर्मत्वलक्षणायामपि प्रथमार्थस्य पूर्वोक्तविधया प्रातिपदिकार्थस्य स्ववृत्तिकर्मत्वनिरूपकधात्वर्थजनकत्वसंसर्गेण कृतावन्वयः । कर्मत्वस्यप्रथमार्थत्वेतु स्वनिरूपकधात्वर्थजनकत्वसंसर्गेणैव । कर्मकृत्स्थलेतु पक्व ओदन इत्यादौ पाकस्य कृत्प्रत्ययलक्ष्यायां कृतौ, तस्याश्च निरूप्यत्वसंसर्गेण तल्लक्ष्यएव कर्मत्वे , तस्यचाधारत्वसंबंधेन कृत्प्रत्ययार्थे कर्मणि , तस्यचास्तीत्याख्यातार्थ इति वक्ष्यते । कर्मकृत्स्वपि पाककर्मी कृत इति विवरणानुरोधेन कारकान्वयानुरोधेनच कृतिलक्षणाया वक्ष्यमाणत्वाच्च । अतश्च लाघवात् द्वितीयार्थकर्मत्वस्योक्तसंबंधेन कृतावेवान्वय इति सिद्धम् ॥

नच द्वितीयार्थकर्मत्वस्य निरूपकतासंबन्धेन धात्वर्थएवान्वयोस्त्विति वाच्यम् । धात्वर्थस्यापि कारकत्वेन भावनान्वयस्य उपपादितत्वात् , तत्साधारण्येन कारकत्वप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति भावनाविशेष्यतासंबंधेन लिंगानन्वयिपदजन्योपस्थितिः कारणमित्येकेनैवकार्यकारणभावेन कर्मत्वादीनामपि अन्वयोपपत्तौ तदनेकत्वे गौरवात् । धात्वर्थान्वयार्थमुपस्थितस्य

भावनाविशेष्यत्वस्यैव कर्मत्ववृत्तिप्रकारतानिरूपकत्वकल्पनोपपत्तौ अनुपस्थितस्य धात्वर्थविशेष्यत्वस्य तत्कल्पनानुपपत्तेश्च । काष्ठैरोदनं पचतीत्यस्यकाष्ठैः पाकैरोदनं करोतीति विवरणात् विवरणवाक्येच काष्ठादीनां कृजर्थेन्वयावश्यकत्वेन पचतीत्यत्रापि तत्रैवान्वयप्रतीतेश्च । तत्सिद्धं कर्मत्वाद्यखण्डमेव द्वितीयार्थो भावनान्वयीति ॥ ....

यत्तु न कर्मत्वं आश्रयत्वंवा द्वितीयार्थः, तथात्वे आश्रयत्वादेर्गुरुभूतस्य शक्यतावच्छेदकत्वापत्तेः, कर्मत्वादिरूपाखण्डोपाधिसत्त्वे प्रमाणाभावाच्च । अपित्वाश्रयस्यैव द्वितीयार्थत्वं, तस्यच धातूपात्ते फलेन्वयः । एवं करणादिरेव तृतीयाद्यर्थः । एवञ्च- " कर्तृकरणयोस्तृतीया " (२-३-१८) " कर्मणिद्वितीया " (२ - ३ - २) इत्याद्यनुशासनमपि संगच्छत इति कैश्चिदुक्तम् . तन्न — संबन्धवाचिषष्ठीस्थले प्रातिपदिकार्थस्य प्रत्ययार्थे संबन्धेभेदेनान्वयांगीकारादिहापि व्युत्पत्त्यन्तरकल्पनागौरवपरिहारार्थं भेदसंबन्धबोधायक र्मत्वादावेव द्वितीयादेश्शक्तिकल्पनात् ॥ ....

नचैवं " ऐन्द्रं दधी „ त्यादौ तद्धितस्य देवताविशिष्टद्रव्यवाचिनोर्थेदेवतायां इन्द्रप्रातिपदिकार्थस्येन्द्रस्याभेदेनाप्यन्वयदर्शनात् - व्युत्पत्त्यन्तरस्याप्यावश्यकत्वं ; तद्धितस्यापि देवतात्वविशिष्टद्रव्य एव शक्त्यंगीकारेण तत्रापीन्द्रस्या धेयतासंबन्धेनैवान्वयांगीकारात् । ....

नचैवं षष्ठ्यादौ सर्वत्र लाघवात् धर्मिण्येव शक्तिकल्पनाद् भेदान्वयेनैव सर्वत्र प्रकृत्यर्थप्रकारतास्त्विति वाच्यम् , तथात्वे ग्रामाभिन्नो यआश्रयत्ववान् तदाधेयसंयोगजनकंगमनमित्यादि शाब्दबोधापत्तेः, आश्रयत्वादिकं किन्निरूपितमिति जिज्ञासाया अपरिहार्यत्वात् । अतो न धर्मीद्वितीयार्थः, अपितु आधेयत्वं, कर्मत्वमेववाखण्डम् । उभयथापि फलस्य व्यापारस्यैववानिरूपकस्यशाब्दबोध एवलब्धत्वान्नानिरूपकजिज्ञासापत्तिः . कर्मत्वस्यापि चाखण्डस्यैकस्यैव शक्यतावच्छेदकत्वाङ्गीकारान्नगौरवम् . आश्रयत्वमेवच तत्तन्निरूपकभेदेन भिन्नमिति तवैव गौरवमिति दिक् । अतएव " समर्थःपदविधिः " (२ - १ - १) इतिसूत्रे " क्रियाकारकयोः सुबर्थस्य

द्वितीयावाचिकाभवति,,इति महाभाष्यं संगच्छते । एवंविधकर्मत्वबोधेतु सविषयकधातुसमभिव्याहारे तार्किकरीत्यैव विषयत्वादिकं द्वितीयादिना लक्षयित्वाऽऽख्यातेन चाश्रयत्वं लक्षयित्वा घटविषयकज्ञानाश्रयत्वं चैत्रीयमिति चैत्रो जानाति घटमित्यत्र शाब्दबोधः. एवं कर्मषष्ठीकर्माख्यातकर्मकृत्स्वपिबोध्यम् . नत्विह परसमवेतत्वस्यावश्यकता, अतएव स्वात्मानं जानामीत्यादिप्रयोगः . न ह्यत्र मुख्यं कर्मत्वमस्ति, क्रियाजन्यफलाभावात् . अपितु विषयित्वे लक्षणा, सा पि नानुशासनिकी . येन तदर्थमपि कर्मसंज्ञा प्रसज्येत . अपितुगंगायांघोष इतिवत् सांप्रदायिकी . अतश्च कर्मत्वाभावेन कर्मसंज्ञाया अभावात् न — " आकडारादेकासंज्ञा " (१ - ४ - १) इत्यस्यबाधः ॥

ननु विभक्तौ लोके न लक्षणा, " सुपां कर्मादयोप्यर्थाः संख्याश्चैव तथा तिङाम् । प्रसिद्धेोनियमस्तत्र नियमः प्रकृतेषु च ॥ " इति कात्यायनवार्तिकविरोधात् . अत्रहि सुपां तिङाञ्च कर्मत्वादि संख्याश्चैकत्वादिका येन शास्त्रेणार्थइति प्रतिपाद्यते तत्रार्थनियमः प्रसिद्धः इति तृतीयचरणस्यार्थः । सच - एकत्वे एकवचनमेव, कर्मणि द्वितीयैवेत्याकारकः । चतुर्थचरणेतु प्रकृत्यर्थापेक्षया प्रत्ययनियमः । सच - कर्मण्येव द्वितीया, एकत्वएव एकवचनमित्याकारकः . उभयथापि विभक्तेरर्थान्तरे वारणान्नविभक्तौ लक्षणा . अतएव "छन्दसि सुपां सुपोभवन्ती,,ति लक्षणाप्रतिप्रसवरूपं व्यत्ययानुशासनं छन्दस्युपपद्यते . इतरथा लोकवदेव वेदेपि तदुपपत्तेः व्यत्ययानुशासनवैय्यर्थ्यापत्तिः . एवं "कर्मणि षष्ठी,, त्यादि लक्षणानुशासनस्यापि वैय्यर्थ्यम् , शक्यसंबन्धावगमस्य प्रमाणान्तरेणैव सिद्धेः . अतो न लोके विभक्तौ अनुशासनं विना क्वापि लक्षणेतिचेन्न - प्रातिपदिकादिष्विव विभक्तावपि लक्षणायां बाधकाभावात् , उक्तवार्तिकस्य लक्षणायामप्यविरोधात् । तथाहि—अर्थनियमपक्षे तावत् कर्मणिद्वितीयैव नतु तृतीयादिविभक्त्यन्तरमिति सजातीयशब्दान्तर व्यावृत्तावपि द्वितीयाया अर्थान्तरे निवारणाभावस्य महाभाष्येस्पष्टत्वात् , इतरथा निस्संख्येभ्योव्ययेभ्योपि सुपामनापत्तेः . एवञ्च करणत्वादौ तृतीयैवेत्यस्यापि नियमात् विभक्त्यन्तरार्थे विभक्त्यन्तरस्य परं नलोके लक्षणा , ननु विषयत्वादावपि . प्रत्ययनियमपक्षेपि प्रकृतकर्मत्वैकत्वादिरूपसुप्तिङ

र्थापेक्षयैव तन्नियमकरणात्, अप्रकृतविषयत्वादिलक्षणायां न कोपिदोषः. स्पष्टंचेदमपि तत्रैव. अतएव जानातीत्यादि तिङोप्याश्रयत्वादौ लक्षणेत्युक्तं प्राक्. एवं च छन्दसिव्यत्ययानुशासनमपि प्रकृतविभक्त्यन्तरार्थविषये प्रतिप्रसवरूपतया नासङ्गतम्. कर्मणिषष्ठीत्यादिकंच लोकवेदसाधारण्येन ॥

नचैवं लोके अक्षीणि मे प्रदर्शनीयानि पादा मे सुकुमारा, इत्यादि महाभाष्योदाहृतप्रयोगेषु लोके प्रतिप्रसवाभावात् प्रकृतद्वित्वेबहुवचनस्य प्रयोगानुपपत्तिः । तत्र अक्षित्वादिजातिविवक्षायां " जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्"(१-२-५८)इतिवचनेन प्रतिप्रसवात्। अतस्सिद्धं विभक्त्यंतरार्थभिन्ने विषयत्वादौ युक्तै व लक्षणेति । यदातु 'सामान्यापेक्षएव प्रत्ययनियम, इति महाभाष्यकारीयं व्याख्यानांतरमभ्युपगम्यते, तदा कात्यायनीयं नियमद्वयमपीदं शक्तिनियामकं निरूढलक्षणा नियामकंच । तस्याश्शक्तितुल्यत्वात् । तथाच प्रकृतेऽप्रकृतेवार्थेनुशासनं विना न शक्ति र्निरूढलक्षणावा, सांप्रतिक लक्षणायास्तु नकापि प्रकृते अप्रकृतेवा निषेधः ॥

नचैवमव्ययेभ्योपि संख्याभिन्नेर्थे सांप्रतिकलक्षणया सुबुत्पत्तेः " अव्ययादाप्सुपः " (२-४-८२) इति ज्ञापकबलात् अव्ययेषु सुबुत्पत्तिपक्षो महाभाष्यकारीयो न संगच्छत इति वाच्यम् । तस्यलाक्षणिकार्थी विवक्षायामपि शब्दसाधुत्वार्थमपि सुबुत्पत्तिरित्येवं ज्ञापनार्थत्वात् ॥ ....

नचैवं छन्दसिव्यत्ययानुशासनवैयर्थ्यं,तस्यनिरूढलक्षणात्वज्ञापनार्थत्वात्। निषिद्धत्वप्रतिप्रसवार्थत्वाच्च । तथाहि—सांप्रतिकीलक्षणाकचिन्नैभवति, अतएव भट्टवार्तिके- यत्रार्षेलाक्षणिकेर्थे प्रयोगानुपपत्तिस्फुरणं विनाप्यर्थस्मरणं; तत्र निरूढलक्षणा,यत्र तत्स्फुरणपूर्वकं काव्याद्याधुनिकप्रयोगः; तत्र सांप्रतिकी लक्षणेति लक्षणाभेदमुपपाद्य 'काश्चिन्नैवा प्रयोगत, इत्यनेन प्रयोगाभावेन लक्षणेत्युक्तं । उदाहृतंच- रूपंवस्त्रमिति, इतरथामत्वर्थलक्षणया प्रयोगः केन वार्येत. अत एव एनां निषिद्धलक्षणेत्याचक्षते. तस्याश्च वेदेपि प्रसक्तौ प्रतिप्रसवार्थं व्यत्ययानुशासनमिति. सर्वथा सिद्धं घटं जानामीत्यादौ विपरीतत्वे लक्षणेति॥

वस्तुतस्तु नात्र लक्षणा, मुख्यकर्मत्वस्यैवोपपत्तेः. तथाहि — ज्ञातो-घट इत्यादिप्रतीत्या ज्ञानजन्या ज्ञेयनिष्ठा ज्ञाततापरनामविषयता फलं, तच्छालित्वंच घट इति मुख्यकर्मत्वोपपत्तिः ॥ ....

नच भावकार्यस्य समवायिकारणजन्यत्वनियमात् भूतभाविस्थलेच तदभावात् फलाभावः, ध्वंसस्य प्रामाणिकत्वे भावत्वस्य व्याप्यतावच्छेदककोटिप्रवेशवत् विषयताया अपि प्रामाणिकत्वे लघुना समवेतत्वेनैव कार्यत्वस्य विशेषणात् । अतश्च ध्वंसवदेव विषयताया अपि निमित्तकारणमात्रजन्यत्वमेवेत्यन्यत्रविस्तरः । एवंच परसमवेतत्वसिद्ध्यर्थं स्वं जानातीत्यादौ शरीरमनोभेदकल्पनात् "आकडारादेकासंज्ञा" इत्यस्याप्युपपत्तिः । ....

अथवा परसमवेतत्वादिघटितलक्षणसमनियताखंडोपाधिरूपकर्मत्वे शक्तिः, तद्बाधात्तु स्वंजानातीत्यादौ धात्वर्थतावच्छेदकफलशालित्वमात्रे विषयित्वमात्रेवा लक्षणेति न विरोधः । चैत्रः स्वं गच्छतीत्यादौतु न लक्षणयापि प्रयोगः, अप्रयोगेण निषिद्धलक्षणात्वादिति ध्येयं । तत्सिद्धं "कर्मणिद्वितीये,, तिसूत्रात् कर्मत्वमखंडोपाधिरूपं द्वितीयार्थः आख्यातार्थान्वयीति । उक्तञ्च तन्त्रवार्तिके- " विभक्तयोहि कारकशक्तिं निष्कृष्याभिधायक्रियां विशिषन्ति" इति । न्यायसुधाकारस्तु- "कर्तुरीप्सिततमंकर्म,, तिसूत्रादीप्सितकर्मत्वमेव द्वितीयार्थः । "तथायुक्तंचानीप्सितम्,, (१ -- ४ -- ५०) इतिसूत्रात् अनीप्सितत्वे निरूढलक्षणेत्याह । तन्न -- ईप्सितानीप्सितत्वरूपविशेषस्य प्रमाणान्तरलभ्यत्वेन लाघवात् कर्मत्व एवशक्तेः । यथाचैवंसति नसूत्रद्वयवैयर्थ्यं तथा कौस्तुभे विस्तरः । तच्च कर्म चतुर्विधं — उत्पाद्यं आप्यम् विकार्यं, संस्कार्यं चेति । घटं करोति, घटं जानाति, व्रीहीनवहन्ति, व्रीहीन्प्रोक्षतीत्यु दाहरणानि । पार्थसारथिस्तु - साध्यत्वमेव द्वितीयार्थः । आप्य कर्मादावपि तत्फलोपहितत्वेन साध्यतेत्याह । तदपि जन्यत्वत्वस्य शक्यतावच्छेदकत्वे गौरवादुपेक्षितम् । शक्यतावच्छेदकन्तु द्वितीयात्वं अमादिनिष्ठोव्यापकोधर्मः । एवमग्रेपि । यानित्वन्यानि द्वितीयार्थानुशासनानि तानि प्रचुरप्रयोगाभावाल्लाक्षणिकानुशासनानि । तथाहि - दुह्याच् पच् दण्ड रुधि प्रच्छ चीङ् ब्रूञ् शास

मथि मुष नीञ् हृञ् कृष् वह् रूप धातु समानार्थकधातूनां यत्कर्मकारकं तत्संबंधिनोपादानादिकारकत्वाविवक्षायां माषाणामश्नीयादितिवद्धात्वर्थसंबंधमात्रविवक्षायां संबंधसामान्यवाचिषष्ठीप्राप्तौ "अकथितंच" (१--४--५१) इत्याद्यनुशासनेन भाक्तकर्मसंज्ञाकरणात् द्वितीयादि । यथा - गान्दोग्धि पय इत्यादौ । अत्रच गोदोहनसंबंध एव द्वितीयार्थः । सच स्वनिरूपकदोहनानुकूलत्वसंसर्गेण भावनायामेवान्वेति, नतु धात्वर्थे, व्युत्पत्त्यन्तरकल्पनापत्तेः । तद्योगप्रतिपादकानुशासनञ्च संसर्गप्रतिपादनपरम् । गोरपादानत्वविवक्षायान्तु गोः पयो दोग्धीति पञ्चम्यन्त प्रयोगः । गोः पयोरूपकर्मकारकसंबंधविवक्षायांतु षष्ठ्यन्तप्रयोगोपि । अत्र पयसस्संबंधसामान्येन धात्वर्थाद्यन्वयविवक्षायां पयसः कर्मत्वाभावात् तत्संबंधिन्या अपि गोर्नकर्मत्वमित्येतदर्थं कर्मसंबंधिन इति विशेषणम् । अतएव गां पयसोदोग्धीति न प्रयोगः । अतस्तदा गोः पयसोदोग्धीत्येव प्रयोगः । ....

नच त्यजनोपसर्जनं त्यजनं दुहेरर्थः, तथाच धात्वर्थतावच्छेदक त्यजनाश्रयत्वान्मुख्यमेव गोः कर्मत्वमिति कथमत्र द्वितीयायास्संबंधे लक्षणेति वाच्यम् । तथाविवक्षायां मुख्यकर्मत्वेपि धात्वर्थ संबंधसामान्यविवक्षायां आनुशासनिकद्वितीयायां संबंधलक्षणोपपत्तेः । अतएव नाकथितञ्चेत्याद्यनुशासनवैयर्थ्यं । अतएव वस्तुतोत्रापादनत्वाख्य एव गोस्संबंधस्संबंधत्वेन रूपेण द्वितीयार्थ इतिध्येयम् ॥ ....

अन्येतु अकथितं चेति सूत्रवैय्यर्थ्यापत्तिभियैव पाचयतीत्यादिवत् दुहेरपि त्यजनं धात्वर्थतावच्छेदकं नभवत्येवेतिक मुख्यकर्मत्व प्रसक्तिरित्याहुः ।

एवमकर्मकधातुयोगे "देशः कालोभावोगन्तव्योध्वाचकर्मसंज्ञ" इत्यनुशासनात् वुरून् स्वपिति, मासमास्ते, गोदोहमास्ते, क्रोशमास्ते, इत्यादौ द्वितीया । अत्रद्वितीयार्थोवच्छेदकत्वं, तच्चदेशस्याध्वनश्च, कालभावयो स्वाधेयत्वं कालिकं साक्षात् भावनान्वयि ॥ ....

एवं "अधिशीङ्स्थासांकर्म" (१-४-४६) "अभिनिविशश्च" (१-४

४७) "उपान्वध्याङ्वसः,, (१--४--४८) इत्याद्यनुशासनात् अधिशेते अधितिष्ठति अध्यास्तेवा वैकुण्ठं हरिरिति, अत्र द्वितीयादेराधेयत्वमर्थः । अभिनिविशते सन्मार्गमित्यत्रच । क्वचिन्न, पापेभिनिवेशः । उपवसति अधिवसति अनुवसति आवसति वा वैकुण्ठं हरिरित्यत्रच । अभुक्तयर्थस्यन, वने उपवसति । अत्र सर्वत्राधेयत्वस्य स्वाश्रयकर्तृकत्वसंबंधेन भावनायामन्वयः । ....

एवं "क्रुधद्रुहोरुपसृष्टयोःकर्म,,(१--४--३८)इतिसूत्रात् शत्रुमभिक्रुध्यति अभिद्रुह्यतीति द्विताया । उपसृष्टयोः -- उपसर्गयुक्तयोः । अत्र उद्देश्यत्वंद्वितीयार्थः , साक्षात् संबंधेन भावनान्वयी । अकर्मकत्वाच्च न मुख्य कर्मत्वं ॥ ....

एवं"उभसर्वतसोःकार्याधिगुपर्यादिषु त्रिषु । द्वितीया म्रेडिता तेषु" अभितः परितः समया निकषा हाप्रतियोगेपि । "अन्तरान्तरेणयुक्ते,, (२-३-४) इत्यनुशासनात् ,उभयतःकृष्णम् गोपाः,सर्वतःकृष्णंगोपाः,धिक्कृष्णाभक्तं, उपर्युपरि लोकंहरिः, अध्यधिलोकं, अधोधोलोकं, अभितःकृष्णम्, परितः कृष्णम्, ग्रामं समया निकषा , हाकृष्णाभक्तं, बुभुक्षितं नप्रतिभातिकिंचित् , अन्तरात्वां मांहरिः, अन्तरेण हरिं न सुखमित्यादौ उपपदयोगे तत्तल्लाक्षणिकार्थेषु द्वितीया, तत्राद्ययोःप्रतियोगित्वं द्वितीयार्थः । सच साक्षात्संबन्धेन नाम्येवान्वेति । उपपदविभक्तित्वादितिबहवः ॥ ....

वस्तुतस्तु व्युत्पत्त्यन्तरकल्पनापत्तेः तत्रापि भावनायामेवाक्षिप्तायां श्रुतायां वान्वयः । सच स्वनिरूपकोभयपार्श्वस्थित गोपवृत्तित्वेनेति , उपपदार्थस्य संसर्गघटकत्वादुपपदविभक्तित्वम् ॥

एवमभितः कृष्णं, परितः कृष्णमित्यत्रापि द्रष्टव्यम् । धिक्कृष्णाभक्तमित्यत्राधारत्वं तदर्थः, तस्यच स्वनिरूपकधिक्काराश्रयत्वसंसर्गेण तस्या मेवान्वयः ॥

नचैवं धिङ्मूर्खेति प्रथमानापत्तिः , तत्रमूर्खस्य संबोधनद्वारा क्रियान्वयेन धिक्कारघटितसंसर्गेण क्रियान्वयविरहात् । उपर्युपरि लोकमित्यादौच

निरूपितत्वं द्वितीयार्थः, लोकनिरूपितोपरितनत्वविशिष्ट देशनिरूपितोपरितनत्वविशिष्ट तत्तद्देशस्थहरिकर्तृकाक्रियेति शाब्दबोधः । 'उपर्युपरिबुद्धीनां च रन्तीश्वरबुद्धयः' इत्यादौ उपर्युपरिबुद्धीनां -- उत्तानबुद्धीनां उपरि, ईश्वरबुद्धय श्चरन्तीति अर्थकरणेन आम्रेडितत्वाभावान्नाद्वितीया ।

एवं ग्रामं समया ग्रामं निकषेत्यत्रापि निरूपितत्वं द्वितीयार्थः, तस्यच्च समयादिपदवाच्यसामीप्यद्वारकोन्वयः । हाकृष्णाभक्तमित्यत्र विषयत्वं तद्द र्थः, हाशब्दार्थः खेदास्तित्वं - तद्विषयकखेदोस्तीत्यर्थः । बुभु क्षितमित्यत्रचाधेयत्वं द्वितीयार्थः, विषयत्वं चाख्यातार्थः, स्वरूपसंबंधः प्रथमार्थः, तथाच किंचिन्निष्ठप्रतिभाविषयत्वं बुभुक्षितवृत्त्यभावप्रतियोगि प्रति भानिष्ठविषयतानिरूपितं किंचिन्निष्ठाभावप्रतियोगिवा प्रतिभाविषयकत्वं बुभु क्षितवृत्तिप्रतिभानिष्ठविषयतानिरूपितमिति शाब्दबोधः । अन्तराशब्दस्य म ध्यवाचित्वात् त्वां मा मित्यत्र संबंधित्वं द्वितीयार्थः, तव ममच मध्य इत्यर्थः । अन्तरेण हरिमित्यत्र प्रतियोगित्वम् द्वितीयार्थः, तत्परं योग्यतत्तत्संबंधाव च्छिन्नमितिध्येयम् ॥

एवं कर्मप्रवचनीयसंज्ञकशब्दप्रयोगेपि द्वितीया तत्तदर्थेषु लाक्षणिकी तथाहि -- कर्मप्रवचनीयास्तावत् अनु उप प्रति परि अभि अधि सु अति अ पि इत्यादयः । तत्र हेतुत्वसमानाधिकरणम् लक्षणं अनोरर्थः । यथा- ज पमनुप्रावर्षत्, जपरूपहेतूपलक्षितम् वर्षणमित्यर्थः । अत्राद्वितीयार्थ आधेय त्वं तस्य हेतुत्वे लक्षणत्वेचान्वयः, तयोश्च निरूपकतासंसर्गेण वर्षणे तस्यच्च कृतात्वित्येवं संसर्गः । एवं तृतीयार्थश्चानोरर्थः, नदीमन्वन्ववसितासेना । अत्र साहित्यरूपस्तृतीयार्थोनोरर्थः, स्थितिर्वात्वर्थः, निरूपितत्वं द्वितीयार्थः, नद्या सह संबध्यस्थितेत्यर्थः । हीनत्वंचानोरर्थः, अनुहरिं सुराः, हरेः हीनाइत्यर्थः । अत्र प्रतियोगित्वं द्वितीयार्थः । हीनत्वमधिकत्वञ्चोपार्थः, उपहरिं सुराः । बोधः प्राग्वत् । अधिकत्वे सप्तमी वक्ष्यते । प्रतिपर्यनूनांच सामान्यतो ल क्षणमर्थः । वृक्षं प्रति परि अनुवा विद्योततेचन्द्रमाः । अत्र द्योतकत्वं प्रत्या देरर्थः, आधेयत्वं द्वितीयार्थः, स्वाश्रयद्योतकत्वनिरूपकद्योतनानुकूलत्वं कृतो

संसर्गः । वृक्षनिरूपितद्योतनाश्रयत्वं चन्द्र वृत्तीति शाब्दबोधः । पूर्वं हेतुत्व समानाधिकरणम् लक्षणमनोरर्थ इति सामान्यतो लक्षणार्थमनोः प्रथक् ग्रहणं । एवमित्थंभूताख्यानेप्येते त्रयः । भक्तोयं विष्णुं प्रति परि अनुवा, इत्थंभूतइत्यर्थः । विषयत्वं प्रत्याद्यर्थः । निरूपितत्वं द्वितीयार्थः । भागेप्येते, लक्ष्मीः हरिं प्रति परि अनुवा, हरेः भाग इत्यर्थः । भागः-- स्वत्वं प्रत्याद्यर्थः । निरूपितत्वं द्वितीयार्थः । वीप्सायां चैते, वृक्षं वृक्षं प्रति परि अनुवा सिंचति । अत्र मुख्यकर्मत्वं यदाजलादेः, तदाजलं सिंचतीति प्रयोगः । यदातु वृक्षनिरूपित संयोगाश्रयत्वं विवक्षितं,जलनिरूपितसंयोगाश्रयत्वमेव वृक्षेपि विवक्षितं तदा वृक्षं जलेन सिंचतीति । प्रयोगः, तदा तस्य मुख्यमेव कर्मत्वं । यदातु जले मुख्यकर्मत्वं विवक्षित्वा प्रत्यादेश्च लक्षणार्थत्वमंगीक्रियते तदा वृक्ष म्प्रति जलं सिंचतीत्यपि प्रयोगः । नचैवं वीप्साभावेपि प्रत्यादेः कर्मप्रवचनीयसंज्ञात्वे वीप्सासु " प्रतिपर्यनव „ इति अनुशासनवैय्यर्थ्यं । प्रत्यादेः लक्षणार्थकत्वाभावेपि आभिमुख्यादिरूपार्थान्तरार्थकत्वे वीप्सायां सत्यामेव कर्मप्रवचनीयसंज्ञेयेवं पत्वात् । अतएव वीप्साया नप्रत्याद्यर्थत्वं, द्विर्वचनेनैवलाभात् । अतश्च तत्राभिमुख्यादिकं प्रत्याद्यर्थः, निरूपितत्वं द्वितीयार्थः । एवं भागभिन्नेषु लक्षणादिषु अभिरपि कर्मप्रवचनीयसंज्ञस्यात् । हरिमभिवर्तते भक्ताः, हरिमभिदेवं देवमभिसिंचति । एवं अधि परि आंते सु अपि इत्यादीनाम प्युदाहरणानि बोध्यानि ।

एवं कालाध्वनोरत्यन्तसंयोगेपिद्वितीया । मासमधीते क्रोशमास्ते । अत्र निरन्तरसन्निकर्षो द्वितीयार्थः । सच साक्षात्संबंधेनैव भावनान्वयी । तदेवं तत्र तत्र लाक्षणिकानुशासनान्यपि द्रष्टव्यानि । मुख्यस्वकर्मत्वासंभवेतु तदेव द्वितीयार्थः । यत्रतु मुख्यस्या मुख्यस्यवा विशेषणं, शुक्लमोदनं पचति, शुक्लां गां दोग्धि पय इत्यादौ , तत्र पदद्वयेन शुक्लगुणविशिष्टौदन कर्मत्वस्यैव लक्षणात्तस्यच भावनायामन्वयेपि " गुणवचनानामाश्रयतोलिंगवचनानिभवन्तीति „ अनुशासनादुपस्थितत्वाद्विशेषणविभक्तिः शुक्लपदोत्तरद्वितीयासामुख्यमात्रार्था. ननु अरुणेकहायन्यादिवत् विशेषणस्य प्रथगेव भावना

न्वयः । तस्या एककर्मत्वभंगापत्तेः । नापि शुक्लपदार्थस्या भेदेनौदनान्वयः , नामार्थस्य स्वोत्तरविभक्त्यर्थेन क्लृप्तान्वयस्य नामार्थान्तरेणान्वये व्युत्पत्त्यन्तरक ल्पनापत्तेः । अतएव भावनाया एककर्मकत्वभंगभिया द्विकर्मकधातुस्थलेपि एकमेव कर्मत्वेन भावनान्वयि । अपरन्तु द्वितीयालक्षितकरणत्वादिनैव भावना न्वयि । पाश्चात्यधात्वर्थान्वयस्तु कर्मत्वेनैवेति नधातोः द्विकर्मकत्वबाध इति व्यक्तं कौस्तुभे । ....

तत्सिद्धं सर्वत्र द्वितीयार्थस्य भावनान्वय इति । ....

नन्वेवं मृदु ओदनं पचति स्तोकमोदनं पचतीत्यादौ कर्मकारकविशे षणत्वात् द्वितीयोपपत्तावपि यत्र " क्रियाविशेषणानांनपुसक ,, मित्यनुशासनात् मृदु पचति स्तोकं पचतीत्यादि नपुंसकलिंगनिर्देशस्तत्र क्रियाविशेषणत्वादभे दसंबन्धेन क्रियान्वयेपि द्वितीयोत्पत्तौ प्रमाणाभावः । नहि किंचिदनुशास नं तत्रास्ति । साधुत्वार्थं तत्रद्वितीयेतिचेत् ; साधुत्वार्थं चतुर्थ्यादेरप्यापत्तेः । प्रथमातिक्रमे कारणाभावेन प्रथमाया एवापत्तेश्च । किञ्च नामार्थस्य स्वोत्तर विभक्त्यर्थे क्लृप्तान्वयस्याभेदसंबंधेनापि धात्वर्थान्वयाभ्युपगमे व्युत्पत्त्यन्तरकल्पना पत्तिः । सुखं स्त्रपिति, सुखमास्ते, सुखं गच्छतीत्यादौ अभेदान्वयानुपपत्तिश्च । नचात्र कर्मणिद्वितीया, धात्वर्थतावच्छेदकफलशालित्वस्य सुखेबाधात् , सु खमोदनं पचतीत्यादौ द्विकर्मकतापत्तेश्च । अकर्मक स्वप्यादिकर्मत्वस्यानुक्तिसह त्वाच्च । सुखादेः कर्मत्वे सुखमोदनः पच्यते , स्तोकमोदनः पच्यत इत्या दौ द्वितीयानापत्तेश्च । कृद्योग ओदनस्येव षष्ठ्यापत्तौ सुखमोदनस्य पक्तेत्या दौ द्वितायानापत्तेश्च । अतः कथंक्रिया विशेषणानामन्वय इति चेत् !

अत्र वैय्याकरणाः -- धात्वर्थीभूतफूत्कारादिव्यापारस्य फलं विक्लृप्तिरपि धात्वर्थः, तद्विशेषणंच स्तोकादिकमिति तस्य कर्मत्वात् तद्विशेषणस्य द्वि तीयान्तत्वं ॥ ....

नच विक्लृप्त्यादिफलस्यैव क्रियाजन्यफलाश्रयत्वरूपमुख्यकर्मत्वाभावः, विक्लृप्तेरिव तदुत्पत्तेरपि विक्लृप्तिमुत्पाद्यंति इति विवरणानुरोधेन धातुवाच्यत्वा

त् क्रियाजन्योत्पत्त्याश्रत्वेन विक्लृप्तेरपि मुख्यकर्मत्वात् , तद्विशेषणे द्विती येापपत्तेः । ....

नचैवं विक्लृप्तिं पचतीति प्रयोगापत्तिः, तस्या धातुनैवोक्ततया उक्तार्था नामप्रयोगात् । अकर्मकधातुस्थलेपि धातुवाच्यफलस्य शरीरलाघवादेः सुख साधनत्वात् , सुखपदेन सुखसाधनं लक्षणयित्वा तस्य द्वितीयान्तत्वोपपत्तिः ।

नचैवं तस्य धातोरकर्मकत्वानापत्तिः , स्वव्यधिकरणफलाश्रयकव्यापा रवाचित्वाभावेना कर्मकत्वोपपत्तेः। अतस्तस्य सकर्मकाकर्मकसाधारण्येन उत्पत्त्या श्रयरूपकर्मसत्त्वेपि नक्षतिः । अतो युक्तैवैतादृशकर्माणि सर्वत्र द्विती या । अतएव तादृशविषयएव " क्रियाविशेषणानांनपुंसक „ मित्यादिना न पुंसकत्वं । तच्चानियतलिंगविषयं नियतलिंगानान्तु तत्तल्लिंगत्वेसत्येव द्विती यान्तत्वं । अतएवादिं पचतीत्यादिप्रयोगः । आदिभूता या विक्लृप्तिस्तज्ज नको व्यापारइत्यर्थः ॥ ....

नचतादृशकर्मकारकमादाय कर्मणिलकारः कृद्योगनिमित्तका षष्ठीवा आपद्येतेति वाच्यम् । व्यापारव्यधिकरणधातुवाच्यमुख्यफलाश्रयरूपकर्मण्ये व तयोः प्रवृत्तेः । उत्पत्तेरमुख्यफलत्वेन तदाश्रये तयोरप्रवृत्तेः । " लःकर्म णिचभावेचाकर्मकेभ्यः,, (३--४--६९) "कर्तृकर्मणोः कृति,,(२--३--६५) इत्यादिसूत्रेषु कर्मपदेन तादृशकर्मग्रहणस्यैव निर्णीतत्वात् । इतरथासर्वेषामेवसक र्मकत्वेन अकर्मकेभ्य इति पदोपादानानुपपत्तेः । अतश्च स्तोकमोदनः पच्यते स्तोकमोदनस्य पक्तेत्यादौ द्वितीयान्तत्वोपपत्तिः । यत्रतुविधिवशात् धात्वर्थस्य क रणत्वं तत्र तद्विशेषणे तृतीया, यथा--ज्योतिष्टोमेन यजेतेति, तत्राति समीचीनं ज्योतिष्टोमेन यजेतेति यद्विशेषणं न तद्धात्वर्थस्य अपितु भावनायाः, तत्रातएव साप्रथमा न द्वितीयेत्याहुः, तन्न --व्यापारव्यधिकरणधातु वाच्यमुख्यफलाश्रयरूप कर्मण्येव लकारषष्ठ्योः प्रवृत्तौ चत्रेणास्यते मासः,सुप्यते रात्रिरिति कर्मलका रानापत्तेः । नहि तत्र तादृशंफलमस्ति, तथात्वे तस्य स्वाभाविका कर्मकत्वानापत्तेः धातूपात्तफलसमानाधिकरणव्यापारवाचित्वंहि भवन्मतेऽकर्मकत्वम् । अतस्तत्र तादृशफलाप्रसिद्धेः नद्वितीयाकर्मलकारार्थापत्तिः । अतएव नपरसमवेतक्रिया

जन्यधात्वर्थतावच्छेदकीभूतफलशालित्वं कर्मत्वं, नापितत्सनियतोऽखण्डोपाधिःकर्मत्वं । तदभावेपि चैत्रोमासमास्ते, आस्यते मास, इत्यादौ कर्मत्वाव्याप्यकत्वेन व्यभिचारात् । अपितु तद्व्यापकं तत्समानाधिकरणमात्रंवा । अथवा किमित्याद्याकांक्षापूरकत्वसमनियतमेवाखण्डोपाधिरूपं कर्मत्वं, तच्च पचतीत्यादौ ओदनस्येवआस्यतइत्यादौ मासादेरप्यविशिष्टमिति युक्तमेवात्राद्वितीयादि । तच्च तत्तद्धातुसमभिव्याहारगम्यमित्युक्तं कौस्तुभे । सुखादिरूपाक्रियाविशेषणानांतु न किमित्याकाराकांक्षापूरकत्वं । अपितु कथमाकांक्षापूरकत्वमेव । अतएव कथं पचति, स्वपितिवा सुखं, कीदृशंपचति, स्तोकं मृदु वेत्यादि प्रश्नोत्तरभावोपि संगच्छते । अतो नतत्रकर्मत्वसंभवः । नापि तदनुरोधेन उत्पत्तेः फलस्यवा धातुवाच्यत्वकल्पनं, अन्यलभ्यत्वात्तयोः । अतएव पाकत्वयागत्वादिनैव धातोः शक्तिरित्युक्तं प्राक् । कथं तर्हि तत्र द्वितीयानियमः । "उभसर्वतसोः कार्याधिगुपर्यादिषु त्रिषु । द्वितीयाम्रेडिता तेषु ततोन्यत्रापि दृश्यते ।" इत्यनुशासनादिति गृहाण । अत्र ततोन्यत्रापि -- प्रातिपदोक्तादन्यक्रियाविशेषणेपीत्यर्थः । अतएव " अन्यत्रापि दृश्यत,,इत्युक्तं । तदेतदाह -- "अभितः परित स्समया निकषाहाप्रति,, इति, इत्याम्रेमप्रातिपदोक्तपरतया भाष्यानारूढं व्याख्यानमप्यसंगतं, वैय्यर्थ्यापत्तेः ।

तस्मात् सिद्धंक्रियाविशेषणेषु द्वितीयामात्रानुशासनं ।

अतएवात्र द्वितीयामात्रग्रहणान्न लकारषष्ठ्यौ । अतस्तेषामपि तात्पर्यानुरोधेन फलद्वारको धातूपात्तव्यापारद्वारकः साक्षादेववा भावनायामन्वयः । सर्वत्रैव द्वितीयान्तत्वं । तत्र स्तोकं मृदु समीचीनमित्यादौ द्वितीयार्थो लक्षणया आश्रयत्वं । स्तोकत्वादिकञ्च लक्षणया शक्त्यैववा प्रातिपदिकार्थः । तदाश्रयत्वञ्च यदि फलसंबन्धे तात्पर्यं तदा स्वनिरूपकफलजनकव्यापारानुकूलत्वसंसर्गेण कृतावन्वेति । यदिव्यापारसंबन्धे तदा स्वनिरूपकव्यापारानुकूलत्वसंसर्गेण । यदितु भावनासंबन्धे तदा साक्षादेवेति विवेकः ।

एतेन भावनासंबन्धे प्रथमेवेति परास्तं । भावनायास्संबन्धविवक्षयाऽऽदिः पचतीति प्रयोगापत्तेश्च । नचासाधिष्टः, भवन्त्येष्यलेखनात् ।

तिष्टोमेनेत्यत्रापि न क्रियाविशेषणत्वं, अपितु धात्वर्थस्य करणत्वेन भावनान्वयवन्नामार्थस्यापि करणत्वेनैवान्वयः । नामार्थोहि यद्यपि धात्वर्थ एव, तथापि धातुना विजातीययागत्वादिना बोधात्, नाम्नाच ज्योतीरूपस्तोमकत्वादिना-बोधान्न पर्यायत्वम् । अभेदबोधस्तु अरुणैकहायनीवदिति वक्ष्यते । अत एव ज्योतिष्टोमेनेत्यत्राभेदार्थिका तृतीयेति तार्किकमतमपास्तं, अभेदलक्षणायां प्रमाणाभावात् । धान्येन धनीत्यादावपि धनसंबन्धे धान्यस्य करणत्वोपपत्तेरभेदलक्षणायाः क्वाप्यदर्शनाच्च । करणत्वविवक्षाभावएवच क्रियाविशेषणत्वनिमित्तका द्वितीया, स्वाहाकारं यजतीतिवत् लौकिकवाक्ये न विरुद्ध्यते । स्वाहाकारवाक्येतु व्यत्ययानुशासनेन करणत्वलक्षणा । सुखंस्वपितीत्यादावपि जनकत्वं द्वितीयार्थः । सुखजनकः स्वाप इत्यर्थः । यद्वा सुखपदमनायासपरं, द्वितीयार्थः पूर्वकत्वं, आयासाभावपूर्वकस्वापादिरित्यर्थः । सर्वथा सिद्धं सर्वत्र द्वितायार्थो भावनान्वयीति। भावनाच लिंगानन्वयिपदोपस्थाप्या । तच्च तिङ् कृन्निपातादपि, नतु प्रथमायामिव तिङादेव । अतएव ओदनं पचति, ओदनं करिष्यन्, ओदनं भुङ्क्त इत्यादौ सर्वत्र द्वितीयाया भावनान्वय इति संक्षेपः ॥

एवं –" कर्तृकरणयोस्तृतीया " (२–३–१८) इति सूत्रात् कर्तृत्वं करणत्वञ्च तृतीयार्थः । सोपि तथैव भावनान्वयी । तत्र " स्वतन्त्रः कर्ता" (१ – ४ – ५४) इतिसूत्रेण कर्तृत्वस्य निर्वचनं । तथाहि- इतर कारकाप्रयोज्यत्वेसति कारकान्तरप्रयोक्तृत्वं कर्तृत्वं । कारकान्तरनिष्ठव्यापारजनकत्वं विशेष्यदळार्थः । अस्तिचेदंकुविन्दादौ तंत्वादिनिष्ठपटजनकसंयोगरूपव्यापारजनकत्वात् । कुठारेपि काष्ठनिष्ठसंयोगजनकत्वेन कर्तृत्वापत्तौ सत्यन्तम् । तस्य पुरुषजन्यसंयोगाश्रयत्वेन तत्प्रयोज्यत्वादिति सर्वदर्शनानुयायिनः प्राञ्चः । तन्न -- ईश्वरप्रयोज्यजीवेऽव्याप्तेः, दण्डजन्यसंयोगाश्रयत्वेन कुलाले अव्याप्तेश्च । अतो धातूपात्तव्यापाराश्रयत्वं कर्तृत्वमिति वैय्याकरणनव्याः । चैत्रः पचति घटो भवतीत्यादौ चैत्रघटादौ पाकभवनादिरूप व्यापाराश्रय

त्वालक्षणसमन्वयः । व्यापारपदोपादानात् न फलाश्रये कर्मणि ओदनादावति व्याप्तिः । पाचयति चैत्रो मैत्रेणेत्यादौ पाकस्य णिजर्थस्य चोभयोर्धातूपात्त व्यापारत्वा त्तदाश्रययोरुभयोरपि कर्तृत्वोपपत्तिः । परन्तु चैत्रवृत्त्येव कर्तृत्वं ति ङुपात्तमिति तस्यैव तदुपात्तसंख्यान्वयो नतु मैत्रस्य ॥

नचैवं चैत्रो मैत्रं गमयतीत्यत्र मैत्रेकर्तृत्वापत्तिः । तस्मिन्नपि तद्वत्व हारसत्त्वेनेष्टत्वात् । तृतीयायास्त्वनुशासनबलात् कर्मसंज्ञावरोधान्न प्रसङ्गः । एवं स्थाली पचतीत्यादौ स्थालीनिष्ठव्यापारस्यैव धातुनोक्तत्वात् कर्तृत्वाविरोध इ त्याहुः । तन्न-- चैत्रो न पचति, भूतले घटो नास्तीत्यादौ धातूपात्तव्यापारा भावाश्रये चैत्रादावव्याप्तेः । नच तत्र चैत्रवृत्तिः पाकोऽभावप्रतियोगीति, भूतलवृत्तिघटनिष्ठासत्ता अभावप्रतियोगिनीत्येवं शाब्दबोधांगीकारान्नाव्याप्तिः । ह्रदे वह्निर्नास्तीत्यादौ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिनोऽप्रसिद्ध्याऽव्या प्तयापत्तेः । नच तत्र वह्निवृत्तिसत्ता ह्रदवृत्त्यभावप्रतियोगिनीत्येवंशाब्दबोधांगी कारात्तन्निवारणं, तथात्वेपि शुक्लोघटोभवतीत्यादौ शुक्लगुणस्यैव भवनाश्रयत्वेन तत्रातिव्याप्तिप्रसंगात् । घटेऽव्याप्तेश्च । अथ तत्र विशेषणविशेष्ययोरुभयोर्भ वनाश्रयत्वं; तदाचक्रे घटो भवतीत्यादौ चक्रस्यापि तदापत्तिः । अथ य द्भात्वर्थाश्रयत्वेन योविवक्षितः सतत्कर्तेत्युच्यते, चक्रेच विवक्षाभावान्नाति प्रसंगः; तदा घटः पटोनेत्यादौ अन्योन्याभावप्रतियोगिनि घटादौ भात्व र्थाश्रयत्वाभावात् अव्याप्तिः ।

नच तत्र भवति पदाध्याहारेण घटपटोभयवृत्ति तादात्म्यभवनं भूधा तुना लक्षयित्वा तादृशभवनमभावप्रतियोगीति शाब्दबोधांगीकारात् अर्थाच्चा न्योन्याभावबोधोपपत्तेः तदात्मत्वेन भवनस्यचोभयवृत्तित्वादुभयकर्तृत्वोपपत्तेरि ति वाच्यम् , तथात्वे उभयत्रापि तिङुपात्तसङ्ख्याकत्वापत्तेः । घटोनपटा वितिप्रयोगानापत्तेश्च ॥

एतेन घटो न पट इत्यत्र घटपदं घटप्रतियोगिकान्योन्याभावलक्षकं , नञ्पदञ्च तात्पर्यग्राहकं, अन्वयश्चोभयोरपि शुक्लोघटः अघटः पट इतिव

तृ पार्ष्टिकाभेदसंबंधमादाय विशेषणविशेष्यभावेनवा अध्याहृतक्रियायामि त्यपास्तम् , तथात्वे तद्वदेव घटोनपटावितिप्रयोगानापत्तेः । घटोनश्यतीत्या दौ कथमपि कर्तृत्वानुपपत्तेश्च । ....

अतो यद्धात्वर्थावच्छिन्नलिंगानन्वयिपदोपस्थाप्यार्थाश्रयत्वं यस्य तस्य तत्कर्तृत्वम् । अस्तिचेदं पच्यते चैत्रेण पचति चैत्र इत्यादौ, चैत्रस्य धात्वर्थाव च्छिन्नकृत्याश्रयत्वात् । कर्मलकारेणापि कृतेरुक्तेः । घटो भवतीत्यादौ आख्यातेनाश्रय त्वस्य लक्षणात्, घटो नश्यतीत्यादौ प्रतियोगित्वस्य तेन लक्षणात्, तत्रापि लक्षणस मन्वयः । अवच्छिन्नत्वञ्च स्वरूपसंबंधविशेषः, नतु जनकत्वाद्येव । तेन प्रतियोगित्वादे र्नाशाजनकत्वेपि नक्षतिः । चैत्रः पाचकः पक्तेत्यादौ कृतैव पाकानुकूलकृते र्लिंगानन्वयिन्या उक्तत्वात् तस्य कर्तृत्वोपपत्तिः । चैत्रस्य पाक इत्यादि घञन्ते घञ र्थे लिंगान्वयेपि पचिधातुनोक्तस्य लक्षणया पाकावच्छिन्नव्यापारस्य लिंगानन्वया त्त दाश्रये चैत्रे कर्तृत्वाविरोधः । घञावा लक्षणया कृते शक्तया पाकाख्यस्य भावस्योक्तेः पाकावच्छिन्नकृतिसाध्यः, पाक इति शाब्दबोधः । कृतौ चैत्र स्यान्वयात् कर्तृत्वोपपत्तिः । शेषषष्ठीत्वाद्वा कर्तृत्वाभावेपि न क्षतिः । प्रधा नभूताध्याहृतक्रियायामेवच तस्यान्वयः । चैत्रस्य कृतिरित्यादिप्रयोगोपपत्त्यर्थं चेदमावश्यकम् । चैत्रेण कृत इत्यादिकर्मकृत्स्वपि धातुना पाकानुकूलव्यापार स्येव वस्तुतउक्तेः, तदाश्रयत्वेन चैत्रे कर्तृत्वाविघातः । एवं पाचयति चैत्रो मैत्रेणेत्यादावपि मैत्रस्य धातूक्तपाकानुकूलकृत्याश्रयत्वात् कर्तृत्वं, चैत्रस्यत्वा ख्यातोपात्तकृत्याश्रयत्वादेव । अत्र पाकंकारयतीति विवरणात् , कृत्यनुकूल व्यापारो णिजर्थ इति लक्षणसमन्वयः । कर्मलकारस्थलेच फलस्य संसर्गवि धयैव भानांगीकारेण पदोपस्थाप्यत्वाभावान्न तदाश्रय ओदनेऽतिव्याप्तिः । विक्लिद्यन्ति तंडुला इत्यादावाख्यातेन धात्वर्थाश्रयत्वलक्षणात् तद्वति तण्डुले नाव्याप्तिः । एवं स्थाली पचतीत्यादावपि धातुना स्थालीनिष्ठस्यैव व्यापार स्योक्तेर्न कर्तृत्वविघातः । कर्मकर्तृस्थलेच फलस्यैवास्मिन् पक्षे अख्यातेन ल क्षणा नौदनस्य कर्तृत्वविघातः । ततश्च वस्तुपदाभिधेयभावनाया श्चैत्रान्व यवारणार्थं लिंगानन्वयीति । चैत्रो न पचति भूतले घटो नास्तीत्यादौ चैत्र

वृत्तिपाकभावना भूतलाधिकरणकघडसत्ताश्रयत्वज्ञाभावप्रतियोगीति शाब्दबो धांगीकारा न चैत्रादेः कर्तृत्वविघातः । अभावे चैत्रवृत्तित्वं समभिव्याहारात् , नञावा चैत्रवृत्त्यभावलक्षणेति न विरोधः,। वायौ रूपं नास्ति जातौ स मवायेन सत्ता नास्ति, ह्रदे वह्निर्नास्तीत्यादौचोक्तविधशाब्दबोधांगीकारे प्रति योगिप्रसिद्ध्यनापत्तेः अगत्या रूपादिवृत्ति तत्तत्संबंधावच्छिन्न विद्यमानत्वा श्रयत्वं वाय्वादिनिष्ठाभावप्रतियोगीति शाब्दबोधांगीकारा न रूपादेः कर्तृत्व विघातः । प्रकारान्तरन्तु सप्तमीप्रकरणे वक्ष्यते । घटः पटोनेत्यादौ भव ति क्रियाध्याहारात् घटपदेनच घटप्रतियोगिकान्योन्याभाववल्लक्षणात् नञ्पद स्यच तात्पर्यग्राहकत्वात् शुक्लोघटोस्तीतिवत् पार्ष्टिकान्वयलभ्याभेदमादायोभ योः क्रियान्वया दभयोरपि कर्तृत्वोपपत्तिः ॥

वस्तुतस्तु घटो नपटौ इत्यादौ विभिन्नसंख्याकत्वानुपपत्त्या नाभाव वल्लक्षणा, अतिव्याहृतक्रियावाचकाख्यातेन प्रतियोगित्वाश्रयत्वयोरुभयोरपि लक्षणा, तयोश्च यथातात्पर्यं घटपटान्वयात् घटपटसंबन्धिनी यथाक्रमम न्योन्याभावीये विद्यमानत्वसंबन्धिनी प्रतियोगित्वाश्रयत्वे इतिच शाब्दबोधां गीकारात् उभयोः कर्तृत्वोपपत्तिः । परन्त्वनुयोगिवृत्तिसंख्यावचनमेवाख्याते, नतु प्रतियोगिवृत्तिसंख्यावचनमिति नियमोप्यनुभवानुसारेण प्रकृते कल्प्यत इति, नैतादृशोपि बोधः । अपितु घटो भवति पटौ नभवत इति क्रियापदद्व याध्याहारेण एकघटवृत्तिभवनाश्रयत्वं पटद्वयवृत्तिभवनाश्रयत्वप्रतियोगिकान्यो न्याभाववदित्येवं । नञ्पदस्य तात्पर्यग्राहकत्वमंगीकृत्य द्वयोराख्यातयोः पश्य मृगो धावतीतिवत् स्वप्रतियोगिकान्योन्याभाववत्त्वसंसर्गेणान्वयः । मानसश्च भवनाश्रययोःभेदबोधः । एवंच स्वस्वसंख्यान्वयः कर्तृत्वंचोभयोरुपपन्नमि तिध्येयम् । ....

एवं सत्ता न समवायेन जातिवृत्तिरित्यादिप्रयोगा अपि लक्षणाध्याहा रादिना व्याख्येयाः, अयोग्यावेत्यन्यत्र विस्तरः । अत्रचाश्रयत्वमेव तृती-याप्रथमा तिबादीनामर्थः, अन्यत्तु सर्वं प्रमाणान्तरेण लभ्यमिति ध्येयम् ।

अथवा कृत्याश्रयत्वमेव मुख्यं कर्तृत्वं, यत्नवाचिकृञ्धातुघटितत्वात् कर्तृशब्दस्य, अन्यत्र कर्तृत्वव्यवहारोभाक्त एव द्रष्टव्यः । ....

वस्तुतस्तु " धर्मेचार्थेच कामेच नातिचरितव्या त्वयेयं " , " पत्युर्नोयज्ञसंयोगे " (४—२--३३) " जायापतीअग्नीनादधीयाताम् " इत्यादि प्रमाणान्तरानुरोधात् स्त्रिया अपि यजमानवदेव कर्तृत्वेवगते " वसन्तेब्राह्मणोग्नीनादधीत " " यजेतस्वर्गकामः " इत्यादौ एकत्वश्रवणं निषादस्थपत्यधिकरणन्यायेन लक्षणायां प्रमाणाभावात् उभयोर्व्यासज्य वृत्त्येकं कर्तृत्वं गमयति । तच्च न सखण्डोपाधिरूपं, बाधात् । अपितु पूर्वोक्तसखण्डोपाधिव्यापकं अखण्डोपाधिरूपं कर्तृत्वं, तद्गतमेवचैकत्वादिकमित्युक्तं प्राक् । अस्मिंश्च पक्षे कर्मकर्तृस्थलेपि न फललक्षणा, अपित्वाख्यातलक्ष्यस्याखण्डोपाधिरूपस्य कर्तृत्वस्यैवाख्यातोपात्तकृतावेव स्वसमानाधिकरणफलप्रयोजकत्वसंसर्गेणान्वयइत्युक्तं कौस्तुभे । इदमेवच कर्तृत्वं तृतीयार्थः । तस्यच चैत्रेण पच्यत इत्यत्र स्वनिरूपकपाकानुकूलत्वसंसर्गेण निरूपकत्वेनैववा लिंगानन्वयिभावनायामन्वयः । इदमेवच कात्यायनमते प्रथमार्थः , कर्त्राख्यातलक्ष्यं, कृत्प्रत्ययशक्यतावच्छेदकं कृद्योगनिमित्तकषष्ठीबोध्यंच । ....

करणत्वंच"साधकतमंकरणं"(१-४-४२)इतिसूत्रेणनिरुक्तं, तच्च कारकान्तरनिष्ठव्यापारद्वारा क्रियाहेतुत्वाभावेसति क्रियाहेतुत्वं । सत्यन्तेन कर्तृकर्मणोः करणनिष्ठव्यारद्वारा क्रियाहेतुत्वात् , अधिकरणकारकस्य ग्रहे स्थाल्यामोदनं पचतीत्यादौ कर्तृकर्मान्यतरनिष्ठव्यापारद्वाराक्रियाहेतुत्वात् , संप्रदानस्यच स्वानुमतिद्वारक कर्त्रिच्छोत्पादनद्वारा क्रियाहेतुत्वात् , अपादानस्यापि पतनप्रतिबन्धकसंयोगनाशकविभागद्वारा पतनहेतुत्वादतिव्याप्तिवारणम् । चरम कारणस्यैव लक्ष्यत्वेन कुठारादेरपि कर्त्रादिनिष्ठव्यापारद्वारा क्रियाहेतुत्वान्नाव्याप्तिरिति सर्वदर्शनानुयायिनः, प्राञ्चः । तन्न -- कुठारेण छिनत्तीत्यादिप्रयोगाणां भाक्तत्वे प्रमाणाभावात् । अतोयद्व्यापाराव्यवहितोत्तरं यत्क्रियानिष्पत्तिर्विवक्ष्यते , तत्तत्क्रियाकरणं । अधिकरणादिव्यापारानन्तरमेव यदा पच्यादिक्रियानिष्पत्तिर्विवक्षिता तदा तेषामपि करणत्वमिष्टमेव । पचि-

धातोश्च तदा तत्क्रियैव विवक्षिता । अतएव गवा दानं संपादयति, ब्राह्मणेन दानं साधयति, स्थाल्या पचतीत्यादयः प्रयोगा अपि संगच्छन्त इति वैय्याकरणनव्याः । तदपिन -- औषधभोजनेन परंपरया क्रमेण पुष्टिं संपादय इत्यादिप्रयोगाणां भाक्तत्वे प्रमाणाभावात् । अतोव्यापारवदसाधारणकारणत्वं करणत्वं । कर्त्रादीनांच करणत्वेपि नक्षतिः । उपाधिसांकर्यस्यादोषत्वात् । विवक्षातश्च कारकविभक्तय इत्यप्यन्ये । तदपिन -- भ्रम्या घटं करोति पुण्येन स्वर्गं भुङ्क्त इत्यादिप्रयोगाणां भाक्तत्वे प्रमाणाभावात् । अतः करणत्वं करणं करणमित्याद्यनुगतप्रतीत्या अखण्डोपाधिरूपमेव कारणत्वादिवत् । तदेवच तृतीयार्थः । तस्यच कर्त्रादावतिप्रसंगनिरासः पूर्ववत् । तस्यच स्वनिरूपकधात्वर्थावच्छिन्नत्वसंसर्गेण भावनान्वयः । पूर्ववदेव एककार्यकारणभावकल्पने लाघवात् । प्रकृत्यर्थान्वयस्त्वाधेयतया तत्र बोध्यः । नवीनतार्किकास्तु - प्रकृत्यर्थनिरूपितजन्यत्वमेव तृतीयार्थः, तस्यचाश्रयतया धात्वर्थान्वय इत्याहुः । तन्न - अनुशासनबाधे प्रमाणाभावात् । ....

नच परशुना छिनत्ति नदात्रेणेत्यादौ दात्रजन्यत्वाभावस्य क्रियायां बोधानापत्तिः, निरूपकतासंबन्धेन परशुनिष्ठकरणत्वस्य निरूपकतासंबन्धावच्छिन्नप्रतियोगिताकदात्रनिष्ठकरणत्वाभावस्यच क्रियायां बोधेनार्था जन्यत्वाभावबोधापपत्तेः । अतः प्रचुरप्रयोगाविशेषात् कर्तृत्वकरणत्वयोरुभयोरपि तृतीयायाः शक्तिः । योग्यतादिरूपतात्पर्यग्राहकानुरोधेनच विशेषनिर्णयः ।....

एवं द्वितीयावदेवतृतीयायाअपि अनुशासनानुरोधेन लाक्षणिकार्था अनुसंधेयाः । तथाहि-- " प्रकृत्यादिभ्यउपसंख्यानं " इति वार्तिकात् प्रकृत्या चारुः, प्रायेण याज्ञिकः, गोत्रेण गार्ग्यः, समेनैति,द्विद्रोणेन धान्यं क्रीणाति, सुखेन यातीत्यादौ करणत्वातिरिक्तार्थान्तरलक्षणा । प्रकृतिपदेनहि स्वाभाविकी सामग्री उच्यते, तज्जन्यचारुत्ववानित्यर्थः । ....

नचैवं करणत्वस्यैव तृतीयार्थत्वात्प्रथमानुशासनवैय्यर्थ्यं, जन्यत्वस्यतत्त्वेन तृतीयार्थत्वमंगीकृत्य तत्सार्थक्यात् । अतएव तृतीयार्थस्यजन्यत्वाश्रय

चारुत्वाश्रयवृत्तित्व संबन्धेनाक्षिप्तक्रियायामन्वयः । प्रायश्शब्दस्यावच्छेदकावच्छिन्न त्वराहित्यविशिष्टबाहुल्यमर्थः । तृतीयायाअवच्छिन्नत्वमर्थः । तथाच किंचिन्न्यून-बाहुल्यावच्छिन्न यज्ञविद्यासंबन्धवानित्यर्थः । ....

एवं गोत्रशब्दस्य संबन्धविशेषवाचित्वेपि गोत्रत्वपरत्वमंगीकृत्य गोत्र-त्वावच्छिन्नगर्गसंबन्धवानित्यर्थः । तृतीयायावा अभेदार्थकत्वमंगीकृत्य गो-त्राभिन्नसंबन्धवानित्यर्थः । अस्मिंश्चपक्षे गोत्रत्वं तृतीयार्थः, अवच्छिन्नत्वं संसर्गः, गोत्रवृत्तिगोत्रत्वावच्छिन्न संबन्धवानित्यर्थः । अनयैवच रीत्या स-मवायेन रूपवानित्यादिप्रयोगा उपपादनीयाः । धान्येन धनीत्यादौतु तृ-तीयार्थाभेदस्य धान्यत्वस्य धनेन्वय इति विशेषः । धनसंबन्धं प्रति धान्य स्यकरणत्वादेववा तृतीयेतिकौस्तुभेरपष्टम् । समेनेत्यत्रावच्छिन्नत्वं तृतीयार्थः, समदेशावच्छिन्नागमनभावनेत्यर्थः । द्वयोः द्रोणयो स्समाहारः द्विद्रोणम्, पा त्रादित्वात् स्त्रीत्वाभावः । परिमितत्वं तृतीयार्थः । द्रोणद्वयपरिमितं धान्यं क्रीणातीत्यर्थः । करणत्वेनाप्यन्वयसंभवेपि परिमितत्वेन बोधार्थं पृथगनुशासनं । सुखेन यातीत्यादौ सुखपदं दुःखाभावपरं, तृतीयार्थश्च प्रयोजकत्वं, तच्च प्र तियोग्यनुत्पादकत्वरूपं । तथाच दुःखाजनकं यानमित्यर्थः । एवं " दिवः कर्मच " (१ - ४ - ४३) इतिसूत्रेणादिवृधात्वर्थस्य साधकतमं कर्मसंज्ञं स्यात्, लक्ष्यानुरोधेन स्वरितत्वानुगतेः, पूर्वसूत्रस्थकरणशब्दानुवृत्त्या करणसंज्ञं चेत्यर्थकेन साधकतमस्यैव संज्ञाद्वयकरणात्, अक्षैरक्षान् वा दीव्यतीतिप्रयोगद्वयं । अत्र पणपूर्वकाक्षसाध्यक्रियाया धात्वर्थत्वात् तत्राक्षाणां मुख्यमेव करण त्वम् । तत्र च द्वितीया लाक्षणिकी । ....

नच करणसंज्ञायाः देवना अक्षा इत्यत्र ल्युटि सावकाशत्वात्, क-र्मसंज्ञायाश्च दीव्यन्ते अक्षा इति कर्मलकारे सावकाशत्वात् दीव्यतीत्यत्र क र्त्राख्यातेसंज्ञाद्वयप्रयुक्तकार्यप्रसंगे संज्ञागतपरत्वा द्वितीयाया एवापत्तौ तृती यान्तस्य प्रयोगस्य कथं साधुत्वं विभक्तिगतपरत्वाद्धावपरीत्यमितिवाच्यम् । संज्ञाद्वयविधानबलादेव व्यवस्थितकार्यसिद्धौ चशब्देनैकत्र संज्ञाद्वयप्र युक्तकार्यद्वयविधानप्रतीत्या तत्सिद्धेः । अनएव कार्ययोगेवानेन समुच्चयो विधी

यते, संज्ञयो स्समुच्चयस्य संज्ञाद्वयविधानबलादेव सिद्धेः । अतएव चशब्दाभा वेपि मनसा देव इत्यादौ करणसंज्ञया तृतीया,कर्मसंज्ञयाच कर्मोपपदत्वलाभेन देवइत्यण्प्रत्ययस्यापि सिद्धिरविकला। अतश्चशब्दस्य द्वितीयासिद्धिरेव प्रयोजनम्।।

नच तथापि दीव्यतेक्षा इत्यत्र कर्मत्वस्याभिधानेपि करणत्वस्यानभिधाना त्तृतीयापत्तिः । देवना अक्षा इत्यत्रच करणत्वस्य ल्युटाभिधानेपि कर्मत्व स्यानभिधानात् अक्षानिति द्वितीयापत्तिरिति वाच्यम् । एकस्यैव साधकत मत्वस्य उभयसंज्ञकत्वेन उभयत्राप्युभयाभिधानोपपत्तेः । एवं "अपवर्गे तृतीया" (२– ३–६) इति सूत्रेण फलप्राप्तिरूपापवर्गे द्योत्ये कालाध्वनोरत्यन्तसंयोगे तृतीयास्यात् , अन्यथा द्वितीया, इत्यर्थकेन मासेनाधीतोनुवाक इत्यत्र तृतीयया फ लप्राप्तिर्द्योत्या । अर्थस्तु मासमधीतोनायात इतिवद्बोध्यः । एवं "सहयुक्तेऽप्रधाने " (२—३—१९)'एवं साकंसार्द्धं समं योगेपि'इत्यनुशासनेनपुत्रेण सहागतः पितेति तृतीया । अत्रच पुत्रस्याप्राधान्यं न क्रियानन्वयित्वेनैव, " सहैवदश भिः पुत्रैर्भारं वहति गर्दभी" इत्यादिवत् । अपितु यस्य क्रियासंबंधः शा ब्दः तत्प्रधानं, यस्यत्वार्थः तस्याप्राधान्यं । अतएव पुत्रेणसहेत्यत्र पुत्रस्याप्या गमनप्रतीतिः । अत्र नसहशब्दयोग एव विवक्षितः, " वृद्धोयूना " इति तदभावेपि तृतीयादर्शनात् । अतएवसहत्वमत्र तृतीयार्थः । सहशब्दः काचित्कः तात्पर्यग्राहकः । तदन्वयस्तु स्वनिरूपकपित्राश्रयकत्वसंबंधेन क्रियायामे व । साहित्यंच " सहैवदशभिःपुत्रैः " इत्यादौ तत्काले विद्यमानत्वं । पु त्रेणसहागतः इत्यादौचैककियान्वयित्वमित्यादियोग्यतानुसारेण बोध्यं। ....

एवं " येनांगविकारः " (२--३--२०) इत्यनुशासनात् येनांगेन विकृतेनांगिनोविकारोलक्ष्यते ततस्तृतीया स्यादित्यर्थकात्: अक्ष्णा काण इत्यादौ तृतीया । अत्र चाक्षिपदं चक्षुर्गोळकपरं, वृत्तित्वं तृतीयार्थः, काणपदं चक्षुरुपघातव द्गोळकवत्परं, चक्षुर्गोळकवृत्ति चक्षुरुपघातवद्गोळकवानितिबोधः । तृती यार्थवृत्तित्वस्य तेन संबन्धेन भावनायामन्वयात् । तथा " इत्थंभूतलक्षणे " (२--३--२९)इत्यनुशासना ज्जटाभिस्तापस इत्यादौ तृतीया । अत्र लक्षणत्वापर पर्यायं ज्ञाप्यत्वं तृतीयार्थः । जटाज्ञाप्यतापसत्ववानित्यर्थः । लक्षणत्वंच विशेष णोपलक्षणसाधारणम् । तेन, शमेन तापस इत्यपि सा धु ।

एवं "संज्ञोन्यतरस्यांकर्मणि" (२–३–२२) इत्यनुशासनात् संपूर्वकस्य जानातेः कर्मणि तृतीया, द्वितीयावा । पित्रा संजानीते, पितरं संजानीते । " हेतौ " (२-३-२३)इतिसूत्रेण हेतुत्वं तृतीयार्थः । तच्च यद्यपि कारणत्वरूपमेव, तथापि द्रव्यादिनिरूपितत्वघटितसंसर्गेण क्रियान्वयि हेतुत्वं । यथा – दण्डेनघट इत्यादौ । धात्वर्थनिरूपितत्वेन संसर्गेण क्रियान्वयितु करणत्वमिति विशेषः । अतएव हेतुत्वे लक्षणा । अथवा अखण्डोपाधिरूप करणत्वे शक्तिः, तत्परिचायके सखण्डोपाधौ लक्षणेतिपृथगनुशासनं । फलादिसाधारणं च तत् । अध्ययनेन वसति । तादर्थ्यमात्रं तृतीयार्थः । एवं " अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीयावाच्या " इतिवार्तिकात्तृतीया । यथा – दास्या संयच्छते, ददातीत्यर्थः । शिष्टव्यवहारेतु भार्यायै संयच्छति । अथंच स चोपि शक्यलक्ष्यसाधारण स्तृतीयार्थः पूर्ववदेव लिंगानन्वयि पदोपात्तभावनायांश्रुतायांगम्यमानायांवान्वेतीतिबोध्यं । यथा–शतेनवत्सान् पाययतिपयः, शतेन परिच्छिन्नानित्यर्थः । परिच्छेदं प्रति तस्य करणत्वात् । अत्र गम्यमानत्वमध्याहृतपदेन बोध्यत्वं । अलं श्रमेणेत्यत्रतुनानुमेया, अलमिति निपातेनैव साध्यंनास्तीत्यर्थकेन साधनक्रियाया उपात्तत्वात् । अयमर्थश्च विभक्तिमात्रे बोध्यः । ....

एवं " चतुर्थी संप्रदाने " (२–३–१३) इति सूत्रात् संप्रदानत्वार्थिका चतुर्थी भावनान्वयिन्येव । तच्च "कर्मणायमभिप्रैतिससम्प्रदानम् " (१–४ – ३२) इतिसूत्रे निरुक्तं । दानक्रियाकर्मकारकेण यमभिप्रैति – संबध्नाति, स संप्रदानमिति सूत्रार्थः । सम्प्रदीयते अस्मै इत्यन्वर्थसंज्ञाबला द्दान क्रियालाभः । ....

तथाच त्यज्यमानद्रव्योद्देश्यत्वेसति स्वीकारवत्त्वं संप्रदानत्वमिति न्यायसुधाकारादयः । तेषामयमाशयः, स्वीकारो यथेष्टविनियोगयोग्यतोपधायकः प्रतिग्रहः । विप्राय गांददातीत्यत्र लक्षणसमन्वयःस्फुटः । उद्देश्यत्व स्वीकारौच गवा विप्रस्य संबन्धः । तत्रोद्देश्यत्वं त्यागकालीनचतुर्थ्यंतपदोच्चारणजन्यज्ञानविषयत्वं । नच तत्र प्रमाणाभावः, शिष्टाचारस्यैव प्रमाणत्वात् ।

"नाम गोत्रे समुच्चार्य सम्यक् श्रद्धान्वितोददेत् ।
संकीर्त्य देशकालादि तुभ्यं संप्रददे इति ॥
नममेति स्वसत्ताया निवृत्तिमपि कीर्तयेत् ।
दानहोमादिकंकुर्या देवंश्रद्धासमन्वितः ॥"

इति हेमाद्रिधृत वृद्धवसिष्ठवचनाच्च । अतएव पूर्वदळं इन्द्रादि देवतायामतिव्याप्त मतःस्वीकारेति । तत्र प्रतिग्रहस्य नवमे निषेधात् । अतएव त्यज्यमानद्रव्योद्देश्यत्व मुक्तविधं इन्द्रादिरूपेर्थेशब्देच । त्यागकालीन-चतुर्थ्यंतपदोच्चारणकर्मत्वरूपं वा देवतात्वं तद्धितवाच्यं, वृद्धव्यवहारात् । "प्रजापतये जुहोती"त्यादौच तादृशदेवतात्वे लक्षणेति तस्यास्ततो दौर्बल्यमुक्त माकरे । विक्रेत्रादौच स्वीकारसत्त्वेपि पूर्वदळनैयत्याभावात् आद्यदळं । तत्रापि सर्वं त्यागादिकं अन्यलभ्यं । केवलमुद्देश्यत्वं स्वीकारश्च चतुर्थ्यर्थः । तथाचोक्तपरंपरासंबन्धेन विषयतावटितसामानाधिकरण्येनच त्यागद्वारको भावनान्वयः । एवं चैतादृशलक्षणानाक्रांते यत्र यत्र चतुर्थीप्रयोगः, तत्र सर्वत्र लक्षणेति । काशिकावृत्तिकारस्याप्ययमेवाभिप्रायः । ....

वैय्याकरणनव्यास्तु "यत्क्रियाकर्मसंबन्धजन्यफलभागित्वेनोद्देश्यं यत् तत्त्व क्रियासंप्रदानं । विप्राय गां ददातीत्यत्र दानक्रियाकर्मकारकेण गोद्रव्येण यस्त्व त्वाख्यो विप्रस्य संबंधः, तज्जन्यं फलं सुखादि, तद्भागित्वरूपेण उद्देश्यत्वं विप्र इति सदानक्रियासंप्रदानमिति लक्षणसमन्वयः । पितृस्वर्गोद्देशेन ब्राह्मणसंप्रदानकधनदाने पितुः स्वर्गादिरूपफलभागित्वेपि नसंप्रदानत्वं । तत्फलस्य पितरि धनसंबंधाभावेन तत्संबंधजन्यत्वाभावात् । अतएव कर्मकारकजन्यत्वं पितृस्वर्गादावपि कदाचि त्संभाव्येतेति संबंधजन्यत्वानुधावनं । अत्र " कर्मणाय " मिति द्वितीयानिर्देशात् कर्मकारकं प्रति संप्रदानस्य ईप्सितत्वं लभ्यते । तेन फलभागित्वेन ईप्सितत्वं संप्रदानत्वमित्यर्थः । विप्राय गां ददाति स्वर्गकाम इत्यादौच कर्मकारकस्य स्वर्गांगभूतदानांगत्वेपि तत्संबंधस्यानुषंगिक विप्रप्रीतिजनकत्वात् तस्यापि दानसाद्गुण्यजनक

त्वेन ईप्सितत्वात् विप्रे संप्रदानत्वाविघातः । अजां ग्रामं नयतीत्यत्र अजासंबंधजन्यफलवत्त्वेन ग्रामस्य ईप्सितत्वाभावात् न ग्रामस्य संप्रदानत्वप्रसंगः । तादृशफलवत्त्वेन ग्रामस्येप्सितत्वेतु अजां ग्रामाय नयतीति प्रयोग इष्टएव । एवमेवच रजकाय वस्त्रं ददाति, रजकस्य वस्त्रं ददातीत्यादयः प्रयोगाअप्युपपादनीयाः । एवमुपाध्यायस्तस्मै चपेटिकां ददातीति महाभाष्यप्रयोगोपि संगच्छते । इतरथा स्वस्वत्वनिवृत्ति परस्वत्वापादनरूपदानघटितसंप्रदानत्वे ईदृशप्रयोगाणां भाक्तत्वापत्तेः । अतो बहुतरप्रयोगसाधारणमिदं संप्रदानत्वं । अत्रच विप्राय गां ददातीत्यत्र फलजनकत्वरूपमुद्देश्यत्वनिरूपितत्वंच चतुर्थ्यर्थः । प्रकृत्यर्थः चतुर्थ्यर्थे फले निरूपितत्वेच साक्षात्संबंधेनान्वेति । चतुर्थ्यर्थयोश्च परस्वत्वापादकस्वस्वत्वनिवृत्त्यनुकूलक्रियावाचिधात्वर्थतावच्छेदकयोरस्वत्वेन्वयः । द्वितीयार्थवृत्तित्वस्यापि तत्र स्वस्वत्वेवान्वयः । तथाच विप्रवृत्तिसुखजनक विप्रनिरूपितगोवृत्तिस्वत्वजनक गोवृत्तिस्वस्वत्वनिवृत्तिजनकक्रिया चैत्रनिष्ठेति शाब्दबोधः । रजकाय वस्त्रं ददातीत्यादौ समर्पणएव धात्वर्थतावच्छेदके चतुर्थ्यर्थयोरन्वयः । चपेटांददातीत्यत्रापि चपेटासंयोग एव धात्वर्थतावच्छेदके तयोरन्वयः । वृक्षायोदकं सिंचतीत्यत्रापि वृक्षनिष्ठपुष्टिजनकत्व वृक्षनिरूपितत्वयोर्धात्वर्थतावच्छेदके उदकनिष्ठसंयोगेऽन्वय" इत्याहुः । तन्न, संप्रदानशब्दस्यान्वयबोधे न शक्तयंतरकल्पने प्रमाणाभावात् । ग्रामं गच्छतीत्यत्र चैत्रस्य गमन क्रियाकर्मकारकग्रामजन्यसंयोगजन्यसुखभागित्वेन संप्रदानत्वापत्तेश्च । नचेष्टापत्तिः, ग्रामं गच्छति चैत्रायेति प्रयोगापत्तेः । ....

नच " आकडारादेकासंज्ञा " (१ -- ४ -- १) इत्यनुशासनात् संज्ञाद्वयप्रयुक्तकार्यानुपपत्तेः, " विप्रतिषेधे परं कार्यं " इतिस्मृतिवशात् गच्छतीत्यत्र कर्त्राख्याते कर्तृसंज्ञाया आवश्यकत्वे पूर्वाया स्संप्रदानसंज्ञायाबाधोपपत्तिरिति वाच्यं । तथात्वे चैत्रेण ग्रामो गम्यत इतिवत् चैत्राय ग्रामो गम्यत इति प्रयोगापत्तेः । कर्तृत्वविवक्षायां तृतीयाप्रयोगवत् संप्रदानत्वविवक्षायां चतुर्थीप्रयोगस्य निवारयितुमशक्यत्वात् । इतरथा ग्रामं गच्छ

ति ग्रामे गच्छतीति विवक्षाभेदेन प्रयोगद्वयानापत्तेः नच चैत्रः स्वस्मै गच्छतीतिवत् तादृशप्रयोगे इष्टापत्तिः, स्वस्मै गम्यत इत्यस्य स्वार्थं गम्यत इति विवरणानुरोधेन तादर्थ्यचतुर्थीत्वेन संप्रदानविभक्तित्वानुपपत्तेः । ....

नचैतदोषवारणाय क्रियाकरणत्वं कर्मविशेषणं, ग्रामश्च नगमनकरणं, देयंतु दानक्रियाकरणमिति नासंभव इति वाच्यं । देयस्यापि स्वत्वरूपफलांशे करणत्वं, नतु तदनुकूलक्रियांश इति गमनेपि तदविशिष्टं । गमनफलस्य संयोगस्यापि ग्रामजन्यत्वाविशेषात् । विप्रनिष्ठफलसामान्याभावेपि विप्राय मया गौर्दत्ता, नतु तस्य कश्चित् भोगो जात इत्यादि व्यवहारानुपपत्तेर्नफलघटितसंप्रदानत्वं युक्तं । यस्तु प्रतिग्रहाभावेपि " मनसापात्रमुद्दिश्य जलमध्ये जलं क्षिपेत् " इति वचनात् पात्रोद्देश्यकत्यागमात्रेणास्मै मया दत्ता, नत्वनेन गृहीतेति व्यवहारः, स दानस्यैव तत्र परस्वत्वोत्पत्स्यभावेना जातत्वात् भाक्त एवेति नपूर्वमते तादृशस्थले अव्याप्तयापत्तिः ।

वस्तुतस्तु मतद्वयेपि पदार्थद्वयेपि शक्तिद्वयकल्पनस्यावश्यकत्वादन्यमतेच पदार्थैकदेशे फले प्रकृत्यर्थस्यान्वयापत्तेः, निरुक्तसंप्रदानत्वाज्ञानेपिच विप्राय गां ददातीति वाक्यात् विप्रसंप्रदानकं गोकर्मकं दानमिति बोधादयात् देयद्रव्यनिष्ठस्वत्वनिरूपकत्वरूपं तत्समनियतमखण्डोपाधिरूपमेववा संप्रदानत्वं युक्तमाश्रयितुं । तदेवच शाक्तश्चतुर्थ्यर्थः । तत्र प्रकृत्यर्थो विप्रः साक्षादाधेयत्वेनैवान्वेति । तस्यच धर्मिग्राहकप्रमाणेन ससंबंधिकत्वकल्पनात्, निरूपकापेक्षायां " कर्मणायमभिप्रैति " (१ - ४ - ३२) इति सूत्रात् कर्मकारकनिरूपकत्वावगतेः स्वनिरूपकदेयद्रव्यकर्मकदानानुकूलत्वसंसर्गेण कृतान्वयः । मुख्यदानातिरिक्तेच सर्वत्र भाक्त स्संप्रदानव्यवहारः । अतएव " प्रजापतये जुहोती " त्यादौ लक्षणयैव देवतात्वं प्रतिपाद्यत इति चतुर्थ्या स्तद्वितापेक्षया दौर्बल्यम् । अतएव दानातिरिक्तयत्किंचित्क्रियाजन्यफलभागित्वरूपभाक्तसंप्रदानत्वेपि चतुर्थीविधानार्थं "क्रियाग्रहणं कर्तव्य" मिति वार्तिकं क्रियायायमभिप्रैति सोपि संप्रदानसंज्ञस्यादित्यर्थकं । नचैवं क्रियाफलशालित्वेन घटं करोतीत्यादौ चतुर्थ्यापत्तिः, परत्वेन द्वितीयया च

तुर्थ्या बाधात् । यत्किंचित्क्रियाजन्यफलशालित्वात्मकस्य भाक्तसंप्रदानत्वस्य सकर्मकाकर्मकसाधारणस्य सकर्मकमात्रविषयिण्या द्वितीयया बाधोपपत्तेश्च अतएव पत्ये शेते इत्यत्र चतुर्थी । अतएवमुख्य दानातिरिक्तसकर्मक धातुस्थलेपि यत्र वृक्षायोदकं सिंचतीत्यादौ कर्मकारकांतरं लब्धं, तत्रापि वृक्षे निरुक्तभाक्तसंप्रदानत्वविवक्षायां चतुर्थी भवत्येव । कर्मांतराभावेतु द्वितीयैव । तत्रापि गत्यादिसकर्मकधातुविशेषस्थले पुनः प्रतिप्रसवार्थं " गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि " (२ – ३ – १२) इत्यनुशासनं चेष्टारूपकर्मणि अध्वभिन्ने द्वितीयाचतुर्थ्यौ स्यातामित्यर्थकं । ग्रामं गच्छति ग्रामाय गच्छति, अचेष्टायांतु मनसा हरिं व्रजति, अध्वनितु पन्थानं गच्छति, यत्राधिष्ठितएव पथ्ययं चतुर्थीपर्युदासः । यदातु उत्पथात् पंथा एव क्रमितुमिष्यते तदा उत्पथेन पथे गच्छतीति भवत्येव चतुर्थी । अत्र सर्वत्र आश्रयत्वं लक्षणया चतुर्थ्यर्थः । तच्च स्वनिरूपकफलजनकक्रियानुकूलत्वसंसर्गेण कृतावन्वेति । ....

यतु " कर्मणायमभिप्रैति " इति सूत्रस्थ यथाश्रुतभाष्यस्वरसा द्वाक्यपदीयकैय्यटादौ " क्रियाग्रहणंकर्तव्य " मिति वार्तिकप्रत्याख्यानं कृतं । तथाहि, सर्वाहिपाकादिक्रिया ज्ञानेच्छादिक्रियाकर्म, तद्यत्रपत्येशेतइत्यादौ चतुर्थ्यन्तप्रयोगस्तत्रानुमेयां ज्ञानादिक्रियां विवक्षित्वा तत्कर्मत्वेन शयनं विवक्ष्यते, तत्र ज्ञानादिक्रियाकर्म कारकभूत शयनं प्रतीप्सितत्वेन पत्युस्संप्रदानत्वोपपत्तेः नार्थो वार्तिकेन । यत्रतु घटं करोति, ओदनं पचति, हरिं मनसा व्रजति, पंथानं गच्छती, त्यादौ द्वितीयाप्रयोगः, तत्र ज्ञानादिक्रियया अभेदंपाकादिक्रियायां विवक्षित्वा तांप्रति ईप्सिततमस्य ओदनादेः कर्मत्वं, ग्रामं गच्छतीत्यादौ तु द्विविधप्रयोगसत्त्वात् भेदाभेदोभय विवक्षयोभयसंप्रदानस्य दानक्रियामात्रनिरूपितत्वानंगीकाराच्च पत्येशेते इत्यादावपि मुख्यसंप्रदानत्वाविरोध इति ।

तन्न – पच्यादिधातुभ्यो ज्ञानाद्यनुभवाभावात् नियमेनारोपे प्रमाणाभावाच्च । विध्यभावे कारणाभावेन प्रयोगगतसाधुत्वज्ञानाभावात् , भेदाभे

द्व्यवस्थाप्रतीत्यनुपपत्तेश्च । तस्मात् क्रियाग्रहणं कर्तव्यमिति न प्रत्याख्येयं । अतएव भाष्यकारेणापि " कर्मणे " तिसूत्रे प्रत्याख्यातमपि " गत्यर्थकर्मणी " ति सूत्रे क्रियाग्रहणमपि तत्र चोद्यत इति ग्रन्थेन विधित्वं तस्याश्रितमेव । नचैवं " गत्यर्थ कर्मणी " तिसूत्रप्रत्याख्यानानुपपत्तिः । धात्वर्थतावच्छेदकफलशालित्वरूपे तत्समनियताखण्डोपाधौवा विवक्षितेद्वितीया, तदनवच्छेदकक्रियाजन्यफलभागित्वे विवक्षिते चतुर्थीत्येव उभयोपपत्तेः, सूत्रवैय्यर्थ्यमित्याशायात् । गमनजन्यस्वास्थ्याद्याश्रयत्वेन ग्रामाय गच्छतीति प्रयोगोपपत्तेः । नचैवमध्वादिरूपापवादविषयेपि प्रयोगद्वयापत्तिः । तदंशे अप्रत्याख्यानस्य भाष्यसिद्धत्वात् । भाष्यकारोहि अध्वादीनां न स्वरूपेणापवादविषयता, स्त्रियं गच्छतीत्यत्र द्वितीयानियमानापत्तेः । अपितु संप्राप्तत्वेन प्राप्तएव पंथाः स्त्रीच, तत्रपंथानं गच्छति स्त्रियं गच्छति इति द्वितीयानियम इति प्रतिपादयन् 'असंप्राप्ते कर्मणि द्वितीयाचतुर्थ्यौ भवत इतिवक्तव्य'मित्याह वृत्तिकारोपि अमुमेवार्थमनुमन्यते ॥ ....

अतस्सिद्धं धात्वर्थतावच्छेदकं यत्क्रियाफलं तदाश्रयत्वमेव एवमादिस्थले भाक्तसंप्रदानत्वमिति । एवं " रुच्यर्थानां प्रीयमाणः "(१-४-३३) इत्यनुशासनात्, रुच्यर्थधातूनां योगे प्रीयमाणो रुचिविषयीभूतद्रव्यजन्यप्रीतिमानर्थोपि संप्रदानसंज्ञस्स्यादित्यर्थका चैत्राय रोचते मोदक इत्यादौ चतुर्थी । अत्र मोदकेपि धातुयोगस्य सत्त्वात् तद्वारणाय प्रीयमाण इति वास्तवंच विशेषणं । वृत्तित्वं लक्षणया चतुर्थ्यर्थः । स्वनिरूपकरुचिनिरूपकत्वेनाख्यातान्वयि विषयत्वं लक्षणया आख्यातार्थः । अभिलाषो धात्वर्थः । चैत्रवृत्तित्ववद् रुचिविषयत्वं मोदकवृत्तीति शाब्दबोधः । एवं " श्लाघह्नुङ्स्थाशपांङ्गीप्स्यमानः " (१-४-३४) इत्यनुशासनात् एषां धातूनां प्रयोगे बोधयितुमिष्टः संप्रदानसंज्ञः स्यादित्यर्थकात् कृष्णाय श्लाघते ह्नुते तिष्ठते शपतेवा इत्यादौ चतुर्थी । श्लाघा स्तुतिः । ह्नुवनं संगोपनं । अत्र वास्तवे ज्ञापयितु मिष्यमाणेत्सति चतुर्थी । अत्राद्यधातुद्वये सकर्मकत्वात्कर्मत्वं चतुर्थ्यर्थः । द्वितीया बाधेनच चतुर्थी । तृतीयचतुर्थ्योस्त्वकर्मकत्वात् षष्ठीबाधेन संबंधश्चतुर्थ्यर्थः । अथवा सर्वत्र श्लाघा

दिज्ञापनं लक्षणया धात्वर्थः । तंप्रति कृष्णस्य कर्मत्वेन द्वितीयाप्राप्तौ चतुर्थी । एवं " धारेरुत्तमर्णः " (१--४--३५) इति सूत्रेण धारयतेः योगे उत्तमर्णः उक्तसंज्ञस्यादित्यर्थकेन चैत्राय शतं धारयतीत्यत्रचतुर्थी । अत्र चतुर्थ्यर्थः उत्तमर्णत्वापरपर्यायप्रत्यर्पणीयत्वाख्यः सम्बन्धः । तस्यच स्वनिरूपकद्रव्यकर्मकसाधारणानुकूलत्वेन कृतावन्वयः । तथाचचैत्रप्रत्यर्पणीयं शतंधारयतीत्यर्थः । यदातु स्वत्वाख्यसंबंधविवक्षा तदा चैत्रस्य शतं धारयतीति प्रयोगः । नचास्यमुख्यसंप्रदानत्वविवक्षयैव चतुर्थ्युपपत्तेः सूत्रान्तरवैय्यर्थ्यं, दानक्रियाभावेन तस्याप्राप्तेः, प्रत्यर्पणीयत्वविवक्षयातत्सार्थक्याच्च । अतएव क्रियाग्रहणं कर्तव्यमित्यनेनापि नवैय्यर्थ्यं ॥ ....

एवं " स्पृहेरीप्सितः " (१-४-३६) इत्यनुशासनात् स्पृहयतियोगइष्टः संप्रदानसंज्ञस्यादित्यर्थकात् पुष्पेभ्यःस्पृहयतीत्यत्र चतुर्थी । अत्र चतुर्थ्यर्थः कर्मत्वं,संबंधत्वेन विषयत्वरूपस्संबन्धश्च । तयोश्च तात्पर्यानुरोधेन एकैकशः समुदितयोर्वा बोधः । तेन निरवकाशत्वात् संप्रदानसंज्ञा कर्मसंज्ञाशेषषष्ठयोर्बाधिकेति वाक्यपदीयप्रभृतयः ॥

वस्तुतस्तु ईप्सितग्रहणात् ईप्सिततमत्वप्रयुक्तकर्मसंज्ञायास्सम्बन्धसामान्यप्रयुक्तशेषषष्ठयावा बाधे प्रमाणाभावः । तेन विषयित्वमेव तत्त्वेन चतुर्थ्यर्थः । तस्यच स्वाश्रयस्पृहावत्त्वेनाख्यातार्थाश्रयत्त्वेन्वयः । कर्मत्वविवक्षायां पुष्पाणि स्पृहयतीति प्रयोगः । शेषत्वविवक्षायांच पुष्पस्य स्पृहयतीति । अतएव स्पृहणीयशोभ इति कर्मत्वार्थकःप्रत्ययः । "कुमार्य इव कांतस्य त्रस्यन्ति स्पृहयंतिचे" ति षष्ठीप्रयोगोपि संगच्छते । हरदत्तादयोप्येवं । " एवं क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः"(१-४-३७) इत्यनुशासनात् क्रुधद्रुहाद्यर्थानां धातूनां योगे यं प्रति कोपः ससंप्रदानसंज्ञस्यादित्यर्थकात् शत्रवे क्रुध्यति, द्रुह्यति, ईर्ष्यति असूयतीत्येवं चतुर्थी । अत्र क्रोधोमर्षः, द्रोहोऽ

पकारः । ईर्ष्याऽसहनं । असूयागुणेषुदोषारोपः । अत्राद्ययोरकर्मकत्वात्तद्योगे-षष्ठी प्राप्तौ, अंत्ययोश्च सकर्मकत्वात् द्वितीया प्राप्तौ, चतुर्थीविधिः । तद्द्वारेण यं प्रति कोप इत्यनेन यत्संबंधित्वयत्कर्मत्वयोरुपादानात् । अतएवनात्र पूर्ववत् द्वितीयांतादिप्रयोगोपि । चतुर्थ्यर्थोपि सएव । वास्तवो यत्र कोपः तत्र कर्मत्वादौ चतुर्थीत्यर्थः । कोपपदोपादानात् भार्यामीर्ष्यतिमैनामन्योद्राक्षीदित्यत्र नचतुर्थी । अतएव आद्ययोर्धात्वर्थयोरुपसर्गयोगे कर्मसंज्ञाविधिः, शत्रुमभिक्रुध्यति अभिद्रुह्यतीत्यादौ । "कृधकृहोरुपसृष्टयोः कर्म"(१-४-३८)इत्यनेन । एवं " राधीक्ष्योर्यस्य विप्रश्नः" (१-४-३९) इत्यनेन एतयोर्योगे विविधप्रश्न संबंधी संप्रदानसंज्ञस्स्यादित्यर्थकेन कृष्णायराध्यति ईक्षतेवा इत्यत्र चतुर्थी,विविधं पृष्टोगर्गः कृष्णसंबंधिशुभाशुभंपर्यालोचयतीत्यर्थः । अतएव संबंधित्वं चतुर्थ्यर्थः । एवं " प्रत्याङ्भ्यांश्रुवः पूर्वस्यकर्ता " (२-४-४०) इत्यनुशासनात् आभ्यामुपसर्गाभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्तनरूपव्यापारस्य कर्तासंप्रदानसंज्ञस्यादित्यर्थकात् विप्रायगांप्रतिश्रुणोतीत्यत्र चतुर्थी।अत्रान्यदीयप्रवर्तनापूर्वकोभ्युपगमोधात्वर्थः, वृत्तित्वंचतुर्थ्यर्थः । सचस्वाश्रयप्रवर्तनाजन्याभ्युपगमानुकूलत्व संसर्गेण कृतावन्वेति, चैत्रनिष्ठप्रवर्तनाप्रयोजितः प्रतिजानीतइत्यर्थः । एवं "अनुप्रतिगृणश्च"(१-४-४१)इत्यनेनाभ्यां परस्यगृणाते र्योगेपूर्वव्यापारस्य कर्तृभूतकारकंसंप्रदानसंज्ञंस्यादित्यर्थकेनहोत्रे अनुगृणाति,प्रतिगृणातीत्यत्र चतुर्थी,शंसनपूर्वकप्रोत्साहनंधात्वर्थः,वृत्तित्वरूपस्संबंधः कर्तृत्वञ्च चतुर्थ्यर्थः, तयोश्चक्रमेणशंसनप्रोत्साहनद्वारकोभावनान्वयः। होता प्रथमंशंसति तमध्वर्युः प्रोत्साहयतीत्यर्थः। एवं "परिक्रयणे संप्रदानमन्यतरस्याम्"(१-४-४४)इत्यनेन य न्नियतकालं भृत्यार्थं करणं परिक्रयणं तस्मिन् साधकतमंकारकं विकल्पेन संप्रदानसंज्ञंस्यादित्यर्थकेन शतायशतेनवा परिक्रीतइत्यत्र विकल्पेन चतुर्थी।करणत्वं चतुर्थ्यर्थः । एवं "तादर्थ्येचतुर्थी वाच्या " इति वार्तिकादुपकारकापकारकसाधारणं तदुद्देश्यकत्वं लक्षणया चतुर्थ्यर्थः, मुक्तयेहरिं भजति,मशकायधूम इत्यादौ,तच्च जनकत्वादिनाऽनेकप्रकारेण

तेनब्राह्मणाय दधितिष्ठतीत्यादावपि द्रव्यद्वारकक्रियासंबन्धेपि चतुर्थी । अतएव क्रियाग्रहणं कर्तव्यमित्यनेनापि नगतार्थत्वं । एवं "कल्पिसंपद्यमानेच" इत्यनेन प्रकृतिरूपं कारणं कार्यात्मनायदासंपद्यते तदा कार्यवाचकाच्चतुर्थीस्यात् कल्पनयर्थकधातुयोगे । मृत् घटायकल्पते संपद्यते जायतेवेत्यादौ । मृत् घटाकारेण परिणमतइत्यर्थः । इदंच कार्यकारणयोः भेदविवक्षायाम् । पार्थिकाभेदविवक्षायां मृद्घटःकल्पतेइतिप्रथमैव । "जनिकर्तुःप्रकृतिः"(१-४-३०)इत्यनेन मृदोपादानत्वविवक्षायान्तु मृदोघटः कल्पतइत्यत्रकारणे पंचमी, कार्येतु अभिहितत्वात्प्रथमैव । नच तादर्थ्ये चतुर्थीत्यनेनगतार्थत्वं, परिणामत्वत्वेन बोधस्यविवक्षितत्वात् । एवमग्रेपि । तथा"उत्पातेनज्ञापितेच"इत्यनेन उत्पातत्वेन ज्ञापनविषयेचतुर्थीत्यर्थकेन वातायकपिलाविद्युद्विद्योततइत्यत्र चतुर्थी । तत्त्वेनज्ञापकत्वंचतुर्थ्यर्थः । एवंहितसुखादियोगेपि चतुर्थी,ब्राह्मणाय हितंसुखंवेत्यादौ । इदंचतद्योगे चतुर्थीसमासविधानरूपज्ञापकवशात् । संबन्धित्वं चतुर्थ्यर्थः ।

....

एवं"क्रियार्थोपपदस्यकर्मणिस्थानिनः"(२-३-१४)इत्यनेनक्रियावाचि उपपदंयस्य तस्य स्थानिनः तुमुण्ण्वुल्रूपस्याप्रयुज्यमानस्य कर्मणिचतुर्थीस्यादित्यर्थकेन फलेभ्योयाति,नमस्कुर्मोनृसिंहायेत्यादौ चतुर्थी । फलान्याहर्तुं नृसिंहमनुकूलयितुमित्यर्थः । इदंच तुमुनन्तस्याप्रयोगे । ण्वुलन्तस्याप्रयोगेतु फलान्याहारकइत्यर्थः । द्वितीयापवादार्थं कर्मग्रहणं । प्रयुज्यमानेतु द्वितीयैव । अत्राप्रयुज्यमानाहरणानिरूपितं कर्मत्वं चतुर्थ्यर्थः । तस्यच स्वनिरूपकाहरणक्रियोद्देश्यक यानानुकूलत्वं कृतौसंसर्गः । संसर्गकोटिप्रविष्टत्वादेवचाहरणस्याशाब्दत्वेपि नक्षतिः ॥

....

एवं " तुमर्थाच्चभाववचनात् "(२-३-१५)इतिसूत्रेण "भाववचनाश्च" (३-३-१२) इतिसूत्रेण विहितोयस्तुमुनासमानार्थकःप्रत्ययः तदर्थाच्चतुर्थीस्यादित्यर्थकेन यागाय यातीत्यादौ चतुर्थी । यष्टुंयातीति तदर्थः । सच प्रकृतेयज् । नच तादर्थ्येचतुर्थीत्यनेन गतार्थत्वं , तुरनेव तादर्थ्यस्यापि यज्ञा उक्ततया साधुत्वार्थं प्रथमातिक्रमे कारणाभावेन प्रथमाप्राप्तौ चतुर्थीविधिसार्थक्यात । नच शुद्धभावस्य यज्ञेत्यस्य तादर्थ्यचतुर्थ्यपनेः

भाववचनाश्चेति सूत्रवैयर्थ्यम । क्रियार्थायांक्रियायां विशेषविहितेन तुमुना घञो बाधापत्तेः, तदन्तोपरितादर्थ्यचतुर्थ्यप्रसक्तेः । अतस्तदबाधार्थं घञादेरपि तदर्थेविधानेकृते प्रथमाबाधार्थंचतुर्थीविधिसार्थक्यात् ।

एवं " नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च " (२-३-१६) इति शास्त्रेण एभिः शब्दैर्योगे चतुर्थी स्यादित्यर्थः केन हरये नमइत्यादौ चतुर्थी । उद्देश्यत्वं चतुर्थ्यर्थः । तस्यच स्वनिरूपकनमनानास्तित्व वैशिष्ट्यमाख्यातार्थे संसर्गः । उपपदस्य संसर्गघटकत्वे तात्पर्यग्राहकत्वाच्चो पपदविभक्तित्वं । नच तादर्थ्यचतुर्थ्यैव ब्राह्मणाय दधीत्यादाविव गतार्थत्वम् । नमःपदयोगे षष्ठीव्यावृत्त्यर्थत्वेन नमनार्थकपदान्तरयोगेवा चतुर्थीव्यावर्तकत्वेनच सार्थक्यात । यदातुनमनस्य धात्वर्थत्वं तदा धातोस्संसर्गघटकत्वे तात्पर्यग्राहकत्वात् कारकविभक्तित्वेन देवान्नमस्करोतीत्यादौ कर्मत्वार्थिकाद्वितीयापि नानुपपन्ना । प्रजाभ्यःस्वस्ति । अग्नयेस्वाहा । पितृभ्यः स्वधा । दैत्येभ्योहरिरलम् । पर्याप्तवर्थकश्चायमलंशब्दः । उपलक्षणंच प्रभुसमर्थशक्तादिशब्दानां । तस्मैप्रभवतीति प्रयोगः । नत्वत्र षष्ठीव्यावृत्तिः, तेन "प्रभुर्बुभूषु र्भुवनत्रयस्ये " ति नविरोधः । वषट् इन्द्राय । चकारः षष्ठीनिषेधार्थकः ।

एवं " मन्यकर्मण्यनादरेविभाषाप्राणिषु " (२-३-१७) इत्यनेन प्राणित्वर्जितेमन्यतेः कर्मणितिरस्काररूपानादरेविवक्षिते चतुर्थी वास्यादित्यर्थकेन नत्वांतृणम् तृणायवामन्य इत्यत्र वैकल्पिकी चतुर्थी । अत्रकर्मत्वं चतुर्थ्यर्थः । अत्रच तृणपदं तृणसदृशपरं , तथाच तृणसदृशकर्मभिन्नं त्वत्कर्मकं ज्ञानमित्यर्थः । त्वत्कर्मकज्ञाने तृणसदृशकर्मभेदश्चात्र त्वयि तृणसदृशभेदे पर्यवस्यति । तत्र चानादरविवक्षायां त्वां तृणसदृशमपि नमन्य इत्यर्थः फलितः । अतोनोत्कृष्टत्वविवक्षायां चतुर्थीप्रयोगः । अत्र मन्य इत्युपादानात् मन्व इत्यत्रनचतुर्थी, तेन त्वां तृणं मन्व इत्येव प्रयोगः । अत्राप्राणिष्वित्यपनीय नौकाकान्न शुकसृगालवर्ज्येष्वितिवाच्यम् । तेनाप्राणित्वेपि नत्वां नावमन्वंवामन्यइत्यादौ नचर्थी । प्राणित्वेपिच नत्वां शुने मन्य इत्यादौ भवत्येव चतुर्थी ।

नचैवं मन्यतिकर्मत्वाविशेषाद्युष्मच्छब्दादपि चतुर्थ्यापत्तिः । अनादरइत्यस्य कर्मविशेषणत्वेनानादरव्यञ्जके कर्मणि चतुर्थीविधिप्रतीते स्तदप्रसंगात् । तस्सिद्धं सर्वत्र चतुर्थ्या भावनान्वय इति ।

एवं पञ्चम्यपि तत्रैवान्वेति । तदर्थश्च "अपादानेपञ्चमी" (२-३-२८) इतिसूत्रादपादानत्वरूपः । तच्च "ध्रुवमपायेपादानम्" (१-४-२८) इतिसूत्रनिरुक्तं । तथाहि - अपाये — विभागे, ध्रुवं — निश्चलं - क्रियानाश्रयं, यच्चदपादानसंज्ञं स्यादिति सूत्रार्थः । तथाच क्रियानाश्रयत्वेसति क्रियाजन्य विभागाश्रयत्वमपादानत्वं । अस्तिचेदं वृक्षात्पर्णं पततीत्यत्र वृक्षेपतनक्रियानाश्रयत्वात् पतनक्रियाजन्यविभागाश्रयत्वाच्च । अत्रचोसीने घटे पर्णेचातिप्रसंगवारणार्थं दळद्वयम् ।

क्रियानाश्रयत्वञ्च यद्यपि सामान्यतोनाक्रियावन्निष्ठभेदप्रतियोगित्वं । प्रतियोगितासामान्यप्रवेशे पतनवत्यपि पर्णेद्रव्यत्वावच्छिन्नप्रतियोगिताकभेदसत्त्वात्त्वस्मात्पततीति प्रयोगापत्तेः । प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिताप्रवेशेच द्रव्यात्पततीत्यस्यानापत्तेः, पतनवति पर्णे द्रव्यत्वावच्छिन्नभेदाभावात् । तथापि प्रकृत्यर्थतावच्छेदकाश्रयय त्किञ्चिद्व्यक्तित्वावच्छिन्नप्रतियोगितानिवेशेनैव क्रियावन्निष्ठभेदप्रतियोगित्वं निर्वाच्यम् । तच्चपतमानपर्णव्यक्तिनिष्ठभेदैनिरूपितयत्किञ्चित्पर्णव्यक्तित्वावच्छिन्नप्रतियोगिताकत्वमुदासीने पर्णेपि, अतः क्रियाजन्यविभागाश्रयत्वोपादानमिति नवृक्षात्पततिपर्णे पर्णात्पर्णम्पततीतिप्रयोगः । अत्रविभागः परसमेवतत्वंचविभक्तिशक्यम् । तत्रच प्रकृत्यर्थो वृक्षोविभागे पदार्थैकदेशेभेदेच समवेतत्व प्रकृत्यर्थतावच्छेदकाश्रयविभागाश्रयीभूत व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंसर्गाभ्यामन्वेति । विभागः परसमेवत त्वञ्च जनकत्वस्वरूपसम्बन्धाभ्यां पतनाख्यधात्वर्थेन्वेति । तथाच वृक्षसमवेत विभागजनक वृक्षत्वरूप प्रकृत्यर्थतावच्छेदकाश्रय विभागाश्रयीभूतव्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेण वृक्षवद्भेदाश्रयसमवेतपतनाश्रयः पर्णमितिशाब्दबोधः । अत्र प्रकृत्यर्थतावच्छेदकाश्रय यत्किञ्चिद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वस्येव प्रकृत्यर्थस्य वृक्षस्य पञ्चम्यर्थे भेदे संसर्गबोधौवृक्षात्पतति

पर्णे पर्णात्पततीति प्रयोगापत्तिः । तत्पतनस्यापि प्रकृत्यर्थतावच्छेदकपर्णत्वा श्रयत्वकिञ्चिदुदासीनपर्णव्यक्तित्वावच्छिन्नप्रतियोगिताकभेदवत्पतमानपर्ण वृत्तित्वा त् । पतमानपर्णवृत्तिविभागजनकत्वाच्च । अतस्तद्व्यावृत्त्यर्थप्रकृत्यर्थस्य भेदेन सहान्वये संसर्गघटकव्यक्तौ पतनजन्यविभागाश्रयत्वं विशेषणमिति केचित्तैया यिकनव्याः ।

अन्येतु गुरुभूतसंसर्गघटितव्युत्पत्तिविशेषकल्पनायां गौरवापत्तेः क्रि यानाश्रयत्वं न क्रियावन्निष्ठभेदप्रतियोगित्वं, अपितु क्रियावत्प्रतियोगिकभेदा श्रयत्वम् । तदा क्रिया प्रतियोगितावच्छेदिका । भेदश्चाभावीयविशेषणतासंबंधेनैवापा दानवृत्तिः . तच्चोदासीनपर्णादावपीति तद्व्यावृत्त्यर्थविशेष्यदळम् । तथा चास्मिन् पक्षे विभागो भेदश्चपञ्चम्यर्थः । तत्रचाधेयतया प्रकृत्यर्थान्वयः । तथोश्च जनकत्वप्रतियोगितावच्छेदकत्वोभयसंसर्गेण धात्वर्थान्वयः । वृक्षवृ त्तिविभागजनक वृक्षनिष्ठभेदप्रतियोगितावच्छेदक पतनेत्यादिशाब्दबोधः । अत्रव ग्रामादागच्छतोऽश्वात्पतति इत्यत्र अश्वग्रामयोः गमनपतनापादान त्वव्यावृत्त्यर्थं लक्षणे क्रियाविशेषविवक्षाद्रष्टव्या । तेनयन्निष्ठविभा गजनकत्वेन यन्निष्ठभेदप्रतियोगितावच्छेदकत्वेनच यत्क्रिया विवक्षिता तत्त्वं तत्क्रियापादानत्वं इतिनिष्कर्षः । ततश्च पतनस्याश्वएव गमनस्यच ग्रामएवा पादानात्वमितिसिद्ध्यति । अतएव परस्परस्मान्मेषावपसरतइत्यत्रोभयकर्मजविभा गस्थले विभागस्यैकत्वेपितत्तत्क्रियाविशेषानादायैव तदनाश्रयस्य तदपादानत्व निर्वचनीयम् । विवक्षापदोपादानेनच यदानोक्तरूपेण विवक्षा , अपितु अवयवावयविविभागस्यैव विवक्षा , तत्र वृक्षस्य पर्णं पततीत्येव प्रयो ग इति नतत्रापादानत्वप्रसङ्गः । यत्पदं च यत्पदाभिधेयधरं, तेन वृक्षात्त स्मिन्नेववृक्षे पर्णं पततीत्यत्र सप्तम्यन्तपदाभिधेयत्वंविशिष्टस्यनापादानत्वम् ॥

नचैवमपि वृक्षंत्यजतीत्यत्र स्पदतेपर्णमित्यत्रच वृक्षे अपादानत्वाप त्तिः, क्रियाजन्यविभागाश्रयत्वात् क्रियानाश्रयत्वाच्चेति वाच्यम् । वृक्षे अपा दानत्वसत्त्वेपि बलीयस्या कर्मसंज्ञया फलाश्रयत्वसत्त्वेनत्यागकर्मत्वस्या पि सत्त्वात् द्वितीयोत्पत्तेः पंचम्यप्रयोगात् । स्पन्दतेपर्णमित्यत्र आसनाच्चलि तं द्रव्यं चलितइतिवत् वृक्षात् स्पन्दतइत्यस्यापी ष्टत्वात् । अतएव स्पन्दतइत्यत्रा

पादानत्वव्यावृत्त्यर्थं क्रियापदं सकर्मकधातुपरमिति केषांचित्समाधानमपास्तम् । वृक्षंत्यजतीत्यत्रैवमनिवारणाच्च । ....

अथवा उभयत्र अपादानत्वव्यावृत्त्यर्थं धात्वर्थतावच्छेदकफलभिन्नत्वं विभागविशेषणंवाच्यम्, त्यजेर्हि विभागानुकूलोव्यापारोवाच्यः, अतो विभागस्य धात्वर्थतावच्छेदकत्वात् तद्भिन्नविभागाश्रयत्वाभावेन न वृक्षेपादानत्वप्रसंगः । स्पन्दतेश्च धात्वर्थतावच्छेदकफलाभावेन तद्भेदस्याप्रसिद्ध्या तादृशविभागाप्रसिद्धेः नापादानत्वप्रसक्तिः । ....

अथवा यन्निष्ठविभागेत्यपहाय यन्निरूपितेति लक्षणे विवक्षितम्, वृक्षं त्यजतीत्यत्र वृक्षनिष्ठो विभागो विवक्षितः, नतु वृक्षनिरूपितइति नातिप्रसंगः । वृक्षात्पर्णमित्यत्रच प्रकृत्यर्थस्य निरूपितत्वं विभागे संसर्गः । तथाच वृक्षनिरूपित विभागजनकं वृक्षनिष्ठभेदप्रतियोगितावच्छेदकं यत्पतनमिति दिशाब्दबोधः । स्पन्दतइत्यत्रापादानत्ववारणाय क्रियासकर्मिकैव लक्षणे विवक्षिता । आसनाच्चलितः सार्थाद्भ्रीयतेपशुरित्यादयः प्रयोगास्तु वक्ष्यमाणावधित्वरूप पंचम्यर्थमादाय नेयाइत्याहुः । वैय्याकरणनव्याअपि केचिदेवम् ।

वस्तुतस्तु गुरुभूतशक्यतावच्छेदक भेदेनानेकशक्तिकल्पनापेक्षया प्रकृत्यर्थस्य पंचम्यर्थद्वयान्वयेव्युत्पत्तिद्वयम् , पंचम्यर्थस्यच धात्वर्थद्वयान्वयेव्युत्पत्तिद्वयमितिकल्पनापेक्षया चानुगतव्यवहारसाक्षिकतयापादानत्वमखण्डोपाधिरूप मेकं धर्मं निरुक्तापादानत्वसमव्यापकं कल्पयित्वा तत्रैव पंचम्याश्शक्तिं कल्पयित्वा तस्मिंश्च प्रकृत्यर्थान्वयार्थैकां, तस्यचाख्यातार्थान्वयार्थैकां, व्युत्पत्तिं कल्पयितुमुचितम् । प्रकृत्यर्थस्यच तत्राधेयतयान्वयः, तस्यच स्वनिरूपकधात्वर्थानुकूलत्व संसर्गेणकृतावन्वयः । तदेवं प्रचुरप्रयोगादपादानत्वं पंचम्याश्शक्यं । यत्रतु वृक्षाद्विभजतइत्यादौ विभागजन्य विभागाश्रयत्वाभावान्नोक्तापादानत्वसंभवः, तत्र लक्षणया स्वरूपसंबन्धविशेषरूपमवधित्वं पंचम्यर्थः, तत्रापि अपायेविभागे, ध्रुवं अवधिभूतं,अपादानसंज्ञं स्यादिति वाक्यपदीयादौ सूत्रं व्याख्यातम । तस्यापि धात्वर्थघटितसंसर्गेण भावनान्वयः । वृक्षनिष्ठावधितानिरूपकविभागानुकूलकृतिः कर्तृवृत्ति रिति शाब्दबोधः । स्वनिष्ठविभागावधित्वस्य स्वस्मिन्न

भावाच्च न स्वस्माद्बिभजतइति प्रयोगः । सर्वेष्वपि पूर्वोक्तेषु अवधित्वमेव पंचम्यर्थः, तस्यच क्वचिद्धात्वर्थजन्यविभागद्वारकोन्वयः, क्वचिद्धात्वर्थद्वारकइत्यपि वा सुवचम् । वलाहकाद्विद्योतते विद्युदित्यत्रतु निस्सरणजन्यं विद्योतनं लक्षणयाद्युतेरर्थः । तत्रैकदेशे निस्सरणे पंचम्यर्थान्वयः । एवं कुसूलात् पच तीत्यत्रापि आदानजन्यः पाकः पच्यर्थः । आदानेच पंचम्यर्थान्वय इति - परकीयाः । ....

स्वमतेतु लक्षणायामेकदेशान्वयेच प्रमाणाभावात् पंचम्यर्थोपादानत्वादिरेव स्वनिरूपकनिस्सरणादिजन्यविद्योतनानुकूलत्वसंसर्गेण कृत्यन्वयी । कुतोभवानित्यादौप्रश्ने पाटलीपुत्रादित्याद्युत्तरेच आगतइत्यध्याहारेणान्वयोबोध्यः ।

यत्तु " जुगुप्साविरामप्रमादार्थानामुपसंख्यान" मिति वार्तिकं, एतेषां योगे पंचमीवाच्येत्यर्थकं तल्लाक्षणिकानुशासनं । अतः पापाज्जुगुप्सते विरमति धर्माप्रमाद्यतीत्यादौ पंचमी । अत्राद्ये निन्दाधात्वर्थः, तच्च विगानम् । पंचम्यर्थोविषयित्वं । प्रकृत्यर्थश्च निरूपितत्वसंसर्गेणतत्रान्वेति । तच्च स्वाश्रयविगानवत्त्वसंबन्धेनाख्यातार्थे आश्रयत्वे । द्वितीयेकरणानन्तरमकरणं धात्वर्थः । पंचम्यर्थः पूर्ववत् । आख्यातार्थआश्रयत्वं, पंचम्यर्थस्यच कृतिद्वारकोन्वयः । पापविषयककृत्यनन्तरकालीनपापविषयककृत्यभावाश्रयत्व मिति शाब्दबोधः । तृतीये पंचम्यर्थोविषयित्वमेव । अनवधानं धात्वर्थः, आख्यातार्थआश्रयत्वमेव । स्वाश्रयानवधानवत्त्वमाश्रयत्वे पंचम्यर्थस्य संसर्गः । ....

एवं " भीत्रार्थानांभयहेतुः" (१-४-२५) इत्यनुशासनाद्भयार्थानांत्राणार्थानांचधातूनांयोगेभयहेतुरपादानसंज्ञस्यादित्यर्थकेन चोराद्बिभेति, चोराद्वा निकन्त्रायते, इत्यत्र पंचमी । अत्र हेतुमत्त्वं पंचम्यर्थः, आद्ये भयं धात्वर्थः । द्वितीये भयाभावानुकूलव्यापारः, ननु भयाभावमात्रं कोभिदुक्तं, तथात्वे धनिकस्य त्वन्मते धात्वर्थतावच्छेदकफलाभावेन तदाश्रयत्वरूपकर्मत्वानुपपत्तेः ।

अस्मन्मतेतु व्यापारस्य भयाभावएव कर्मेति तदुपपत्तिः । आख्यातार्थआश्रयत्वम् । स्वाश्रयधात्वर्थवत्त्व मुभयत्रसंसर्गः । चोरहेतुकभयाश्रयत्वंचोरहेतुकभयाभावानुकूलव्यापाराश्रयत्वमिति शाब्दबोधः । " कस्याबिभ्यतिदेवाश्च जातरोषस्यसंयुगे " इत्यादौतु कस्यसंयुग इत्येवं संयुगघटितसंबन्धेन भावनान्वयात् षष्ठी । नचैवं संयुगस्यैवापादानत्वापत्तिः, परयाधिकरणसंज्ञयाबाधात् । अधिकरणत्वाविवक्षाया मिष्टापत्तेः ॥

एवं " पराजेरसोढः " (१-४-२६) इति सूत्रात्पराजेर्धातोर्योगे असह्योर्थोपादानसंज्ञस्यादित्यर्थकात अध्ययनात्पराजयत इत्यत्र पञ्चमी । अत्रधात्वर्थोरिष्टं, पञ्चम्यर्थोजन्यत्वं, अध्ययनजन्यारिष्टाश्रयत्वमिति शाब्दबोधः । शत्रून्पराजयतइत्यत्रतु शत्रुनिष्टानिष्टसाधनत्वमिति बोधाद्द्वितीया ॥ केचित्तु असहनंधात्वर्थः, अध्ययनंनसहतइति विवरणात् , इत्याहुः ॥

एवं " वारणार्थानामीप्सितः " (१-४-२७) इतिसूत्रात् वारणार्थानां योगे ईप्सितोर्थोपादानसंज्ञःस्यादित्यर्थकात् यवेभ्योगांवारयतीत्यादौ पंचमी । अत्र पंचम्यर्थः प्रतियोगित्वं, द्वितीयार्थोवृत्तित्वं, धात्वर्थश्च विनाशानुकूलव्यापाराभावानुकूलव्यापारः, यत्नश्चाख्यातार्थः, पंचम्यर्थस्यस्वनिरूपकविनाशघटितःसंसर्गः । द्वितीयार्थस्यधात्वर्थतावच्छेदकीभूत व्यापाराभावद्वारकः । तथाच यवप्रतियोगिक विनाशानुकूलो भक्षणादिरूपोयो व्यापारः तस्य गोवृत्तिर्योभावः तदनुकूलव्यापारो देवदत्तवृत्तिरितिबोधः पर्यवसितः । अत्रच यवानांवस्तुत ईप्सितत्वात्पंचमी । नचैवं गोरपीप्सितत्वात्पंचम्यापत्तिः, तस्या ईप्सिततमत्वेनकर्मत्वोपपत्तेः । एतदर्थमेवहि कर्तुरीप्सिततममित्यत्रतमब्ग्रहणमित्युक्तं कौस्तुभे । धात्वर्थतावच्छेदकीभूतस्य विनाशानुकूलव्यापारध्वंसस्यगोमात्रवृत्तित्वात् तत्रैवद्वितीया ॥

एवं कूपादन्धंवारयतीत्यत्रवृत्तित्वं पंचम्यर्थः, पतनानुकूलव्यापाराभावानु

कूलोव्यापारोधात्वर्थः । तथाच कूपवृत्ति यदधःप्रदेशावच्छिन्नसंयोगानुकूलक्रिया-रूपपतनं तदनुकूलोयो अन्धवृत्तिर्व्यापारः तदभावानुकूलोयोव्यापारस्तदनुकूल कृतिश्चैत्रवृत्तिरितिबोधः पर्यवसितः ॥

एवं पुष्पेभ्य आतपंवारयतीत्यत्रापि शुष्कीभावानुकूलव्यापारा भावानुकूलव्यापारो धात्वर्थः । पुष्पवृत्तिशुष्कीभावानुकूलव्यापाराभावोय आतपनिष्ठः, तदनुकूलेत्यादिः पूर्ववद्बोधः । अग्नेर्माणवकंवारयतीत्यादौ ज न्यत्वंपंचम्यर्थः, दाहानुकूलेत्यादिर्धात्वर्थः । नचैवमननुगमः, अनुभवानुरोधेन लक्षणायामननुगमस्यादोषत्वात् । यवेभ्योगांवारयति अन्यथाभक्षयिष्यतीति, कू पादंधंवारयति पतिष्यतीति, पुष्पेभ्यआतपंवारयति शुष्काणिभविष्यंतीति, अ-ग्नेर्माणवकंवारयति दग्धोभविष्यतीति, प्रयोजनस्यभेदेनविवरणात् ॥

अन्येत्वनुगमरसिकाः सर्वत्रसंयोगजनकव्यापाराभावस्य कर्मकारकवृत्तेरनु कूलोयोव्यापारः सएवधात्वर्थः, वृत्तित्वञ्च पञ्चम्यर्थ इत्याहुः । तन्न, यवेभ्योगो संयोगं वारयति, यवेभ्यः कार्मणिकंवारयतीत्यादावनुगमानुपपत्तेः ॥

ननु " वारणार्थानामीप्सित " इतिसूत्रे नतावदीप्सितेवारयति क्रि-यायोगएवापादानत्वनियमः, इष्टादन्नादंशंददातीत्यादौ तदभावेपिदर्शनात् । नापिवारयत्यर्थयोग ईप्सितएवेतिनियमः, सर्पाद्वारयति गङ्गास्नानाद्वारयतीत्यादौ अनीप्सितेपि दर्शनादितिचेन्न, निवार्यनिवारकान्यतरस्येप्सितइति तदर्थात् सर्पादयोहि निवारकस्यानिष्टाअपि पुरोवृत्तित्वादिना निवार्यस्येष्टाएव । पुष्पेभ्य आतपंवारयतीत्यादौ निवार्यस्याचेतनत्वान्निवारकग्रहणं । अथवा धात्वर्थतावच्छेदकीभूतस्य विनाशानुकूल व्यापाराभावरूपस्यफलस्य यत्फलं विनाशादि तत्संबन्धित्वेन प्रसक्तस्य यवादेः तद्विपरीतत्वेन निवारकेच्छाविषयइति तदर्थ इति नकश्चिद्विरोधः ॥

वस्तुतस्तु बहुधैतानिसर्वाणिसूत्राणि भाष्यकारेण प्रत्याख्यातानि

तस्यायमाशयः, "ध्रुवमपाय" इतिसूत्रेहि नवस्तुतएव क्रियाजन्यो विभागोभिप्रेतः अपितुतार्किकोपि, यदीयं क्रिया नस्यात् तदाकर्मकारकेणापादानस्य सम्बन्धःस्यात् क्रियायातुसानिवारित इति तदभावोजनितइति । तदभिप्रायमेव वचापायपदम् । आवश्यकञ्चैतादृशंव्याख्यानं असंयुक्तादेवचोरात्पलायितइत्येतदर्थम् । ततश्च तत्सूत्रेणैव यवादेरप्यपादानत्व सिध्यासूत्रांतरवैय्यर्थ्यमिति । नचैवं गवादेरपि तादृशाभावाश्रयत्वा दपादानत्वापत्तिः, ईप्सिततमत्वादिप्रयुक्तकर्मसंज्ञया परत्वेनापादानसंज्ञायाबाधात् । वैपरीत्येन विवक्षाया मिष्टापत्तेश्च । नचविवक्षायामुभयोरपादानत्वापत्तिः, वार्यतेः सकर्मकत्वेनान्यतरस्य कर्मत्वविवक्षाया आवश्यकत्वात् ।

एवं- "अन्तर्धौयेनादर्शनमिच्छति" (१—४--२८) इत्यनेनान्तर्धौ-व्यवधानेसति, यत्कर्तृकस्यात्मनोदर्शनस्याभावमिच्छति तदपादानंस्यादित्यर्थके न मातुर्निलीयते कृष्णइत्यादौ पञ्चमी । अत्रच प्रत्यक्षाभावेच्छापूर्वकः प्रत्यक्षविरोधिव्यापारोधात्वर्थः । विरोधित्वंपञ्चम्यर्थः धात्वर्थतावच्छेदके प्रत्यक्षेन्चेति । विरोधित्वं तज्जनकलौकिकसन्निकर्षाभावानुकूलत्वं । कृतिराख्यातार्थः । तथाच मातृवृत्तिस्वविषयक प्रत्यक्षाभावेच्छापूर्वकोयः प्रत्यक्षजनकलौकिकसन्निकर्षाभावानुकूलव्यापारस्तदनुकूलकृतिः कृष्णवृत्तिरितिशाब्दबोधः । व्युत्पतिबलेनच प्रत्यक्षेकृष्णविषयत्वस्यबोधः पार्श्विकः ।

एवं- नियमपूर्वक विद्यास्वीकारे वक्ता अपादानसंज्ञः स्यादित्यर्थकेन " अध्यातोपयोगे " (१-४-२९) इतिसूत्रेणोपाध्यायादधीते इत्यत्रपञ्चमी । अत्रोच्चारणोत्तरकालीनमनभ्यस्तोच्चारणध्वात्वर्थः, वृत्तित्वंपञ्चम्यर्थः । इदमपिसूत्रं भाष्यकारेणप्रत्याख्यातम्, उच्चारणक्रियाजन्यशब्दजनकस्वसमानजातीय शब्दानामुपाध्याय मुखनिःसृतत्वेन उपाध्याय क्रियाजन्यविभागाश्रयत्वात् ' ध्रुवमपाय ' इतिसूत्रेणैव तत्सिद्धेः । ....

नचैवं विधस्य विभागस्य मुख्यविभागत्वाभावा त्कथमेकविधत्वमपादानस्येति वाच्यं । नानाविधानामेवजातीयकानामपादानत्वानां व्यापकीभूताखण्डोपाधि रूपापादानत्व एवतात्पर्यात् । अतएवैवं विधाः प्रयोगाः सर्वेशक्ताएतेत्यपि

शक्यं वक्तुम् । तज्ज्ञापनमेवच प्रत्याख्यानफलम् । उक्तविधतत्तद्रूपेण निरूढलक्षणया बोधसिद्ध्यर्थं तत्तत्सूत्राणीतिमत्वास्माभिरन्यैश्च तत्तत्सूत्राणिव्याख्यायन्ते । ....

एवं - जायमानस्य हेतुरुपादानसंज्ञः स्यादित्यर्थकेन " जनिकर्तुः प्रकृतिः" (१--४--३०) इतिसूत्रेण ब्रह्मणः प्रजाः प्रजायन्त इत्यत्र पञ्चमी । अत्रजन्यत्वम्पचम्यर्थः सचस्वाश्रवृत्त्युत्पत्तिकत्वसम्बन्धेनाख्यातार्थे आश्रयत्वेन्वेति । अत्रहेतुत्व मुपादाननिमित्तोभय साधारण्येन विवक्षितं । तेन पुत्रात्प्रमोदोजायते, मृदोघटोजायते इत्यादौ पंचमी । ब्रह्मणस्तूभयरूपत्वात्पंचमी ।

एवं- "भुवःप्रभवः" (१—४--३१) इत्यनेनभवनस्यप्रकर्षविशिष्टस्ययः कर्ता तस्ययः प्रभवनप्रतियोगी सोपादानसंज्ञस्यादित्यर्थकेन हिमवतो गङ्गाप्रभवतीत्यत्र पंचमी । अत्र प्रकर्षः संयोगध्वंसक्षणाव्यवहितोत्तरक्षणवृत्तित्वम् । धात्वर्थश्चैतत्सर्गीयभारत वर्षस्थभूसंयोगध्वंसासमानकालीनं स्तादृशभूसंयोगः । प्रतियोगित्वं पंचम्यर्थः । तस्यच प्रकर्षार्थसंयोगद्वारकंआख्यातार्थान्वयः । आख्यातार्थ आश्रयत्वं । धातूपसर्गार्थभूतसर्वसंयोगेषु गंगावृत्तित्वंच व्युत्पत्तिबललभ्यम् । तथाच हिमवत्प्रतियोगिक गंगासंयोगध्वंसक्षणाव्यवहितोत्तरक्षणवृत्त्येतत्सर्गीयभारतवर्षस्थभूगंगासंयोगध्वंसासमानकालीन तादृशभूसंयोगाश्रयत्वं गंगावृत्तीतिबोधः पर्यवसितः । अत्र वैकुण्ठसंयोगध्वंसक्षणोत्तरं तादृशभूगंगासंयोगस्याद्यस्यजायमानतया वैकुण्ठात् भुविप्रभवतिगंगेति प्रयोगापत्तिः, अतोव्यवहितेति । काशीसंयोगध्वंसाव्यवहितोत्तरक्षणे उक्तविधभूगंगासंयोगानांकेषांचिज्जायमानत्वात् काशीतोगंगाभुवि प्रभवतीति योगापत्ते स्तादृशसंयोगध्वंसासमानकालीनेति । एवं चाद्यस्यापि तादृशसंयोगस्य तदव्यवहित पूर्वक्षणवृत्ति वैकुण्ठसंयोगध्वंसाद्यव्यवहितोत्तरत्वा द्वैकुण्ठात्प्रभवतीति प्रयोगापत्तेरनिवारणात् , प्रकर्षार्थसंयोगध्वंसक्षणस्या प्याद्यत्व विशेषणं देयम् ॥ ....

वस्तुतस्तु वैकुण्ठात् भुविप्रभवतीति प्रयोगस्येष्टापत्त्यैव परिहर्तुंशक्यत्वात् नतन्निवारणाय पदद्वयदानम् । ....

एवं -- "ल्यब्लोपेकर्मण्यधिकरणेच" (वार्तिकम्) इत्यनेन अर्थाध्याहारादिना गम्यमाने ल्यबन्तकर्मणि अधिकरणेवा पंचमीस्यादित्यर्थकेन प्रासादात्प्रेक्षते इत्यादौ पंचमी । प्रासादमारुह्य प्रेक्षते प्रासादेस्थित्वा प्रेक्षत इत्यर्थः । अत्र कर्मत्व मधिकरणत्वंवा पंचम्यर्थः । तस्यच स्वनि रूपकारोहणादिभावनोत्तरकालिकत्वादिसंसर्गेण प्रेक्षणभावनायामन्वयः । नच गम्यमान क्रियायाः कथं संसर्गघटकत्वं, कस्मात्त्वं नद्याइत्यादौ आगतादि पदाध्याहारेण गम्यमान क्रियादेर्विशेष्यत्वाद्युपपत्तौ संसर्गघटकत्वस्य सुत रामुपपत्तेः ॥ ....

एवं--"यतश्चाध्वकालनिर्माणं तत्र पंचमी""तद्युक्तादध्वनःप्रथमासप्तम्यौ" "कालात्सप्तमीच वक्तव्या"इत्यादिवार्तिकात् , वनाद्ग्रामोयोजनं योजनेवा,कार्तिक्या आग्रहायणीमासे इत्यादौ पंचमी । अत्रावधित्वम्पंचम्यर्थः, वनावधिकयोजनप रिमितदेशवृत्तिर्ग्रामइतिबोधः फलितः । प्रथमार्थोप्यधिकरणत्वमेव ।

एवं-- "अन्यारादितरर्तेदिक्शब्दांचूत्तरपदाजाहियुक्ते" (२- ३--२९) इत्यनेन एभिश्शब्दैर्योगेपंचमीत्यर्थेकेन कृष्णादन्यइत्यादौ पंचमी । प्रतियोगित्वंचात्रपंचम्यर्थः । तस्यच स्वनिरूपकान्योन्याभावद्वारकपरम्परयाऽध्याहृता ख्यातार्थेन्वयः । अन्यइत्यर्थग्रहणमितिसूचनार्थं पृथगितरपदोपन्यासः । अत एव कृष्णादितरः कृष्णात्पृथगित्यपि द्रष्टव्यम् ।

नचैवं-- घटः पटोन, घटस्यान्योन्याभावः, घटस्य संयोगाभावः, घटस्य तादात्म्याभावइत्यादावपि पंचम्यापत्तिः, घटाद्विभागोघटाद्भेदः पटस्येत्या दाविवधर्म मात्रवाचित्वेपि पंचम्यापत्ते र्दुवारत्वात् । धर्मिविवक्षायामपि घटस्यान्योन्याभाववानित्यादौ तदापत्ते दुर्वारत्वाच्चेतिवाच्यम । पंचम्यर्थोहि प्रतियोगित्वं स्वनिरूपकभेदादिघटितसंसर्गेणास्मन्मते आख्यातार्थान्वयी । त त्रचान्यादिपदं संसर्गतात्पर्यग्राहकं । परमतेतु तदुपस्थापिते भेदादावेवान्वय इति विशेषः । तदिहान्यादिपदैर्भेदादेर्विशिष्यभेदत्वादिनोपस्थितत्वा द्युक्ता तद्योगेपञ्चमी । अन्योन्याभावादिपदैस्त्वन्योन्यादिपदवाच्यतादात्म्या द्यभावत्वेन बोधान्नतद्योगे पञ्चमी । नञोपि लाघवेनाभावत्वेनैववाचकता,

नतु भेदकादिना, अनेकशक्तिकल्पनापत्तेः । अतएव 'तदन्यतद्विरुद्धतदभावे तु नञ्' इत्यनुशासनमपि न वृत्तिपरं, अन्यलभ्यत्वात् । अतोविशेषबोधः सामभिव्याहारविशेषादिनेति न तत्रापि पंचमीप्रसक्तिः । अतएव घटात् पृथक्त्व मित्यादिप्रयोगा निरपवादाः । ....

नचैवं -- घटः पटोनेत्यादौ पंचम्यनापत्तावपिषष्ठ्यापत्ति दुर्वारेतिवाच्यम् " निषेधप्रयोगार्हकेचिदव्ययाः " इत्यनुशासनांतरेण तदनापत्तेः । 'नैवं विभाषा' इत्यादिभाष्यप्रयोगाच्च । वनादाराद् ग्रामः, ऋते कृष्णान्नकिंचित्, सत्यपि प्रतियोगित्वं पचम्यर्थः । यस्तु "पुरुषाराधनमृते"इति प्रयोगः"सक्तते द्वितीया"इति चान्द्रसूत्रादवगन्तव्यः । दिशिदृष्टः शब्दो दिक्शब्दः, तेनात्रलक्षण या देशकालवाचिनायोगे पंचमीत्यर्थः । पूर्वोग्रामादेशः,चैत्रात्पूर्वः फाल्गुनः, इ त्यादौ । अतदवयववाचिनायोगे न,पूर्वं कायस्य । अभ्युत्तरपदयोगेपि प्राक् प्रत्य यात्प्रागात् । आच् योगेपि दक्षिणाग्रामात् । आहियोगेपि दक्षिणाहिग्रामात् ।

एवं-- कार्तिक्याः प्रभृतीतिभाष्ये प्रयोगात् प्रभृत्यर्थयोगेपि पंचमी, भ वात् प्रभृतिशब्दोहारिः । ....

एवं--"अपपरिबहिरञ्चवः पञ्चम्या" (२ - १ - १२) इति समासवि धानसामर्थ्यात् बहिर्योगेपि सा, ग्रामाद्बहिः ।

एवं-- "पञ्चम्यपाङ् परिभिः" (२ - ३ - १०) इतिसूत्रात् एतैः क र्म प्रवचनीय संज्ञैर्योगेपंचमीत्यर्थकात् अपहेरः संसारः, परिहेरः संसारः, आ मुक्तेः संसारः, इत्यादौ पंचमी । "अत्र अपपरीवर्जने" (१ - ४ - ८८)इ तिसूत्रादनयोः कर्मप्रवचनीयसंज्ञा । अतएव वर्जनार्थकापपरियोगएव पंचमी ,लक्ष णाद्यर्थयोगेतु द्वितीयैवेत्युक्तम् । आङस्तु "आङ्मर्यादावचने" (२ -३ - ८९) इत्येनेन कर्मप्रवचनीयसंज्ञा । वचन ग्रहणादभिविधावपि ।

एवं-- "प्रतिनिधि प्रतिदानेच यस्मात्" (२ -३ - ११) इति सूत्रादेत दर्थकाकर्मप्रवचनीय योगेपंचमीत्यर्थकात् पंचमी । सच" प्रतिः प्रतिनिधि प्रति दानयो."(१ - ४ - ९२) इति सूत्रात् प्रतिरेव, प्रद्युम्नः कृष्णात्प्रति, कृ

ष्णप्रतिनिधिरित्यर्थः । मुख्याभावे यस्तत्सदृशउपादीयते सप्रतिनिधिः । प्रतियोगित्वं चात्रपंचम्यर्थः । प्रतिदानं दत्तस्यप्रतिनिर्यातनं, दानजन्योपकार प्रत्युपकार इतियावत्, तिलेभ्यः प्रतियच्छतिमाषान् । अत्र कर्मत्वं पंचम्यर्थः, तस्यच निपातोपात्तदानभावनायामन्वयः । तथाच तिलकर्मकदानभावनाजन्योपकार प्रत्युपकार जनकीभूता माषकर्मिका दानभावना चैत्रवृत्तिरिति शाब्दबोधः । ....

एवं - "अकर्तर्यृणेपंचमी" (२ - ३ - २४) इतिसूत्रात् कर्तृवर्जितं यदृणं हेतुभूतं ततः पंचमीत्यर्थकात् ऋणाद्बद्धः, शतात् बद्धः, इत्यादौ पंचमी । अत्र हेतुत्वं पंचम्यर्थः, शतमिह उत्तमर्णायधार्यमाणत्वाद्ऋणरूपमेव । तस्य कर्तृत्वेतु शतेनबन्धितइत्येवं तृतीयैव । अत्रहिणिजन्तत्वात् बन्धनप्रयोजके ऋणेहेतुत्ववत् "तत्प्रयोजकोहेतुश्च" (१ - ४ - ५५) इति चकारेण कर्तृसंज्ञाया अपिकरणात् कर्तृत्वावश्यकतया तृतीयांतत्वमेव । ....

एवं - " विभाषागुणेस्त्रियाम् " (२ — ३ — २५) इति सूत्रात् गुणहेतौ अस्त्रीलिंगे पंचमीवास्यादित्यर्थकात जाड्यात् जाड्येनवाबद्धइत्यत्र विकल्पेन पंचमी । गुणत्वाभावे स्त्रीलिंगेवा धनेनकुलम्मुच्यायुक्त, इत्यादौतृतीयैव"हेता" वितिपूर्वोदाहृतसूत्रात् । गुणत्वं चेहपरतन्त्रत्वमात्रं, तेनवन्हिमान् धूमादित्यादौ पंचमी । नास्तीहघटो नुपलब्धेरित्यादौस्त्रीलिंगेतु पंचमीबाहुळक प्रकृतेस्तदनुदृष्टेरितिवार्तिक प्रयोगादनुसन्धेयम् । ....

एवं- " पृथग्विनानानाभिस्तृतीयान्यतरस्याम् " (२ - ३ - ३२) इति सूत्रादेभिर्योगेतृतीयास्यात्पंचमी द्वितीयेचेत्यर्थकात् पृथग्रामात्, रामेण राममित्यादौ तृतीयाभ्यां विकल्पेन पंचमी । एवं विनानायोगेपि । अत्रप्रतियोगिताकत्वं सर्वविभक्त्यर्थः । तत्र द्वितीयासंनिहितत्वादेवानुवर्तते, पंचमीतुमण्डूकप्लुत्यानुवर्तनीया, भाष्यकृतातथैवव्याख्यातत्वात् ।

एवं " करणेचस्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य " (२—३—३३) इति सूत्रादेभ्यः करणे तृतीयापञ्चम्यौ स्याताम्इत्यर्थकात् स्तोकेन स्तोकाद्वामुक्त इत्यादौ तृतीययासपहञ्चमी । करणत्वं पंचम्यर्थः । द्रव्य रूपसत्त्ववचनेतु स्तोकेन विषेणहतइत्यादौ तृतीयैव ।

एवं "दूरांतिकार्थैभ्योद्वितीयाच"(२-३-३५)इतिसूत्रादेभ्योद्वितीया, चा त्पंचमीतृतीये, इत्यर्थकात् ग्रामस्य दूरंदूरात् दूरेणवेत्यादौ द्वितीयातृतीयाभ्यां सहपंच मी । प्रातिपदिकमात्रार्थेविधिरयं,नत्वत्र विभक्त्यर्थोन्यः कश्चित् । इहसप्तम्यपि,"स प्तम्यधिकरणेच" (२-३-३६) इतिसूत्रेचकारेण दूरांतिकार्थैभ्य इत्यनुकर्षणा त् । तेनग्रामस्य दूरेस्तीति प्रयोगोपिनानुपपन्नः । अत्रासत्त्ववचनस्यानुव र्तनात् सत्त्ववचनत्वे नैतद्विभक्तिचतुष्टयनियमः । सत्त्ववचनत्वंचेहसामाना धिकरण्येन प्रातिपदिकार्थविशेषणत्वं, तेन दूरः पन्थाः इत्यादौ दूरश ब्दस्य पथोविशेषणत्वेन तद्विभक्त्यैवविभक्तिः ।

यद्यपि चास्मन्मते विशेषणानामप्याख्यातेनैवान्वयः, तथापि यत्रदूर त्वविशिष्टाभेदः संसर्गघटकस्तत्रप्रथमा, यत्रदूरत्वाश्रयता संसर्गघटिकातत्रा विभक्तिचतुष्टयमिति नकोपिविरोधः । तत्सिद्धं पंचम्यर्थः सर्वत्रभावना न्वयीति । ....

एवं- षष्ठ्यर्थोपि तत्रैवान्वेति । सच-"षष्ठीशेषे" (१— ३ —) इति सूत्रानुशिष्टः । तथाहि - उक्तादन्यः शेषः, उक्तानिचपूर्वं कर्मत्वादी नि, तद्विनाश्च सजातीयत्वात् स्वस्वामिभावादयः सम्बन्धाः, तेषुषष्ठीस्यादितिसू त्रार्थः । तेषुच न प्रत्येकं शक्तिः, अनेकशक्तिकल्पनापत्तेः । अपितु स म्बन्धत्वेन । संबंधत्वंच सम्बद्धाविति प्रतीतिसाक्षिको धर्मविशेषः । एवंच शक्यतावच्छेदकस्यसंबंधत्वस्य कर्तृत्वकर्मत्वादिष्वपिसत्त्वात् तेषामपि संबं धत्वेन रूपेण षष्ठ्यर्थतास्त्येव । अतएव सतांगतम्, सर्पिषोजानीते, मातुः स्म रति, एधोदकस्योपस्कुरुते । शंभोर्भजेचरणयोः, फलानां तृप्तः,इत्यादयः प्रयो गाः । अतएवोक्तशक्यतावच्छेदकातिरिक्त शक्यतावच्छेदकावच्छिन्न संबंधा

एव शेषपदार्थः । सचयर्थैव राज्ञःपुरुषइत्यादौ स्वस्वामिभावस्तथैव सतांगत मित्यादौ कर्तृत्वादिकमपि । संबंधत्वं च सर्वत्र शक्यतावच्छेदकम् , अतएव क र्तृत्वत्वादिना तद्बोधे लक्षणेति वक्ष्यते । नचैवं सम्बन्धत्वेन रूपेण संबं धानां शक्यत्वे "एकशतं षष्ठ्यर्था"इतिमहाभाष्यकारीयवचनानुपपत्तिः, प। र्थ शब्दस्यार्जुन एव प्रचुरप्रयोगेण तासम्बन्धग्रहणे संभवति अन्यसम्बन्ध ग्रहणस्यान्याय्यत्वमितिसूचनार्थत्वात् । तदिह राज्ञःपुरुषइत्यत्र सेवकत्वं प ष्ठ्यर्थः । तत्र निरूपकता संसर्गेण राज्ञोन्वयः । आधेयत्व संसर्गेणच तस्य पुरुषेन्वयः । सर्पिषोजानीत इत्यत्र वक्ष्यमाणरीत्या संबन्धत्वेन करणत्वं षष्ठ्यर्थः , तस्य धात्वर्थे, इत्येवं तत्रतत्र योग्यतानुसारेण समभिव्याहृतमात्र एवान्वय इति । नात्रकारकविभक्तिवत् क्रियान्वय इति तार्किकाः शाब्दिकामीमांसकाश्च ।

वस्तुतस्तु - योग्यतान्वनुसारेण साक्षात्परम्परासाधारण्येन लिंगानन्वयि पदजन्योपस्थितिः कारणमित्येव कार्यकारणभावेनान्वयोपपत्तेः । इतरथा षष्ठीभिन्नसुबर्थस्थल एकाव्युत्पत्तिः षष्ठीस्थलेचान्येतिव्युत्पत्ति द्वयकल्पना पत्तेः । इष्यते च परैरपि स्थाल्यांतण्डुलं पचति, गृहेचैत्रः पचती त्यादौ सप्तम्यर्थस्य तण्डुलचैत्राद्वारकः क्रियान्वयो नतु तण्डुलादावेव । तनश्च राज्ञः षष्ठ्यर्थ, तस्यच पुरुषद्वारकोसत्यादि क्रियायां, इत्येव युक्तमु त्पश्यामः ।

एवं - करणत्वादिकमपि यत्रा सम्बन्धत्वेन षष्ठ्यर्थः तत्र धात्वर्थद्वारकः, अतएव तत्प्रतिपादकम् " ज्ञोविदर्थस्यकरणे " (२ -- ३ -- ५१) इतिसूत्रम् । अत्र भाष्यव्याख्यानात् शेषइत्यनुवर्तते । तेनज्ञानभिन्नार्थस्य जानातेर्धातोः करणे शेषत्वेन विवक्षिते षष्ठीस्यादितिसूत्रार्थः । सर्पिषोजानीते सर्पिषोज्ञानं । अत्रलक्षणया ज्ञानपूर्विकाप्रवृत्तिर्धात्वर्थः । तस्यां यत्र सर्पिषः करणत्वमेव शेषत्वेन विवक्षितं तदा सर्पिष इति षष्ठी । करणत्वत्वेन करणत्वविवक्षायां तृतीयैव । ज्ञानार्थकेतु विषयत्वार्थिका द्वितीया । तस्य सम्बन्धत्वेन बोधेतु

षष्ठ्येव । नचैवं "शेषेषष्ठी" त्यनेनैवसिद्धेः प्रथक् सूत्रवैय्यर्थ्यं; षष्ठीपुनर्विधिः षष्ठ्येव नतुलुक् इत्येवंपरः । तेन तद्बाध्यःसमासोनिवर्तते । ततश्च सम्बन्धत्वेन उक्तधात्वर्थकरणत्व विवक्षायां न षष्ठीसमासः । एवं उत्तरेष्वपि सप्तसु सूत्रेषु षष्ठीपुनर्विधिः मातुस्स्मरणमित्यादौ शेषषष्ठीसमासनिषेधार्थ एव । तत्रहि-- " अधीगर्थदयेशांकर्मणि " (२--३--५१) इतिसूत्रादेषांकर्मणि शेषत्वेन विवक्षिते षष्ठीस्यादित्यर्थकात् मातुःध्येति, मातुस्स्मरति, मातुस्स्मरणं, सर्पिषोदयते सर्पिषोदयनं, जगतामीष्टे, जगतामीशानमित्यादौ षष्ठीविहिता । अधीगर्थाःस्मृत्यर्थाः । अत्रशेषत्वादेव षष्ठी प्राप्तौ पुनःषष्ठीविधिः षष्ठीसमास प्रतिषेधार्थः ।

नचैवं--हरिस्मरणमिति प्रयोगानुपपत्तिः, तस्य कृद्योगेकर्मत्वत्वेन कर्मत्व बोधक षष्ठीसमासत्वेनोपपत्तेः । तत्फलंच कारकपूर्वकत्वात् कृदुत्तर पदप्रकृतिस्वरः । शेषषष्ठीसमासत्वे अन्तोदात्तत्वापत्तेः । तथाच स्वरार्थेयमष्ट सूत्रीति फलितम् ।

किंच-- यत्र मातुः स्मृतमित्यादौ "न लोकाव्ययेे" त्यनेन कर्मषष्ठीप्रतिषिद्धा तत्र शेषषष्ठ्या समासप्रसक्तौ तन्निषेधार्थं षष्ठीपुनर्विधिः ।

एवं-"कृञः प्रतियत्ने"(२--३--५१) इति सूत्रात् गुणाधाने विद्यमानस्य करोतेः कर्मणि शेषत्वेन विवक्षिते षष्ठीस्यादित्यर्थकात् एधोदकस्योपस्कुरुते, एधोकस्योपस्करणमित्यत्र षष्ठी । प्रयोजनं पूर्ववत् ।

एवं-"रुजार्थानांभाववचनानामज्वरेः"(२-३-५४)इतिसूत्रात् रुजाव्याधिस्तदर्थानां भावएव यत्र कर्ता तेषांज्वरिवर्जितानां कर्मणिशेषत्वेनविवक्षिते षष्ठीस्यादित्यर्थकात् चोरस्यरुजति रोगः, चोरस्य रोगस्य रुजा, इत्यादौ चोरेषष्ठी । अत्ररोगाख्यव्याधेरेव व्याध्यन्तरंप्रतिकर्तृत्वात् भावकर्तृत्वम् । तस्य कर्मणिचोरे सम्बन्धित्वेन विवक्षिते कर्मत्वेषष्ठी । कर्मत्वत्वेन विवक्षिते तुतिन्डते द्वितीयैव, कृदन्तेतु षष्ठीसमासोपि । सम्बन्धत्वेन विवक्षायांः नषष्ठीसमास इत्यादिपूर्ववत् ।

अत्र "अज्वरिसन्तापोरितिवाच्य" मितिवार्तिकात् रोगस्य चौरज्वरः, चौरसन्तापः इत्यादौ समासोभवत्येव । भावकर्तृकत्वग्रहणाच्च नद्याःकूलरुजा, नदीकूलं रुजती, त्यादिप्रयोगः ।

एवं "आशिषिनाथः" (२ -- ३ -- ५५) इतिसूत्रात् आशीरर्थकस्य नाथतेः कर्मणिशेषत्वेन विवक्षिते षष्ठीस्यादित्यर्थकात् सर्पिषोनाथते, सर्पिषोनाथन मित्यादौ षष्ठी । सर्पिस्तेबहुळं भूयादित्याशास्तइत्यर्थः । आशीरर्थकत्वाभावेतु माणवकनाथनमितिसमासः ।

एवं "जासि निप्रहणनाटक्राथपिषांहिंसायां " (२ - ३ - ५६) इतिसूत्रात् हिंसार्थाना मेषां कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यादित्यर्थकात् , चौरस्यो ज्जासनं, निप्राभ्या मुपसर्गाभ्यां समस्ताभ्यां व्यस्ताभ्यां वा युक्तो हनः -निप्रहणः, चौरस्य निप्रहणनं, प्रणिहननं, निहननं वा, चौरस्यो न्नाटनं, चौरस्यक्राथनं, चौरस्यपेषणं, इत्यादौ षष्ठी । हिंसात्वाभावेतु धानापेषणमितिसमासः पूर्ववत् ॥

एवं "व्यवहृ पणो स्समर्थयोः " (२ - ३ - ५७) इतिसूत्रात् , एकार्थयो रनयोः कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यादित्यर्थकात् शतस्य व्यवहरणम् , शतस्य पणः, मित्यादौ षष्ठी । अत्रहिव्यवहृधातोः [illegible] पर्यायं द्यूतमप्यर्थः । पणधातोश्च क्रय विक्रय रूपव्यवहारोपि । अतोद्वयो स्तुल्यार्थकत्वं । अर्थांतरत्वेतु षष्ठीविध्यभावा न्न समासप्रतिषेधः । शलाकाव्यवहारः - गणनेत्यर्थः । ब्राह्मणपणनं - स्तुतिरित्यर्थः ।

एवं "कृत्वोर्थप्रयोगेकालेऽधिकरणे" (२ - ३ - ६४) इति सूत्रात कृत्वोऽर्थानां शब्दानां प्रयोगे कालवाचि न्यधिकरणे शेषत्वेन विवक्षिते षष्ठी स्यादित्यर्थकात्, पंच कृत्वोऽह्नो भुङ्क्ते, पंचकृत्वोऽह्नोभोजनं, द्विरह्नो भोजन, मित्यत्र षष्ठी । अत्र षट्सूत्र्या विच्छिन्नमपि शेषग्रहणं व्याख्यानतो मण्डूकप्लुत्याऽनुवर्तते । अधिकरणत्वत्वेन विवक्षायां तु द्विरहनि-

भुङ्क्तइति सप्तम्येव । तत्सिद्धमिय मष्टसूत्री शेषत्वविवक्षायां समासप्रतिषेधार्थेति । ....

यानितु षष्ठी हेतुप्रयोग इत्यादीन्यनुशासनानि; तानिलाक्षणिकानुशासनानि । तथाहि । " षष्ठीहेतुप्रयोगे " (२—३—२६)इतिसूत्रात् हेतुशब्दप्रयोगे हेतुत्वेन हेतौ बोध्ये षष्ठी स्या दित्यर्थकात्, अन्नस्यहेतो र्वसतीत्यत्र षष्ठी । अत्रहेतुत्वत्वेन हेतुत्वं लक्षणयाषष्ठ्यर्थः, तच्च पूर्वनिरुक्तं, हेतुशब्दप्रयोगस्तात्पर्यग्राहकः, तदुत्तरषष्ठ्यास्सामानाधिकरण्यसिद्ध्यर्थं सएवार्थः, अन्नहेतुक वासाश्रयत्वं, इत्यादिः शाब्दबोधः । अत्र हेतुप्रयोगाभावे तत्वेन हेतुत्व विवक्षायां पूर्वोक्तविधया तृतीयैव, शेषत्वेन हेतुत्वविवक्षायां तु हेतुशब्दप्रयोगाभावेपि शक्त्यैव षष्ठ्यन्तः प्रयोगः । सर्वनाम्नस्तु हेतुशब्दप्रयोगेहेतुत्वत्वेन हेतुत्व विवक्षायां षष्ठी वैकल्पिकी "सर्वनाम्नस्तृतीयाच" (२ - ३ - २७) इतिसूत्रात्, केन हेतुना वसति, कस्य हेतो र्वसति । तृतीयेत्युपलक्षणम्, "निमित्तकारणहेतुषु सर्वासांप्रायदर्शन" मितिवार्तिकात् । तेन कोहेतु र्वसति चैत्रः, कंहेतुं वसति, कस्मै हेतवे वसति, कस्माद्धेतो र्वसति, कस्मिन् हेतौवसतीत्यादयोपि प्रयोगा स्साधवः । अत्र सर्वत्र हेतुत्व मेव विभक्त्यर्थः, अनुशासनबलात् । कीदृशहेतुकंवासाश्रयत्व मित्यादि रेवच शाब्दबोधः । वसति चैत्र इत्यत्र कोहेतुः, कंहेतुमुररीकृत्यवसती त्यादि योग्यपदांतरा ध्याहारेण व्याख्याने तु विभक्तीनां तत्तदर्थकत्वमेवेति ध्येयम् । ....

एवं किन्निमित्तं वसति, केन निमित्तेन वसति, कस्मै निमित्ताये, त्यादि । किं कारणंवसति, केनकारणनेत्यादि । निमित्तादिशब्दाना मेकार्थकत्वेपि प्रथगुपादानं उपलक्षणार्थं । तेन प्रयोजनादि पद प्रयोगेपि सर्वाविभक्तयो भवन्ति । असर्वनाम्नोपि हेत्वादिशब्दप्रयोगे सर्वाविभक्तयः । अन्नाद्धेतोर्वसति, अन्नेनकारणेनवसति । वृत्तिकारेण " सर्वनाम्नस्तृतीयाच (२ - ३ २७) इतिसूत्रे पठितस्याप्यस्य वार्तिकस्य हेताविति सूत्रेभा

ष्यकारेण पाठात् , प्रायग्रहणं असर्वनाम्नः प्रथमा द्वितीये नस्त्इत्येत दर्थकं । तेनान्नकारणंवसती त्यप्रयोगः । ....

एवं "षष्ठ्यतसर्थप्रत्ययेन" (२—३—३०) इतिसूत्रात् अतस र्थ प्रत्यय,अतसुच् प्रत्ययादिः, "दक्षिणोत्ताभ्यामतसुच् "(५ - ३ - २८) इत्यादिसूत्रविहितः, तेनयोगे षष्ठीत्यर्थकात्, ग्रामस्य दक्षिणतः , ग्राम— स्योत्तरतः, ग्रामस्योपरि, ग्रामस्योपरिष्टात् , इत्यादौ षष्ठी । अत्र प्रति- योगित्वं षष्ठ्यर्थः । तत्वेन बोधार्थं प्रथगनुशासनं । नतु—पंचम्यपवादा- र्थं; विंध्यात् दक्षिणत इत्यादि प्रयोगस्य दृष्टत्वात् ।

अतएव ततः पश्चात् स्त्रंसतइत्यादिः भाष्यप्रयोगः सामान्येनज्ञापक- इतिकेचित् । तन्न । प्रकृतायाः पंचम्याः द्वितीयाषष्ठ्यौ बाधिके भवि- ष्यत इति"प्रथग्विने"तिसूत्रभाष्यविरोधात् । अतः पंचम्यपवादार्थ म प्येत- दनुशासनं विंध्यादित्यादिप्रयोग स्वपप्रयोगः । ज्ञापकंच पश्चाद्योगमात्रविष यम् । श्रुतस्यैव चात्रातसुच् प्रत्ययस्यनिमित्तता । नतुलुप्तस्य । प्राग्ग्रामादित्यादौ प्रत्ययलोपे षष्ठ्यभावस्य भाष्यकैयटसिद्धत्वात् ।

एवं "एनपाद्वितीया" (२ - ३ - ३१) इतिसूत्रा देनबन्तेन योगे- द्वितीया, योगविभागात् षष्ठीच, इत्यर्थकात् , दक्षिणेन ग्रामं ग्रामस्य वेत्यत्रषष्ठी । प्रतियोगित्वं विभक्तिद्वयार्थः । पंचम्यपवादः पूर्वलिखितभाष्यात । अतएव तत्रागारंधनपति गृहादुत्तरेणास्मदीयामित्यादि रपप्रयोगः । हरदत्ताद- योप्येवम् । ....

एवं " दूरांतिकार्थैष्षष्ठ्यन्यतरस्यां " (२ - ३ - ३४) इति सूत्रादेतैर्योगे षष्ठी वारयात् पंचमीवेत्यर्थकात् , दूरमन्तिकंवा ग्रामस्य ग्रा माद्वा, इत्यत्र पंचम्यासह वैकल्पिकीषष्ठी, अत्र प्रतियोगित्वमेव तदर्थः ।

एवं " दिवस्तदर्थस्य " (२ - ३-५८) इति सत्रात्, "व्यवहृपणो-

स्समर्थयो" रिति पूर्वसूत्रोक्तपरामर्शितच्छब्दबलेन द्यूताद्यर्थस्य क्रयविक्रय रूपव्यवहारार्थस्यच दिवः कर्मणि कर्मत्वत्वेन विवक्षिते षष्ठीस्यादित्यर्थकात् शतस्य दीव्यतीत्यादौ षष्ठी । स्तुत्यादिरूपार्थान्तरपरत्वेतु ब्राह्मणं दीव्य तीति, द्वितीयैव । अत्र न शेषत्वेन कर्मत्वविवक्षा । अन्यथा, दिवेः पूर्वसूत्रएव पाठापत्तौ पृथक् सूत्रारंभवैयर्थ्यात् ॥ दिवे रुपसर्गयोगेतु विकल्पेन षष्ठी, " विभाषोपसर्ग " (२ - ३ - ५९) इति सूत्रात् । शत स्य शतं वा प्रतिदीव्यति , इदंचलोके । ब्राह्मणेतु " द्वितीयाब्राह्मणे " (२ - ३ - ६०) इति सूत्रात् छन्दसि उपसर्गयोगाभावेपि द्वितीयैव । ग्रामस्य तदहस्सभायां दीव्येयुरित्यादौ ।

एवं - " प्रेष्यब्रुवोर्हविषोदेवतासंप्रदाने " (२ - ३ - ६१) इतिसू त्रादेवतासंप्रदानेर्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणो हविर्विशेषस्यवाचकात् , षष्ठीत्यर्थकात् , अग्नयेछागस्य हविषो वपाया मेदसोनुब्रुहि प्रेष्यवा इत्यत्र - कर्मत्वत्वेन विवक्षिते षष्ठी । अत्र शेषग्रहणं न संबध्यते । प्रेष्येति लो डंतेन समासस्या प्रसक्तत्वेन तन्निषेधार्थत्वानुपपत्तेः, हविषः 'प्रस्थितत्वे न विशेषणे प्रतिषेधोवक्तव्य' इति वार्तिकात् प्रस्थितत्वेन विशेषणे द्वि तीयैव । अतएव इन्द्राग्निभ्यांछागस्य हविर्वपां मेदः प्रस्थितं प्रेष्येति प्रयोगः ।

इदंच लोकवेदसाधारणं, उत्तरत्र छन्दोग्रहणात् । यत्तु "चतुर्थ्य र्थेबहुलंछन्दसि" (२-३-६२)इत्यनुशासनं दार्वाघाटस्तेवनस्पतीनामित्यादौ वनस्प तिभ्यइत्यर्थे षष्ठीविधायकं तत्तव्ययवचनादेवसिद्धेः प्रत्याख्यातं । एवं"करणे यजः" (३ - २ - ८५) इति सूत्रमपि छन्दसिबहुलमित्यनुवृत्त्या घृ तस्य स्रुवेणाग्नये जुहोतीत्यर्थे षष्ठीविधायकं प्रत्याख्यातमेव ।

"[illegible] कृतिः" (२ - ३ - ६५) इति सूत्रात् कृ योगे कर्तरि कर्मणिच षष्ठीस्यादित्यर्थकात् कृष्णस्य कृतिः, जगतःकर्ता

कृष्ण, इत्यादौषष्ठी । अत्रकर्तृत्वत्वेन कर्तृत्वं कर्मत्वत्वेन कर्मत्वं च लक्षणया षष्ठ्यर्थः । नतु शेषत्वेन । व्याख्यानवशेन शेष इत्यस्य निवृत्ति प्रतीतेः । अत्रोभयत्रकर्तृत्वकर्मत्वयोः कृदुपात्तकृतावेवान्वयः । ओदनस्य पक्तेत्यादिवत् । नतुधात्वर्थे, प्रधानक्रियायांवा । एतच्चानुपदमेव स्पष्टीकरिष्यते । धातुस्तु साधुत्वार्थः । ओदनस्यपाकइत्यादौतु धात्वर्थस्य कृदर्थकृतावेवान्वयइत्यपिवक्ष्यते । नचैवमपि सूत्रे कृत् ग्रहण वैय्यर्थ्यं, "नलोकाव्ययेति वक्ष्यमाणसूत्रेण लादेशरूपतिङादियोगे षष्ठीनिषेधेन परिशेषादेव कृद्योगे षष्ठीविधि प्राप्तेरितिवाच्यम् । कृतपूर्वीकटं इत्यादौ पूर्वीति तद्धितयोगे षष्ठीव्यावृत्त्यर्थं तद्धपपत्तेः । अत्र कृतःपूर्वकटोनेनेति कृतपूर्वी देवदत्तः । "सपूर्वाच्च"(५-२--८७) इतिसूत्रेण सोपपदात् पूर्वशब्दात् कर्त्रर्थेइनिप्रत्ययविधानात् । अतस्तत्रषष्ठी व्यावृत्त्यर्थं कृद्ग्रहण मर्थवत् ।

नन्वेवं - नतग्र द्वितीयापि, निष्ठाप्रत्ययेनैव कर्मकारकस्याभिहितत्वेन तस्याप्राप्तेः । अतएवानभिहिताधिकारविहितषष्ठ्या अपि तत्राप्रसक्तत्वेन न तद्व्यावृत्त्यर्थं कृत् ग्रहणम्, वैय्यर्थ्याच्च । किञ्च - कृतादिशब्दस्य कटादिरूप विशेषणवत्त्वेन पूर्वशब्देन समासानुपपत्तिः सविशेषणानांवृत्तिर्नेष्यत इतिनिषेधा दितिचेत् ॥ अत्रवैयाकरणनव्याः ॥ पूर्वं कृतशब्दः कर्मविशेषरूपकटान्वय मप्रतिपाद्यमानएव कर्मसामान्यवाचि क्तप्रत्ययांततया भावार्थकक्तप्रत्ययांततयावा व्युत्पादितः पूर्वपदेनसमस्यत इतिनतावत्समासानुपपत्तिः । पश्चाच्च कटं कृतवातितिवत् कटं कृतपूर्वीत्यत्रापि द्वितीयांतस्य कृत्यर्थेन्वयः । कृत्प्रत्ययेनतस्यानभिधानाच्च द्वितीयोपपत्तिरिति । तन्न । तथात्वे राजपदस्यापि ऋद्धपदापेक्षस्य पुरुषपदेन समासेकृते पश्चादेव तस्मिन् ऋद्धपदान्वयापत्तेः - क्तप्रत्ययस्य कर्मसामान्याभिधानमात्रेण कटानभिधाना द्वितीयांतत्वोपपादने, ओदनः पच्यतेतमां गुरुर्धरित्रीक्रियतेतरांवये त्यादावपि द्वितीयांतत्वापत्तेश्च । क्तप्रत्ययस्य भावार्थकत्वे कृत्योऽविवक्षितकर्मकतया पश्चादपि कर्मान्वयानुपपत्तेश्च । इतरथा ओदनःपच्यत इति भावाख्याते द्वितीयापत्तेः । अनयैवदिशा ओदनं पाचकतमः ओदनं पाकगृहमित्यादि प्रयोगा

णामप्यापत्तेश्च । सविशेषणत्वेन षष्ठ्यन्तप्रयोगस्या प्यनापत्तेश्च । अतः कट मित्यस्य कथमपि न धात्वर्थान्वयः सम्भवी ।

एतेन कारकाणां धात्वर्थान्वय वादिनोनैय्यायिका अपि परास्ताः ।

अतोत्रैवंसमाधेयम् । न कटस्य कृत्यर्थेऽन्वयः । धात्वर्थान्वयस्य कारकाणा मव्युत्पन्नत्वात् । नापि क्त्वाद्यर्थे, प्रथमांतत्वापत्तेः, असमर्थसमासापत्तेश्च । अपितु तद्धितार्थएव । कर्तृत्वं हि अत्र तद्धितार्थः । अतश्च पाचकादिकृत्स्विव विशेषणत्वेन स्वातंत्र्येणवा लक्षणया कृतिरपि तद्धितार्थः । तस्यांच लिङ्गानन्वयिन्यांविशेष्यवाचकपदोपस्थाप्यायांवा न्वयः । व्युत्पत्त्यन्तराभावेन गौरवाभावात् । तद्वाचकपदे कर्मकारकस्यानुक्तत्वेन प्रथमाया अप्रसक्तेः । विशेष्यवाचकपदोपस्थाप्यायामन्वयाच्च ओदनस्यपाचक इतिवत् न समासभङ्गः । यत्रत्वोदनः पच्यतेतरामित्यादौ तद्धितेन अतिशयमात्राभिधानात् नकृतेरभिधानं, तत्रत्वलकारार्थकृतावेव कारकान्वयात् , तेन च कर्मत्वस्योक्तत्वेन न द्वितीयापत्तिः । पचतिकल्पमित्यादिवच्च तरामित्यस्य तात्पर्यग्राहकत्वांगीकारात् , पचधातुनैव विशिष्टपाकलक्षणात् , तरा मित्यस्य निरर्थकत्वेन विशेषण सापेक्षेस्यापि तेन सह वृत्त्युपपत्तिः । अस्माकं गुरुकुल मितिवद्वा नित्यसापेक्षत्वा त्तदुपपत्तिः । एव मोदनस्य पाचक तम इत्यत्रापि द्रष्टव्यं । कृतपूर्वीकट मित्यादौतुकर्तृत्वस्य इनिप्रत्ययेनैवोक्तेस्तदुक्तकृतौ कटमित्यस्यान्वयात् द्वितीयोपपत्तिः । एवं व्याकरणम्प्राज्ञ इत्यत्रापि , तद्धितेन स्वार्थविहितेन कृदर्थकृतरेप्यु पादानेन तत्रान्वयोपपत्तेः । अतएवोक्तंहरिणा "ततः क्रियावता कर्त्रायो गोभवतिकर्मणां । अविग्रहागतादिस्थायथाग्रामादिकर्मभिः । क्रियासम्बन्धतेतद्वत्कृतपूर्व्यादिषुस्थिते"ति । अविग्रहा-विशेष्यत्वेन अनुपस्थीतापीत्यर्थः । गतादिस्था- गतमित्यादिकृत्पदस्था । धात्वर्थान्वयमादाय तच्छाब्दबोधोपपादनंवैयाकरण नव्यानामसंगतमेव । कारकाणांधात्वर्थान्वयस्य क्वाप्यव्युत्पन्नत्वात् ।

नन्वेवमोदनस्य पाकः कृष्णस्य कृतिरित्यादौ ककारकान्वयः , न तावत् धात्वर्थे पाके, तस्मिन् तत्राप्य व्युत्पन्नत्वात् । नापि घञर्थे तस्य

लिंगान्वयित्वात् । लिंगान्वयिन्यामप्यन्वये वस्तुपदाभिधेयायामप्यन्वयापत्तेरिति चेत्, पक्तेत्यादिवत् तत्रापि कारकान्वयार्थं घञ्चैव कृतिविशिष्टपाकस्य-स्वातन्त्र्येण शक्तितलक्षणाभ्यां कृतिपाकयोर्वा भिधानेन कृतौ कारकान्वयोपपत्तेः पाकानुकूलकृतिसाध्यः पाकइतिच बोधः ॥

केचित्तु न घञा कृतेर्लक्षणा, तद्योगेषष्ठीच न कारकपरा, अपितु शेषषष्ठ्येव । तस्या अपि अध्याहृतास्तिरूपप्रधानक्रियायामन्वयः परम्परासम्बन्धेनेति न कश्चित् दोषः । एवंच कृष्णस्य कृतिरित्यत्रापि बोधाञ्जस्यं । नचैवं कृद्योगानिमित्तक षष्टीविधिवैय्यर्थ्यम् , तस्य कृजादिकृद्विषयत्वेनाप्युपपत्तेरित्याहुः ॥

अतस्सिद्धं कृद्योगएव कर्तृकर्मणोःषष्ठी । नतु सार्थकतद्धितयोगे कारकवाचितद्धितयोगे वेत्येतदर्थकं कृद्ग्रहणमिति ।

अतएव कृतपूर्वीत्यत्र सापेक्षत्वात् प्रत्ययार्थेनान्वयमङ्गीकृत्य कृत पूर्विकटइत्यस्याप्यापत्तिरपास्ता । उक्ततद्धितयोगे कारकाणां कृतावनन्वय इत्येवंविधज्ञापन प्रयोजनकत्वात् कृद् ग्रहणस्य । अतस्सिद्धं तादृशतद्धितासम-भिव्याहृत कृद्योगएव षष्ठी, नतु - तादृशतद्धितयोगेपीति ।

कर्तृत्वंच स्वतंत्रकर्तृत्वं प्रयोजककर्तृत्वंचेति उभयं विवक्षितं तेन राज्ञोयाजकः चैत्रस्यपचनीस्थली त्यादावुभयत्रषष्ठी । द्विकर्मकेतुमुख्यकर्मणि षष्ठी नियता । द्वितीये गुणभूतेत्वनियता । अतएव नेताश्वस्यग्रामं ग्रामस्य-वेत्युभयथापि प्रयोगइत्यन्यत्रविस्तरः ।

अयं च षष्ठीविधिरनित्यः, तदर्हं मिति निर्देशात् । अतएव " धर्मैरामोदमुत्तम " मितिभट्टिरितिकेचित् ।

एवं "उभयप्राप्तौकर्मणि" (२-३-६६) इतिसूत्रात् यस्मिन् कृति उभयोः प्राप्तिः तद्योगे कर्मण्येव षष्ठीस्यात् कर्तरितु तृतीयै वेत्यर्थकात् आश्चर्योगवांदोहोऽगोपेनेत्यादौ कर्तरिनषष्ठी । अत्रदोहइत्ययंभावेकृत सच्च सकर्मकाकर्मकधातुसाधारणः । नतु लकारनिष्ठादिव दकर्मकधातुपरएवेति तत्रोभयप्राप्तिः । अत स्तत्र

पूर्वोक्त प्रकारेणैव कृतिबोधोऽनुसंधेयः । शेषषष्ठीप्रकारस्तु कृष्णस्य कृति रित्यादावेवेतिध्येयम् ।

अथवा सर्वत्रैव घञन्ते धात्वर्थेनैव कर्माद्यन्वयः । नचैवं व्युत्पत्त्यन्तरकल्पनाभियासर्वत्रैव तदापत्तिः । कृतपूर्वीकट मित्यादौ तत्रतदन्वयस्योपपादितत्वात् । नचैवं व्युत्पत्त्यन्तरकल्पना । सुबर्थधात्वर्थाद्यनेकसाधारण्येन लिंगानन्वयिभावनाविशेष्यता संबन्धेन पदजन्योपस्थिते र्हेतुत्व मित्येकयैव तत्सिद्धेः । तत् पदञ्च यथा स्यात कृन्निपात तद्धितादि, तथा घञंतो धातुरपीति, युक्तस्तस्यामपि तत्रकर्माद्यन्वयः । अत्रहि भावनापदं फलप्रयोजक कारकाभिन्नव्यापारपरम्; नातोलडाद्यर्थेलिङाद्यर्थेवा विशेष्यत्वापत्तिः । सचाख्यातादौ कृत्यादिरूपाभावना घञंतादौतु धात्वर्थएव, उभयोः फलप्रयोजकत्वात् । कारकभिन्नेत्युपादानात् यत्र घञंतभिन्ने आख्यातादौ धात्वर्थस्य कारकत्वं विवरणसिद्धं तत्र धात्वर्थे कारकान्वय निवारणं । तत्रानन्वयेच पचत्योदनमित्यस्य पाकेनोदनंकरोतीति विवरणे द्वीतियौदनपदस्य करोत्यर्थान्वय एव बीजं । करोत्यर्थस्या ख्यातार्थत्वेन स्थापितत्वात् । अत्रापि धात्वर्थान्वये ओदनंपचतीत्यस्य ओदनस्य पाकंकरोतीत्येव नियमेन विवरणापत्तिः, घञंतस्थलेच धात्वर्थस्याकारकत्वात् लिंगानन्वयाच्च । सत्यपि घञा अभिहितस्य तस्योभयरूपत्वे धात्वभिहिते तस्मिन् कारकान्वयोनविरुद्धः । धातुप्रत्ययाभ्यां पाकाभिन्नः पाक इति, बोधात् । अतश्चानुभवानुरोधेनैकयैव व्युत्पत्त्यातत्रतत्राख्याताद्यर्थे धात्वर्थेवा, व्यवस्थया कारकान्वयोपपत्तेः, आश्वर्योगवांदोहोऽगोपे नेत्यत्रापि धात्वर्थेकारकान्वयोनिराबाधः । ....

वस्तुतस्तु लिंगानन्वायित्वं नकारणतावच्छेदककोटिप्रविष्टं; अपितु, प्रत्ययजन्योपस्थितित्वं, अतश्च घञर्थकृतावे वान्वयः । वस्तुपदाभिधेयायांचा नन्वयः कारकाणामिति नकोपि विसेधः । अयंचोभयप्राप्तौकर्तरिषष्ठवानिषेधः, अकप्रत्यय अकारप्रत्ययरूपयोः स्त्रीप्रत्ययथयोर्योगे न भवति । "अकाकारयोः प्रयोगे प्रतिषेधो नेतिवक्तव्य " मितिवचनात् । भेदिका त्रिभित्सावा

रुद्रस्यजगतः । मेदिका-मेदनं । भावेअकः । विभत्सेत्र भावेअकारः । यातु सुटासुटोबाधानेति- काशिका । तस्यां सुटेति करणत्वेतृतीया । उक्तविधप्रत्ययाभिन्नकृतितु उभयप्राप्तौतु विकल्पः " कर्तरिशेषेविभाषे " तिवचनात् । शोभना व्याकरणस्यकृतिः पाणिनेः पाणिनिनावा । स्त्रीप्रत्ययविषयमेवेदं । केचिदविशेषेणविकल्पमिच्छन्ति । शब्दानामनुशासनमाचार्यस्याचार्येणवा । तन्मते आश्चर्यो गवांदोहोऽगोपेनगोपस्येत्यपि भवतीति ध्येयम् ।

एवं " क्तस्यच वर्तमाने " (२ - ३ - ६७) इतिसूत्रात्, वर्तमानार्थक्तवत्स्ययोगे षष्ठीस्या दित्यर्थकात्, राज्ञां मतः बुद्धः पूजितो वेत्यत्र षष्ठी । अत्र " मतिबुद्धिपूजार्थेभ्यश्च " (३ - २ - १८८) इत्यनेनवर्तमानेक्तः, तद्योगात् राज्ञा मिति कर्तरि षष्ठी । कर्मणः क्तप्रत्ययेनाभिहितत्वात् । राज्ञोमत मित्येवं नपुंसकेभावेपिच अनेनैवसूत्रेणषष्ठी ।

नच कर्तृकर्मणोः कृतीत्यनेनगतार्थत्वं । नलोकाव्ययानिष्ठेति वक्ष्यमाणवचनेननिष्ठाविषयेपर्युदस्तायाः निष्ठाविशेषप्रतिप्रसवार्थत्वात् । नचैवं पूजितोयस्सुरासुरैरिति तृतीयानापत्तिः । तत्रत्यक्तप्रत्ययस्य भूतार्थकत्वेनोपपत्तेः । नहि मतिबुद्धिपूजार्थेभ्यो वर्तमानएवक्तः । अतीतार्थे धात्वर्थे उक्तधातूनां क्तां तानां लोकेप्रयोगदर्शनेन तद्वचनस्य भूतार्थकक्तबाधकत्वायोगात् ।

नचैवं - वर्तमानार्थकमत्यादिधातूत्तर क्तप्रत्ययभिन्न क्तप्रत्यययोगे छात्रस्य हसित मित्यादौषष्ठ्यनापत्तिः । तस्याश्शेषषष्ठीत्वेनोपपत्तेः । अतएव कर्तृत्वत्वेन कर्तृत्व विवक्षायां तृतीयैव । भूतार्थक क्त प्रत्ययस्या प्यधिकरणवाचित्वे पूर्ववत षष्ठीप्रतिप्रसवः, " अधिकरणवाचि नश्च " (२ - ३ - ६८) इतिसूत्रात । तत्राप्यकर्मकेभ्यः कर्तर्येव षष्ठी, इदमेषांशयितमिति । शयितं - शयनाधिकरणं । क्तप्रत्ययेनोक्तत्वात् इदमितिप्रथमा । सकर्मकेभ्यस्तु अधिकरणेक्तप्रत्यये कृते कर्तृकर्मणोर्द्वयोरपि षष्ठी, अनभिहितत्वाविशेषात्, इदमेषां भुक्तमोदनस्य । भुक्तं-भोजनस्थानं । नतु - कर्मण्येव । उभयप्राप्तौकर्मणीत्यस्य कर्तृकर्मणोः कृ-

तोत्यतदुत्तरपाठेन तत्सूत्रविहितषष्ठ्याएव तेन नियमात् , तदेवं कृद्योगेसर्वत्र " कर्तृकर्मणोः कृती " त्यनेना षष्ठीप्राप्तौ " नलोकाव्ययनिष्ठाखलर्थतृ नां " (२ - ३ - ६९) इति सूत्रेण तत्पर्युदासः । लः — तदादेशाः- तेच कृत्संज्ञकाः शतृशानजादय एवेह गृह्यन्ते, तिङःकृद्ग्रहणेनैव निवृ त्तत्वात् । तेन ओदनं पचन् पचमानइत्यादौ न षष्ठी । अपितु द्वितीयै व । अत्र च लकारग्रहणेन तत्कार्यापन्नानामपि ग्रहणम् । तेन किकिनो- र्लदेशत्वाभावेपि लिट्कार्यापन्नत्वात् विशेषातिदेशेच सामान्यातिदेशस्यावश्य कत्वात् तयोरपि ग्रहणम् । अतएवच बभ्रिर्वज्रमित्यादिप्रयोगा अपि सं- गच्छंते । उ - कटं चिकीर्षुः कन्यामलंकारिष्णुः । उक - दैत्यान्घातुकः । " क मेर्भाषायामनिषेध" इति वचनात्तु लक्ष्म्याः कामुको हरिरित्यत्र षष्ठी । अ व्ययः—कटंकृत्वा । " तोसुन्कसुनो रप्रतिषेध " इति वचनाच्च पुरावत्सानामुपा कर्तोः, पुरा क्रूरस्य विसृपो विरप्सम् इत्यादौ षष्ठी । निष्ठा - ओदनं भुक्त वान् चैत्रेण कृतम् । खलर्थः - सुकरः प्रपंचो हरिणा । तृचिति — प्रत्याहारः, सच - शतृशानचाविति तृशब्दादारभ्या तृनोनकरात् । तेन शानन्प्रभृ तीनामपि ग्रहणम् । शानन् - सोमं पवमानः। चानश् - आत्मानं मण्डयमानः । शतृ - वेदमधीयन् । तृन् - लोकान् कर्ता । द्विषधातूत्तरशतृयोगेतु वि कल्पेन षष्ठी । " द्विषश्शतुर्वे" ति वचनात् । मुरस्य मुरंवा द्विषन् । स र्वश्चायंकारकषष्ठ्याः पर्युदासो नतु शेषषष्ठ्याः , आनंतर्येण तदेकवाक्य- तायाएव न्याय्यत्वात् । अतएव ब्राह्मणस्य कुर्वन् , नरकस्य जिष्णुः, छात्र- स्य हसितमित्यादि प्रयोगा अपि संगच्छन्ते ।

एवं " अकेनोर्भविष्यदाधमर्ण्ययोः " (२ - ३ - ७०) इति सूत्रात् भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेनश्च योगे षष्ठी न स्यादित्यर्थकात् ए नःहरकोव्रजति , व्रजं गामी, शतं दायीत्यादौ द्वितीयैव- न षष्ठी । अत्र - भ विष्यत्कालविहिताकस्यैव ग्रहणा नकालसामान्यविहिताके ओदनस्य पाच क इत्यादाद्वतायां । अत्रच - व्याख्यानवशात् न यथासंख्यमन्वयः ।

अपितु -अकस्य भविष्यत्येव । इनस्तु - उभयोः । तेन गामीलयं भाविष्य तीनिः-दार्यात्ययमाधमर्ण्ये णिनिः ।

एवं - " कृत्यानांकर्तरिवा " (२ - ३ - ७१)इति सूत्रे भाष्यकारेण यो गविभाषाकरणात् कृत्यानामित्यस्य भिन्नसूत्रत्वप्रतीतेः तत्रचोभयप्राप्तौ नेति पूर्वसूत्रस्थपदद्वयानुकर्षणात् उभयोः कर्तृकर्मणोरनभिधानप्रयुक्तषष्ठीप्रसक्तौ कृत्यानां येगोपष्ठीनित्यर्थकात् , नेतव्याव्रजं गावः कृष्णेनेत्यत्र नषष्ठी । अपितु - द्वितीयातृतीयेच । अत्रहि नयते द्विकर्मकत्वात्मुख्यकर्मणःकृत्येनाभिधानात् गोपु प्रथमा । अमुख्यकर्मणो व्रजस्य त्वनभिधानात् तत्र - द्वितीया । यत्रतु कर्तृकर्मणोर्मध्ये न्यूनस्य कृत्प्रत्ययेनाभिधानान्नोभयत्र प्राप्तिः । तादृशकृत्यस्य योगे कृद्योग निमित्तकषष्ठ्या नियमेनप्रसक्तौ " कृत्यानां कर्तरिवे"ति सूत्रेण कर्तृषष्ठ्याविकल्पविधानं, कर्तव्यमिदं कृष्णेन कृष्णस्यवा । नच-भावकर्मणोरेव कृत्यविधानात् तत्रच कर्मणः कृत्येनाभिधानादेव तत्र षष्ठ्यप्राप्तेः परिशेषात् कर्तर्येव विकल्पविध्युपपत्तेः कर्तृग्रहणवैयर्थ्यम् । " भव्यगेये"(३-४-६८)ति सूत्रेण कर्तर्यपि यत्प्रत्ययाख्यकृत्यविधानात् तद्योगे कर्मण्यनभिहितत्वेन षष्ठीप्राप्तेः, तत्र विकल्पव्यावृत्त्यर्थं कर्तृग्रहणोपपत्तेः । यथा - गेयो माणवकः साम्नां । अत्र गेय इति कर्तरिकृत्यः सामकर्मक गानकर्ता माणवकइति शाब्दबोधः ।

एवं - " तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यां " (२ - ३ - ७२) इतिसूत्रात् तुल्यार्थकै स्तुलोपमाशब्दभिन्नैश्शब्दै र्योगे तृतीया स्यात् पक्षे षष्ठ्यर्थकात् , तुल्य स्सदृश स्समोवा कृष्णेन कृष्णस्य वेत्यत्रपक्षेषष्ठी । अत्रा तुलोपमाभ्यामिति द्विवचनं छान्दसम् । अन्यथा — विशेषणविभक्तित्वेन बहुवचनापत्तेः । अयंच - मण्डूकप्लुत्या शेषषष्ठ्याएव पाक्षिकत्वकल्पको विधिः , ननु कारकषष्ठ्याः । तुल्यशब्दस्य तद्धितान्तत्वेन कारकषष्ठ्या अप्राप्तेः । तुलोपमाशब्दयोगेतु शेषषष्ठ्येव । अतएव तुलोपमाभ्यां कृष्णस्य नास्तीत्यत्रशेषेतृतीयायाअविधानात् नतृतीया । कथं तर्हि - "तुलां यदारोहति दन्तवाससा स्फुटोपमंभूतिसितेन शंभुना " इत्यादिकाव्ये तुलादि

शब्दयोगे तृतीयेतिचेत् ; तस्याः तोलनोपमानादिरूपधात्वर्थं प्रति करणत्वेनोपपत्तेः । सहयोगनिमित्तिकावेयं तृतीया । साहित्यञ्च - निरूपकत्वं-तस्यच तत्त्वेन तृतीयार्थो बोधः । प्रकृतेतु शेषत्वार्थकतृतीयायाः पर्युदासइति न कश्चिद्विरोधः ।

अत्र बहुवचननिर्देशेनैव तुल्यपर्यायाणां ग्रहणोपपत्तौ अर्थग्रहणं पदान्तरनैरपेक्ष्येण बोधकपरम् । तेन गौरिव गवयः, यथागौः तथागवय इत्यादौ न षष्ठ्यादि । प्रथमोत्पत्तिप्रयोजकन्तु पूर्वमेवोक्तम् ।

एवं " चतुर्थीचाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः" (२-३-७३) इति सूत्रादायुष्यायर्थक शब्द योगे आशिषि शेषेचतुर्थीस्या त्पक्षे षष्ठी स्यादित्यर्थकात आयुष्याद्यस्मै, भूयादितिचतुर्थी पक्षेषष्ठी । आयुष्यं -चिरं जीवितं, मद्रं - भद्रमेव, उभयोः पर्यायत्वेपि आयुष्यादिपदानामर्थपरत्वख्यापनाय उभयोपादानम् । यत्तु - व्याख्यानात सर्वत्रार्थग्रहणोपपत्ते र्मद्रभद्रयोरन्यतरं न पठनीयमिति कैश्चिदुक्तम् । तद्भाष्यकारेण एतत्सूत्रस्याव्याख्यानादुपेक्षितम् । कुशलं - निरामयं, सुखं - शं, अर्थः - प्रयोजनं, हितं-पथ्यं । नच - " हितयोगे चतुर्थीवक्तव्ये " ति वार्तिकादेव तत्सिद्धेः हितग्रहणवैय्यर्थ्यं । अनाशिषि तेन तन्नियमेपि एतस्याशिषिविकल्प विधायकत्वोपपत्तेः । अतएव आयुष्यादौ अनाशिषिष्ठ्येव । चैत्रस्य आयुष्यमस्तीति ।

सर्वथा षष्ठ्यर्थस्सर्वोप्याख्यातार्थेन्वेतीति सिद्धम् ।

एवं - सप्तम्यर्थोपि तत्रैवान्वेति । सच " सप्तम्यधिकरणेचेति " (२ - ३ - ३६) सूत्रानुशिष्टमधिकरणत्वम् । तच्च "आधारोधिकरण" (१ - ४ - ४५) मिति सूत्रनिरुक्तम् । ननु - अधिकरणत्वन्नाम न येनकेनचित्संबन्धेन सम्बन्धित्वं । रूपरसादीनामपि परस्पराश्रयत्वापत्तेः । नापि स्वाधेयसम्बन्धित्वं । आधेयत्वस्येव निर्वक्तुमशक्तेः । तस्य स्वाश्रयसंबन्धित्वरूपत्वे अन्योन्याश्रयप्रसंगाच्च । नापि कारणत्वं । निमित्त

कारणादावतिव्याप्तेः । नापि समवायिकारणत्वम् । संयोगेन घटाद्याश्रये जात्याश्रये समवायाश्रयेच भूतलादावव्याप्तेः ।

यत्तु - तद्भिन्नत्वेसति तत्पतनप्रतिबन्धकसंयोगवन्मूर्तत्वं - पतनवन्निरूपिताधिकरणत्वं । पतमानपर्णादावाश्रयत्ववारणाय सत्यन्तं । ब्रह्माण्डादिधारकसंयोगाश्रयेश्वरवारणाय मूर्तपदोपादानम् । वस्तुतस्तु " यस्मिन्सर्वं प्रतिष्ठितं" "येनेदं धार्यते जगत्" इत्यादिवचनात् ईश्वरेप्यस्त्येवाधिकरणत्वम् इतरथा ब्रह्माण्डादिधारकत्वस्यैवानुपपत्तेः । अतो मूर्तपदं नैवदेयम् । लक्ष्यं द्रव्यनिरूपिताधिकरणत्वं, आकाशादीनान्तु प्रमाणाभावादेव न द्रव्याधारत्वं , आधेयत्वात् । ईश्वरेतु उक्तवचनादाधारत्ववदाधेयत्वेपि " यःपृथिव्यां तिष्ठन् पृथिवीमन्तरोयमयति " " ईश्वरस्सर्वभूतानां हृद्देशेर्जुन तिष्ठती"त्यादि श्रुतिस्मृतिवशान्नक्षतिः । गुणादिनिरूपिताधिकरणत्वं समवायित्वम् । समवायादिनिरूपितंचतत्तत्स्वरूपसंबन्धित्वमितिमतं, तदपिन-अननुगमात् सप्तम्यानानार्थकत्वापत्तेश्चेतिचेत् ।

न अनुगताकारप्रतीत्या प्रतियोगित्वादिवत् अधिकरणत्वाधेयत्वयोश्चाखण्डोपाधित्वस्यैव स्वीकारात् । शक्यतावच्छेदकैक्यानुरोधेनापि करणत्वाद्यवच्छेदकपदार्थान्तरकल्पनेबाधकाभावाच्च । यत्रहि सखण्डपदार्थस्यैव शक्यतावच्छेदकविधया प्रतीतिरानुभाविकी, न तत्र कल्पनम् । यथा विश्वादिपदेषु । यत्रतु तद्घटकपदार्थाप्रतीतावपि तत्प्रतीतिः , तत्र शाब्दव्यवहारानुरोधादपि तत्कल्पनमसकृदावेदितम् । "तत्राधेयत्वमेवाधेयत्वत्वेन सप्तम्यर्थः , तत्रच निरूपकतासंबन्धेन प्रातिपदिकार्थस्य भूतलादेरन्वयः , तस्यचानुयोगितासंबन्धेन घटादावन्वयः" तेन भूतलेघटइत्यत्र भूतलवृत्तिर्घटइत्येवं शाब्दबोध, इति तार्किकाः । तन्न, सप्तम्यधिकरणेचेत्यनुशासनविरोधात् । भूतले घटः, गृहेपचतीत्यादौ सर्वत्रैकरूप्येणान्वयानंगीकारेणानेकव्युत्पत्तिकल्पनापत्तेश्च । अतोधिकरणत्वमेव सप्तम्यर्थः ।

यद्यपिच संयोगसमवायाद्यवच्छिन्नाधिकरणत्वानिनाना । तथाप्यधिकरणत्वत्वस्य शक्यतावच्छेदकस्य एकत्वान्न नानार्थकत्वं । तत्रचाधेयत्वसंसर्गेण प्रातिपदिकार्थस्यान्वयः । तस्यच निरूपकत्वघटितसंसर्गेण आख्याता र्थभावनाया अन्वयः । तत्र भूतले घटइत्यत्रास्तीति अध्याहारात् सप्तम्य र्थाधिकरणत्वस्य स्वनिरूपकघटवृत्तित्वसंसर्गेणाख्यातार्थे सत्ताश्रयत्वेन्वयः । भूतलनिष्ठाधिकरणत्वनिरूपक घटवृत्तिवर्तमानसत्ताश्रयत्वं घटवृत्तीतिच शाब्दबोधः । नच पूर्वं घटे भूतलस्थे संप्रतिचाधिकरणान्तरस्थे भूतले घटोस्तीति प्रयोगापत्तिः । यादृशकालबोधकप्रत्ययबोध्यक्रियायां सप्तम्य र्थाधिकरणत्वान्वयः, तद्बलेन तादृशकालावच्छिन्नाधिकरणत्वस्यैव व्युत्पत्तिवि शेषेण सप्तम्याबोधनात् । गृहे चैत्रः पचतीत्यत्र स्वनिरूपकचैत्रवृत्तित्व संसर्गेणाख्यातार्थकृतौ । स्थाल्यामोदनं पचतीत्यत्र स्वनिरूपकौदनकर्मत्वसं. सर्गेण तस्यामेव । अतएव सर्वत्र सप्तम्यर्थस्य स्वनिरूपककर्तृकर्मान्यतर द्वारकएवाख्यातार्थान्वयः । ननु कारकान्तरद्वारकः साक्षा द्वा । काश्यां ब्राह्मणेभ्यः प्रयच्छतीत्युक्ते कर्तु रेव झटिति काशिस्थत्वप्रतीतिः । यत्रतु - पाटलीपुत्रे स्थितोराजा काश्यां ब्राह्मणेभ्यः प्रयच्छतीत्या दौ ब्राह्मणपु काशीवृत्तित्वप्रतीतिः, तत्रस्थितेभ्यइति पदाध्याहारेण स्थितिकर्तृ द्वारैवेति न विरोधः । अतएव भूभृतिवृक्षात्पर्णं पततीत्यत्र स्थितादिति पदाध्याहारं विना न झटिति भूभृद्वृत्तित्वप्रतीतिः । साक्षात्तु सप्तम्यर्थस्य भावनान्वयो ग्रहणादौ बाधितएव । चैत्रादौतु परया कर्तृसंज्ञया बाधितः । अतस्सिद्धं कर्तृकर्मान्यतरद्वारकएव सप्तम्यर्थान्वय इति ।

नन्वेवं - कर्माविवक्षायां, ग्रामे गच्छति ग्रामे गम्यतइति प्रयोगानापत्तिः, ग्रामाधिकरणत्वस्य कर्तृकर्मद्वार-कत्वासंभवात् - लक्षणया उद्देश्यतां तत्र सप्तम्यर्थइति चेत् ओदने पचतीत्यपि प्रयोगापत्तिः । अतएव धात्वर्थतावच्छेदकफलद्वारकएवान्वयइत्यव्यपास्तम् , ओदनस्यापि तदापत्तेरितिचेत् । तत्रापि कर्तृद्वारकत्वस्य संभवात् । ग्रामाधिकरणकचैत्रावृत्तिगमनानुकूलकृतिमत्वस्य चैत्रेसंभवात् अन्यावच्छेदेन ग्रामप्राप्तिफलकक्रियावत्वापि

चैत्रे ग्रामाधिकरणत्वस्य भावित्वात् ग्रामाधिकरणचैत्रवृत्तिगमनानुकूलकृतिमत्वस्य चैत्रे नानुपपत्तिः । पाककर्तुस्तु ओदनाधिकरणत्वाभावात् न तथा प्रयोगः । नन्वेवमपि अग्नौ पचति आतपे तिष्ठति आकाशे पक्षीगच्छति आकाशे तिष्ठन्नाकाशमन्तरोयमयतीत्यादि प्रयोगानुपपत्तिः- अग्नयाद्यधिकरणत्वस्य कर्तृकर्मान्यतरद्वारकत्वायोगात्, नचाग्नौ पचतीति प्रयोगो नास्त्येवेति केषांचिदुक्तं युक्तम्, यस्मिन्नग्नौपचेदन्नं तस्मिन्होमो विधीयतइति बहुतरप्रयोगदर्शनात्, नहि वृत्तिनियामकसंयुक्तसंयोगादिसंबन्धस्याधिकरणतानिरूपकत्वं सम्भवति । अन्यथा आकाशे मनुष्यास्तिष्ठति चैत्रः मैत्रात्मनि तिष्ठतीत्यादिप्रयोगापत्तेरितिचेत्; तादृशस्थले गङ्गायां घोषइतिवद्गङ्गयादिपदे तत्संबन्धिस्थाल्यादिलक्षणया तन्निष्ठाधिकरणत्वस्य कर्तृकर्मान्यतरद्वारान्वयोपपत्तेः । तेन अग्नौ पचतीत्यादेरग्निसंयुक्तस्थाल्यां पचति आतपसंयुक्ते गृहे तिष्ठतीत्यर्थः । आकाशपदेन गमनप्रतिबन्धकभूप्रदेशानवच्छिन्नप्रदेशो लक्ष्यते । य मन्तरिक्षमिति व्यवहरन्ति । सप्तम्याअवच्छेदकत्वम् विषयत्वादिवत् । तस्य विभक्त्या लक्षणायामपि न दोषः । तस्योद्देश्यत्वादिवत्सप्तम्यर्थस्यापि साक्षात्सम्बन्धेनैव गमनसंबन्धित्वम् । नहि सप्तम्यर्थमात्रे तन्नियमः । अपितु सप्तमीवाच्यएव । तच्च प्रचुरप्रयोगादधिकरणत्वमेवेति तत्रैवायं नियमः । धातुनाच निराधारं गमनं । तथाच - उक्तविधनभूप्रदेशावच्छिन्ननिराधारगमनानुकूलकृतिः पक्षिनिष्ठेति शाब्दबोधः । आकाशेतिष्ठन्नित्यादौ संयुक्तसंयोगावच्छिन्न सम्बन्धित्वं लक्षणया सप्तम्यर्थः । षष्ठ्यर्थस्यापि सुपां सुलुक् इत्येवं लक्षणा । तस्यापि पूर्ववद्धात्वर्थद्वारकः कर्तृद्वारकएव वा संसर्गः । वस्तुतस्तु आकाशस्यापि ईश्वरोपादानकत्वात् उपादानत्वमेव सप्तम्यर्थः उपादानकर्तृद्वारकोन्वेति । आकाशे उपादानकारणत्वादनुगतः तिष्ठन्नित्यर्थः । अस्तुवा एतद्वचनबलादेवाकाशेपि शाब्दनिरूपिताधारत्ववदन्तर्याभिनिरूपिताधारत्वमपीति नतत्रलक्षणापि ।

नचैवमग्नौपचतीत्यादिप्रयोगाणां लक्षणयोपपादने आकाशे मनुष्यस्तिष्ठतीत्यादिप्रयोगापत्तिः । तथात्वे गंगायां घोष इत्यादौ गंगापदेन गंगा

सम्बन्धितीरलक्षणायास्सर्वसम्मतत्वेन भवदुक्तप्रयोगापत्तेरनिवारणात् । अत-स्सिद्धं सप्तम्यर्थाधिकरणत्वस्य कर्तृकर्मान्यतरद्वारकोन्वयइति । यस्तुगृहाद्बहिः स्थितेन कर्त्रा दीर्घदण्डादिना काष्ठचलनद्वारागृहमध्ये पाककरणे गृहे पच तीति प्रयोगः, सकर्मकारकस्य तण्डुलादेःपरम्परया गृहाधिकरणत्वान्नानुपपन्नः ।

नन्वेवमपि भूतले घटोनास्ति चैत्रो गृहे न पचतीत्यादौ कथं कर्तृकर्मान्यतरद्वारकोन्वयः । नहि तत्र भूतल निष्ठाधिक-रणत्वनिरूपक घटवृत्तिसत्ताश्रयत्वं अभावप्रतियोगीत्येवं शाब्दबोध-स्सम्भवति । भूतले घटदशायामपि तथा प्रयोगापत्तेः । उक्ताश्रयत्वस्य घटातिरिक्तवृत्त्यभावप्रतियोगित्वात् । नञा घटादिनिष्ठाभावलक्षणायामपि प्र-तियोगितावच्छेदकावच्छिन्न प्रतियोगिनोप्रसिद्धेश्च । तद्वाक्यादनुभूयमानघट त्वावच्छिन्नप्रतियोगिताक भूतलनिष्ठाभावबोधस्यापलापापत्तेश्च । नहि उक्त विधाभावोस्तीत्येतादृशएव बोधो नेन जनयितुं शक्यः । भूतलनिष्ठाधिकरण त्वस्य सप्तम्यर्थस्या भावत्वद्वारकत्वापत्त्या कर्तृकर्मद्वारकत्वनियमभंगापत्तेः । घटस्य प्रतियोगितासंसर्गेणान्वये धात्वर्थाश्रयत्वाभावेन कर्तृत्वाभावात्, प्रथमानुपपत्तेश्च । भूतलवृत्तिघटप्रतियोगिताकाभावस्य कर्तृत्वोक्तौ तस्यैक त्वात् घटौ नस्तइति द्विवचनानुपपत्तेश्च । घटोनास्तीति प्रयोगापत्तेश्च । घटएव प्रतियोगितासम्बन्धेनाभावान्वये ऽभावेच भूतलाधिकरणत्वमङ्गीकृत्य भूतलवृत्यभावप्रतियोगी घटोस्तीति शाब्दबोधांगीकारेतु अतीते भाविनि वा घटो स्तीति वर्तमानकालान्वयानुपपत्तेः घटो नास्तीति प्रयोगानुपपत्तिः ।

एतेन भूतलावेयत्वाभावात् घटोस्तीत्यपि शाब्दबोधः प्रत्युक्तः । अथैतद्दोषपरिहारार्थं सप्तम्यर्थाधिकरणत्वस्य निरूपकतासंबन्धेन धात्वर्थे-कालसम्बन्धेन्वयः, तत्रैव लडर्थान्वयोपि । तस्यचाश्रयत्वे आख्यातार्थे, तस्यच, प्रतियोगितासंसर्गेण नञर्थेऽभावे, तस्यच प्रथमान्तार्थे घटादाविति भूतलनिष्ठा धिकरणतानिरूपक वर्तमानकालसम्बन्धाश्रयत्व प्रतियोगिकाभाववन् घटइति शाब्दबोधः । भावनान्वयाभावप्रतियोगिनिच संख्यान्वयो नञास्समभिव्याहा रस्थलइति मतं । तदपि न । सप्तम्यर्थस्य साक्षाद्धात्वर्थान्वयाव्युपत्तेः ।

अन्यथा कर्तृत्वाभिविक्षायां चैत्रेपच्यत इतिभावेप्रयोगापत्तेः । अतएव सप्तम्यर्थस्य धात्वर्थान्वये परम्परापदोपादानं कर्तृकर्मान्यतरद्वारकत्वोपादानंवा प्रामाणिकानाम् ।

नच नञ्समभिव्याहारस्थले साक्षात्सम्बन्धेनान्वयव्युत्पत्ति कल्पनमितिकेषांचि दुक्तं युक्तम्, चैत्रे नपच्यतइति प्रयोगस्यैवमपि निवारयितुमशक्यत्वात् । आख्यातार्थभावनासंख्यादेर्नञ्समभिव्याहारसत्वेन्यान्वयबोधकव्युत्पत्त्यन्तरकल्पनापत्तेश्च ।

एतेन नञ्समभिव्याहारस्थले धातुना शक्यार्थाभावोलक्ष्यते, नञस्तु द्योतकत्वात्तात्पर्यग्राहकत्वमेव । सप्तम्यर्थस्यच व्युत्पत्तिविशेषकल्पनया धात्वर्थभूताभावप्रतियोगिनि शक्यार्थे कालसम्बन्धादावन्वयः । भूतलनिष्ठाधिकरणतानिरूपक वर्तमानकालसम्बन्ध प्रतियोगिकाभावाश्रयत्वं घटवृत्तीत्यादिश्च शाब्दबोधः । भावनासंख्यादेश्च न व्युत्पत्त्यन्तरकल्पनमिति केषांचिदुक्तमपास्तम् । कल्पनागौरवस्य तदवस्थत्वात् । चैत्रे नपच्यतइति प्रयोगापत्तेश्च, गृहे न पचतीति प्रयोगानापत्तेश्च । गृहस्य साक्षात् पाकाधिकरणत्वाभावात् ।

अथ तत्र कर्तृद्वारकान्वयस्वीकारेपि भूतले घटो नास्तीत्यत्रैव सप्तम्यर्थस्य धात्वर्थभूताभावप्रतियोगि कालसम्बन्धेन्वय इतिमतम् । ततो स्याख्यधातुघटित व्युत्पत्तिकल्पनादतिगौरवं । गृहे न पचतीत्यादौच गृहाधिकरणकचैत्रवृत्ति पाकस्या प्रसिद्धेर्न तदभावो धातुना बोधयितुं शक्यतइति तत्र शाब्दबोधानुपपत्तिः तदवस्थैवेतिचेन्न । इदानीं भूतले घटो नास्तीत्यादावपि भूतलाधिकरणक घटवृत्तिसत्ताश्रयत्वं घटनिष्ठाभावप्रतियोगीत्येव शाब्दबोधात्, प्रसिद्धं हि घटस्य भूतलाधिकरणत्वं कालान्तरे । अतो न प्रतियोगिनोप्रसिद्धिः । नवा व्युत्पत्त्यन्तरकल्पनम् । तथाहि—सप्तम्यर्थस्य तावन्निरुक्तसंसर्गेणाख्यातार्थेन्वयः प्रथमार्थस्यापि क्लृप्तसंसर्गेण तत्रैव, नञापरं लडाद्यर्थ कालावच्छिन्नघटनिष्ठाभावलक्षणा, लडादिश्च तात्पर्यग्राहकमात्रं, इदानींपदस्यच निपातत्वान्नञर्थान्वयेपि न क्षतिः; संभवतिहि उक्तसत्ताश्रयत्वाभावएव तत्कालावच्छेदेन घटे, एतस्मिन्

काले एतद्भूतले घटाभावात् । अतएव भूतलवृत्तिघटाभावस्या प्यर्थादनु भूयमानस्य नापलापः । यत्र त्वधिकरणे कदापि न कर्त्रादिसत्ताप्रसिद्धा-तत्रापि नकर्तुर्घटत्वादिना संसर्गघटकता, येन प्रतियोग्यप्रसिद्धिराशंक्येत, अपितु प्रकृतक्रियाश्रयत्वेनैव, तथाच भूतलनिष्ठाधिकरणतानिरूपक वृत्तिवर्तमानसत्ताश्रयत्वं भूतलवृत्तिपरमाण्वादावेव प्रसिद्धं । अयमेव प्रकारः पूर्वत्रानुसन्धेयः ।

एवं लडाद्यर्थस्यापि धात्वर्थान्वयो न त्यक्तोभवति । तात्पर्यग्राहक त्वस्यापिच स्वीकारात् तत्कालावच्छिन्न घटनिष्ठाभावप्रतियोगित्वं उक्तविधाश्रयत्वे अन्याहतं । यदित्वस्मिन् पक्षे घटस्याख्यातार्थे साक्षात्सम्बन्धेना नन्वयात् कर्तृत्वानुपपत्ति राशंक्येत, ततोस्त्वाख्यातस्यैवोक्ताश्रयत्वप्रतियोगि कोक्तविधाभावे सप्तमीनञुभयसमभिव्याहारेलक्षणा, नञ्पदञ्च तात्पर्यग्राहकमात्रम् । तस्मिंश्चाभावे घटस्याधेयत्वसम्बन्धेनैवान्वयात् कर्तृत्वोपपत्तिः । सप्तम्यर्थस्यच तस्मिन्नेवाभावे कर्तृघटित परंपरा सम्बन्धेनैवान्वया नव्युत्पत्यन्तरकल्पना । उक्तविधाश्रयत्वावच्छिन्नं प्रतियोगिताकाभावश्च घटे न घटस्य भूतलवृत्तितादशायामित्यर्थात् भूतलाधिकरणक घटाभावबोधः ।

एवं वायौरूपन्नास्ति ह्रदेवह्निर्नास्ति जातौसत्तानास्तीत्यादिप्रयोगा-अप्युपपादनीयाः । नच समवायसम्बन्धेन जातिवृत्ते रप्रसिद्ध्या समवायसम्बन्धावच्छिन्न जातिनिष्ठाधिकरणता निरूपक वृत्ति विद्यमान कालसम्बन्धाश्रयत्वा प्रसिद्धेः कथं तदभावस्य सत्तायां बोधः इतिवाच्यम्। जातावपि साक्षात्स्वरूपसम्बन्धेन वृत्तेः प्रसिद्धत्वात् सत्तायामपि निरुक्त सामान्याभावोपपत्तेः । जातौ समवायेन सत्तानास्तीति प्रयोगस्तु निरुक्ताश्रयत्वस्यैव व्यधिकरणसम्बन्धावच्छिन्नाभाव मादायोपपादनीयः । समवाये नेत्यस्यचाख्यातार्थे ऽभावे स्वावच्छिन्नत्व सम्बन्धेनान्वय इति न काप्यनुपपत्तिः ।

एवं गृहे चैत्रो न पचतीत्यादावपि पूर्ववदेव सर्वैः प्रकारैः बोधोपपादनं द्रष्टव्यम् । तत्र त्वयं विशेषः, चैत्रस्य ग्रहस्थत्वे पाकाश्रयत्वाभावगा

दाय पाकाश्रयत्वे ग्रहस्थत्वाभावमादाय उभयाभावे चोभयाभावमादाय विशिष्टाभाव स्सम्पादनीयः । तत्तदभावबोधएवच तात्पर्यभेदेन फलं । एवं स्थाल्यां तण्डुलं नपचति चैत्र इत्यत्रापि स्थाल्यां तण्डुलवृत्तित्वाभावे, तण्डुलस्य पाककर्मत्वाभावे पाकस्य चैत्रवृत्तित्वाभावेपिच तात्पर्यभेदोदृष्टव्यः । तात्पर्यग्राहकांतराभावेतु स्थालीपदवैय्यर्थ्यभिया आद्याभावएव, झटित्यर्थात्प्रतीतेः । अतएव " नजीवत्पितृकः कुर्यात् तिलैः कृष्णैश्चतर्पण " मित्यादौ कृष्णत्वाभावएव तात्पर्यं, नतुतिलतर्पणाभावादा वितिव्याचक्षतेवृद्धाः । नान्तरिक्षेनिश्वेतव्य इत्यादौतु सप्तम्यर्थस्य कर्तृकर्मद्वारकत्वासम्भवेन प्रतियोग्यप्रसिद्ध्यापत्ते रगत्या नञ्सप्तम्यन्ताभ्या मन्तरिक्ष वृत्त्यभाव लक्षणया तत्प्रतियोगित्व माख्यातार्थेनूद्यतइति तस्यनित्यानुवादता । तत्रसप्तम्यर्थस्य स्वातंत्र्येणान्वयाभावादेवनञ्युत्पत्त्यन्तरकल्पना । अतएव अर्थवादवाक्यलक्ष्यप्राशस्त्यस्था प्यनयैव व्युत्पत्त्याऽऽख्यातार्थभावनान्वयः । अ तरिक्षेघटे नपचतीत्यादौच सप्तम्यन्त नञ्धातुभि रन्तरिक्ष वृत्ति त्वरूप व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक पाकाभावो लक्ष्यते । आख्यातेन चाश्रयत्वं । तथाच उक्तविधाभावाश्रयत्वं घटवृत्तीति शाब्दबोधः । अतोत्रापिन सप्तम्यर्थान्वय इति न कुत्रापि सप्तम्यर्थस्य कर्तृकर्मान्यतरद्वारकत्वव्यभिचारः । यत्रतु न सप्तम्यन्तपदसमभिव्याहारश्चैत्रेनपचतीत्यादौ, तत्र नञर्थस्य चैत्रवृत्त्यभावस्य चैत्रवृत्तिकृतौ प्रतियोगितासम्बन्धेनान्वयः । अथवा वर्तमानपाकानुकूलकृत्यभावमाख्यातेन लक्षयित्वा तस्मिं श्चैत्रान्वय इत्यादिबोध्यम् ।

एवं लिङादिसमभिव्याहारेपि चैत्रो न कळंजंभक्षयेदित्यादौ यत्र चैत्रवृत्तिकृतिप्रसिद्धिः तत्र तस्यां न कळंजंभक्षयेदितिवदेव विध्यर्थस्य स्वप्रयोज्याभावप्रतियोगित्व संसर्गेणैव, नञर्थस्यापि चैत्रवृत्त्यभावस्य प्रतियोगितासंसर्गेणान्वयः । अप्रसिद्धौत्वाख्यातेन पाकानुकूलकृत्यभावं लक्षयित्वा तस्मिं न्विध्यर्थस्य प्रयोज्यत्वेन चैत्रस्यचाधेयत्वेना न्वय इतिसर्वमनवद्यम् ।

तच्चाधिकरणत्वं त्रिविधं । औपश्लेषिकम् , वैषयिकम् , अभिव्यापकंचेति । कटे आस्ते, घटे ज्ञानमस्ति, मोक्षे इच्छास्ति, सर्वस्मिन्नात्मास्ति-

तिलेषु तैलमस्ति । उपश्लेषः - सावच्छिन्नवृत्तित्वं । वैषयिकं - विषयतासंबन्धावच्छिन्नं । अभिव्यापकमवच्छेदकावच्छेदेन वृत्तिमत् । सप्तम्यधिकरणे चेति चकारात् दूरान्तिकार्थेभ्योपि सप्तमी वास्यात् । दूरे अन्तिकेवा ग्रामः, दूरे- दूरत्वावच्छिन्नप्रदेशे । प्रतियोगित्वं षष्ठ्यर्थः । यद्यप्यत्राधिकरणत्वादेव सप्तमीप्राप्यते । तथापि द्वितीयादिविभक्तित्रयेण विशेषविहितेन बाधप्रसक्तौ प्रतिप्रसवार्थश्चकारः । एवं 'क्तस्येन्विषयस्य कर्मण्युपसंख्यान' मिति वार्तिकात् इनः शब्दो विषयो वर्तमानभूमिर्यस्य - यदुपरीन्शब्द इत्यर्थः तादृशक्तप्रत्ययस्य वस्तुतो यत्कर्म तस्मिन् सप्तमी । अधीतीव्याकरणे । अधीतमनेनेति विग्रहः इष्टादिभ्यश्चेति कर्तरि इनप्रत्ययस्य विधानात् । एतस्य च तद्धितत्वेन कृतपूर्वीकटमितिवत् द्वितीयायां प्राप्तायां कर्मणि सप्तमी विधिः तद्बाधेन, शाब्दबोधश्च तद्वदेव । कर्मचात्र मुख्यमेव, नतु मासादिः, तेन मासमधीतीव्याकरण इत्यत्र काले द्वितीयैव ।

एवं " साध्वसाधुप्रयोगेचे" ति वार्तिकात् साधुः कृष्णोमातरिभवति , असाधुर्मातुल इत्यत्र सप्तमी । अत्र वैषयिकत्वादिना अधिकरणसप्तम्यैवसिद्धौ पुनर्वचनं षष्ठीनिषेधार्थम् । नच"साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतीतेः (२-३-४३) इति वक्ष्यमाणसूत्रेणैव साधुशब्दयोगे सप्तमीसिद्धे रेतद्वार्तिके साधुशब्द ग्रहणवैयर्थ्यम् । अनर्चायां प्रतिनायोगेपि साधुशब्दयोगे सप्तमीत्येवंसार्थक्यात् । नचैवं साधुर्भृत्यो राज्ञ इति षष्ठीप्रयोगानापत्तिः । तत्र राज्ञो भृत्यद्वारकान्वयस्वीकारेण साधुत्वद्वारकान्वयानंगीकारात् । नचैवमप्यर्चानर्चादिसाधारण्येन साधुशब्दयोगे सप्तमीविधौ वक्ष्यमाणसूत्रे अर्चाग्रहणवैयर्थ्यं, निपुणपदयोगेर्चायामेव सप्तमीत्येवं सार्थक्यात् । नचैवं एतद्वाक्येनैव साधुशब्दयोगेपि सप्तमीसिद्धेः वक्ष्यमाणसूत्रे साधुशब्दग्रहणवैय्यर्थ्यं । उत्तरभाविवार्तिकेन पूर्वभाविसूत्रे वैय्यर्थ्यशंकाया अनुक्तिसहत्वात् ।

एवं - "निमित्तात्कर्मयोगे" इति वार्तिकात् " चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुंजरम् । केशेषु चमरीं हन्ति सीम्निपुष्कलकोहतः " इत्यादौ सप्तमी । अत्र निमित्तं फलत्वादिना क्रियाप्रयोजकम् । अतएव प्र-

योज्यत्वं सप्तम्यर्थः साक्षात्संबन्धेन क्रियान्वयी । तस्यच कर्मकारक-योगः संयोगसमवायादिर्वास्तव एव सप्तमीप्रयोजको नतु शाब्दबोधे ज्ञातः, अतएव तदभावे वेतनेन धान्यं लुनातीत्यादौ "हेतावित्यनेन" तृतीयैव । तृतीयापवादत्वेनैवचायं सप्तमीविधिः, तादर्थ्यचतुर्थ्यपवादत्वेनवा, तदा वेतनाय धान्यं लुनातीत्यपि प्रयोगः । अत्र त्रिभूदाहरणेषु समवायाख्यः कर्मकारकसंबन्धोऽ वयवावयविभावात् । चतुर्थीतु संयोगः, सीम्नो ज्ञानार्थं पुष्कलकः शंकुः निखातइति तदर्थात् ।

एवं "यस्यच भावेन भावलक्षणम्" (२ - ३ - ३७) इतिसूत्रात्-यत्सम्बन्धिन्या निर्ज्ञातकालया ययाक्रियया निर्ज्ञातकालायाः क्रियायाः कालपरिच्छेदाख्यं लक्षणं क्रियते तस्याः क्रियायाः कर्तुः कर्मणोवा स्वक्रियाद्वारके इतरक्रियालक्षकत्वे विवक्षिते तद्बोधकात् सप्तमी स्यादित्यर्थकात् ब्राह्मणेष्वधीयानेषु गतः, गोषु दुह्यमानासु गतइत्यादौ सप्तमी । अत्र कर्तृत्वकर्मत्वान्यतरसंबन्धेन स्वसंबन्धिक्रियाकालकत्वं सप्तम्यर्थः, तस्यच साक्षात्संबन्धेनेतरक्रियान्वयः, पूर्वक्रियायाश्च कर्तृकर्मविशेषणत्वेपि सप्तमीलक्ष्यसम्बन्धि संसर्गघटकत्वमपि नानुपपन्नम् । एवंच यत्र "इको यणचि" त्यादौ क्रियानोपात्ता तत्रसतीति सत्तारूपक्रियाध्याहारो बोध्यः । यत्रतु सम्बन्धिनो लक्षकत्वं न विवक्षितं तत्र गावोदुह्यंते चैत्रोगतइति वाक्यद्वयप्रयोगः । अतएव तत्र पूर्वक्रियाया उत्तरक्रियोपलक्षकत्वबोधः कविकाव्यादिवन्मानसएव । अतएवच समानार्थकत्वाभावात् न-सप्तमीविधिः तस्य बाधकः, अपित्वपूर्वविधेः, कथंचित् षष्ठी बाधकोवेति ध्येयम् । यत्तु क्रियार्हाणां क्रियाकर्तृत्वादौ विवक्षिते क्रियानर्हाणांच तदभावे विवक्षिते सप्तमी, तथा क्रियार्हाणां तदभावे क्रियानर्हाणांच तस्मिन् विवक्षित इत्येवं वार्तिकं, सत्सुतरत्सुपूज्यमानेषुवा असन्तआसते नपूज्यन्तेवा, असत्सुतिष्ठत्सु अपूज्यमानेषुवा सन्तस्तरन्ति पूज्यन्तेवा, असत्सु तरत्सु पूज्यमानेषुवासन्तस्तिष्ठन्ति न पूज्यन्ते वा इत्यत्र सप्तमीविधायकं, तद्यस्यच भावेन भावलक्षणमित्यनेनैव सिद्धे नारम्भणीय

मिति केचित् । कैयटादयस्तु लक्ष्यलक्षणभावाविवक्षायां सप्तम्यर्थविधानार्थ मित्याहुः । तन्न - लक्ष्यलक्षणभावातिरिक्त सम्बन्धस्यासम्भाव्यादभानेन-तस्मिन्नर्थे सप्तमीविधानवैयर्थ्यापत्तेः । अतोर्हत्वाद्यवच्छिन्न कर्तृत्वकर्म त्वान्यतरसंबन्धेन स्वसंबन्धिक्रियाकालिकत्वस्य सप्तम्यर्थत्वद्योतनायानुशासनान्तरम् । तथाहि - अत्र प्रथमवाक्यद्वये औचित्यं व्यंग्यम् । अन्त्यद्वयेचानौचित्यम् । तदुपपादकत्वं निरुक्तसप्तम्यर्थस्य, तद्विशेषणीभूतार्हत्वा द्युपपादनार्थंच तिष्ठत्स्वासतइत्येताभ्यां तरणाभावो लक्ष्यते । सदसत्पदाभ्यांच वाच्यव्यंग्यविधया क्रियार्हत्वा नर्हत्वे व्यज्येते । अतश्चैतादृशलक्ष्यलक्षणभावस्य गोषु दुह्यमानासु गतइत्यादिव्यावृत्तस्यात्र विशिष्यानुभूयमानस्यापह्नोतुमशक्यत्वात् पृथगनुशासनं ।

एवं " षष्ठीचानादरे " (२ - ३ - ३८) इतिसूत्रादनादरविशिष्टलक्ष्यलक्षणभावविवक्षायां षष्ठीसप्तम्यौ विकल्पेन । रुदतिरुदतोवा प्राव्राजीत् । रुदन्तं पुत्रमनादृत्येत्यर्थः ।

एवं " स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च " (२ - ३ - ३९) इति सूत्रादेभिस्सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः । गोषु गवां वास्वामी । निरूपकत्वं विभक्त्यर्थः । तस्यच स्वाम्यादिद्वारकोस्ति क्रियान्वयः । समानार्थकस्वाम्यादि त्रयग्रहणं पर्यायान्तरनिवृत्त्यर्थं । विरूपाणामपि समानार्थानामिति वार्तिकात् । वक्रदण्डा वितिवत् पदत्रयैकशेषस्तु शब्दस्वरूपपरत्वात् नाशंक्यः । गवां गोषुवाप्रसूतः । गा अनुभवितुं जातइत्यर्थइति हरदत्तः ।

एवं " आयुक्तकुशलाभ्यांचासेवायाम् " (२ - ३ - ४०) इतिसूत्रात् गोषु गवां वा आयुक्तः कुशलोवा इत्येवं षष्ठीसप्तम्यौ । आयुक्तोव्यापारितः । विषयसप्तम्यां प्राप्तायां पक्षे षष्ठीविधीयते । आसेवा तदेकपरत्वं । तदभावेतु आयुक्तोगौश्शकटेन, ईषद्युक्तइत्यर्थः ।

एवं "यतश्चनिर्द्धारणम्" (२-३-४१) इतिसूत्रात् जातिगुणक्रियासंज्ञाभि र्यत स्समुदाया देकदेशस्य प्रथक्करणात्मकं निर्धारणं क्रियते तद्वाचका

च्छष्ठीसप्तम्यौस्तः । नृणां नृपुवाब्राह्मणः श्रेष्ठः, गवांगोषुवा कृष्णा बहु क्षीरा, गच्छतां गच्छत्सुवा धावन् शीघ्रगामी, छात्राणां छात्रेषुवा मैत्रःपटुरित्यादौ । अत्रविभक्त्यर्थ उक्तविधनिर्धारणं । तत्रचनिरूपकतया प्रकृत्यर्थान्वयः । तस्यच विषयीभूतब्राह्मणादिवृत्तित्वसंसर्गेण क्रियान्वयः । इदंच पदोपात्तस्य निर्धारणप्रतियोगितावच्छेदकस्य मनुष्यत्वगोत्वादे निर्धारणविषयीभूते ब्राह्मणादौ सत्त्वएव विकल्पाभिधानंबोध्यम् । यदातु तस्य तत्रासत्त्वं तदानिर्धारणप्रतियोगिवाचकात् पंचम्येव ।

पंचमीविभक्ते (२-३-४२) इतिसूत्रात् माधुराः काशीस्थेभ्य आढ्यतराःइत्यादौसप्तमी ।

एवं "साधुनिणाभ्या मर्चायां सप्तम्यप्रतेः" (२-३-४३) इतिसूत्रात् मातरिसाधुर्निपुणोवा इत्यत्र सप्तमी । अर्चाभावे निपुणोराज्ञोभृत्यइतिषष्ठी । प्रतिग्रहणमुपलक्षणम् , साधुर्निपुणोवामातरं प्रतिपरि अनुवा, पूर्वमेवचव्याख्यातप्रायमिदंसत्रम् ।

एवं "प्रसितोत्सुकाभ्यां तृतीयाच" (२-३-४४) इतिसूत्रात् आभ्यां योगे तृतीयास्या त्सप्तमीवेत्यर्थकात् प्रसित उत्सुको वा हरिणा हरौ वेत्यत्र विकल्पेनसप्तमी । प्रसित आसक्तः । नतुप्रकर्षेणशुक्रः । विषयत्वं विभक्त्यर्थः । तृतीयायाः पाक्षिकत्वार्थवचनम् ।

एवं "नक्षत्रेचलुपि" (२-३-४५)इति सूत्रा नक्षत्रवाचि प्रकृतेः "नक्षत्रेण युक्तः कालः"इत्यनेनाण्प्रत्ययस्य " लुबविशेष " इतिलुपिकृते नक्षत्रयुक्तकालप्रातिपदिकादधिकरणे तृतीयासप्तम्यौस्त इत्यर्थकात् मूलेन मूलेवादेवीमावाहयेदित्यादौ सप्तमी । कालिकाधिकरणत्वं विभक्त्यर्थः । अण् प्रत्ययकरणेन शुद्धनक्षत्रापरत्वे पुष्येशनिरित्यादौ सप्तम्येव , न तृतीया । कालपरत्वेप्यधिकरणत्वाविवक्षायां अद्यपुष्यइत्यादौ प्रथमापि ।

एवं "सप्तमीपञ्चम्यौकारकमध्ये" (२-३-७) इतिसूत्रात् सजातीययोर्विजातीययोर्वा कारकयो र्मध्ये यौकालाध्वानौ तत्र सप्तमीपंचम्यौस्तः इत्यर्थकात् अद्यभुक्त्वायं द्वयहे द्वयहाद्वा भोक्ता, इहस्थोयं क्रोशेक्रोशाद्वा लक्ष्यं

विष्णे दित्यादौ विकल्पेन सप्तमी । अत्र यद्यपि भोजनद्वयेप्येकएव पुरुषः कर्तृकारकम्, तथा प्यद्यतनकालीन भोजनक्रियानिरूपित कर्तृत्वात् द्वयहकालीन भोजनक्रियानिरूपित कर्तृत्वस्य भेदात् कारकद्वयमध्यत्वं । द्वितीयोदाहरणेतु अयमिति कर्ता लक्ष्यमिति कर्म इहेत्यधिकरणमिति विजातीयमध्यत्वं । सर्वत्राधिकरणत्वं विभक्त्यर्थः । अगादानत्वाद्यसंभवात् । पक्षेपंचमीप्रा-प्त्यर्थं विधिः ।

एवमधिकशब्देनापि योगे लोके लोकाद्वा ऽधिको हरिरित्यादौ पंचमी-सप्तम्यौज्ञेयौ । तदस्मिन्नधिकं यस्मादधिकमिति च सूत्रीयद्विविधनिर्देशात्, नि रूपितत्वं विभक्त्यर्थः । स्वसम्बन्धाधिक्याश्रय वृत्तित्व संसर्गेण क्रियान्वयी ।

एवं "यस्मादधिकंयस्यचे श्वरवचनं तत्रसप्तमी" (२-३-९) इतिसूत्रादाधिक्यार्थक कर्मप्रवचनीययुक्ते सप्तमी स्यादित्यर्थकात् उपपरार्धे हरेर्गुणा इत्यादौ सप्तमी । अत्र उपाधिकेचेतिसूत्रादुपेत्ययं कर्मप्रवचनीयः । तद्युक्तेपरार्धपदे सप्तमी । प्रतियोगित्वं सप्तम्यर्थः । स्वसम्बन्धाधिक्याश्रय गुण-वृत्तित्वेन क्रियान्वयी । उपपदं तात्पर्यग्राहकम् ।

एवं "अधिरीश्वरे" (१-४-९७) इतिसूत्रादैश्वर्ये अधिः कर्मप्रवचनीयसंज्ञ-स्तद्युक्ते ऐश्वर्यप्रतियोगिनि तदनुयोगिनिच अधिरामेभूः, अधिभुविरामइत्यादौ पर्यायेणसप्तमी । अत्र क्रमेण अनुयोगित्वं प्रतियोगित्वंच सप्तम्यर्थः । स्वसम्बन्धैश्व र्यसम्बन्धीतर वृत्तित्व माख्यातार्थसंसर्गः । अधिस्तात्पर्यग्राहकः । रामप्रतियोगिकस्व त्वाश्रयाभूः, भूवृत्तित्वत्वप्रतियोगीरामइति च फलितोर्थः । तत्सिद्धंसप्तम्यर्थः इशक्योलाक्षणिकोवा सर्वोपि भावनान्वयीति ।

तदेवं लिंगसंख्या व्यतिरिक्त सुबर्थ मात्रस्य सिद्धोभावनान्वयः ।

नवीनानांनानामनन विशदानामयमहो सुयुक्तीनां पुंजैरिहविरचितः कोपिज गति । महातर्कस्तर्कप्रथिततमसज्ञाततमसां सुधाकुन्मीमांसामतकुमुदपूरस्यजयतु॥*

यद्बद्धनानां पटलोविशालो विलोक्यतेल्पेकिलदर्पणेपि ।
तद्बन्मंदीयेपि निबन्धनेस्मिन्नुद्वीक्ष्यतां भाट्टरहस्यसारः ॥ * ॥

इति श्रीखण्डदेवविरचिते भाट्टरहस्ये प्रथमः परिच्छेदः ।